CC-0. In Public Domain. Digitization by eGangotri

२.५.२०

...भारती ग्रन्थमाला
...५७

२।०।७२

कपिलपुराणम्

(समीक्षात्मकं संस्करणम्)

सम्पादकः—
डा. श्री कृष्णमणि त्रिपाठी

चौखम्भा सुरभारती प्रकाशन
वाराणसी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ड्. पु. ५०

वाल्मीकि विद्यापीठ-पुस्तकालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

चौखम्बा सुरभारती ग्रन्थमाला

५७

कपिलपुराणम्

(समीक्षात्मकं संस्करणम्)

सम्पादकः

डॉ० श्रीकृष्णमणि त्रिपाठी

(आचार्य, एम० ए०, पी-एच्० डी०, डी० लिट्०)

लब्धावकाशप्राध्यापकः, पुराणेतिहास-भूगोल-संस्कृति-विभागाध्यक्षश्च

वाराणसेय श्रीसम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

भूमिकालेखकः—

श्रीविजयशंकर तिवारी

संस्कृत साहित्य प्रचारक प्रतिष्ठान, धर्मागतछपरा

कुबेरनाथ, (देवरिया)

वाल्मीकि विद्यापीठ-पुस्तकालय

BHARATIYA
VIDYA PRAKASHAN
P. BOX 1108 KACHAURI GALI,
VARANASI-221001
CALL : 65965

चौखम्बा सुरभारती प्रकाशन

वा रा ण सी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशक—

चौखम्बा सुरभारती प्रकाशन

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)

के० ३७/११७, गोपालमन्दिर लेन

पोस्ट बाक्स नं० १२९

वाराणसी–२२१००१

सर्वाधिकार सुरक्षित

प्रथम संस्करण १९८१

We Certified that the price of book charged according to publishers price. For C. V. Bhawan

PRICE 50/-

अन्य प्राप्तिस्थान—

चौखम्बा विद्याभवन

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)

चौक (बनारस स्टेट बैंक भवन के पीछे),

पो० बाक्स नं० ६९

वारणसी–२२१००१

मुद्रक—

श्रीजी मुद्रणालय

वाराणसी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

THE

CHAUKHAMBA SURBHARATI GRANTHAMALA

57

KAPILAPURANAM

(A CRITICAL EDITION)

वाल्मीकि विद्यापीठ-पुस्तकालय

Edited by

Dr. Shrikrishnamani Tripathi

(**Acharya, M. A., Ph. D., D. Litt.**)

Former Professor & Head of the Deptt. of
Puranetihas, Geography & Culture.

Sri Sampurnananda Sanskrit Vishwavidyalaya, Varanasi.

Introduction by

Shri Vijayashankar Tiwari

CHAUKHAMBA SURBHARATI PRAKASHAN

VARANASI

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

© CHAUKHAMBA SURBHARATI PRAKASHAN
(*Oriental Booksellers & Publishers*)
K. 37/117, Gopal Mandir Lane
Post Box No. 129
VARANASI 221001

First Edition
1981
Price Rs. ~~40-00~~

Also can be had of
CHOWKHAMBA VIDYABHAWAN
(*Oriental Booksellers & Publishers*)
CHOWK (Behind The Benares State Bank Building)
Post Box No. 69
VARANASI 221001

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रस्तावना

वेदेभ्य उद्धृत्य समस्तधर्मान्
योऽयं पुराणेषु जगाद देवः ।
व्यासस्वरूपेण जगद्धिताय
वन्दे तमेतं कमलासमेतम् ॥

वस्तुतो भारतीयमध्ययनं वेदत एवारभ्यते, यतो हि वेदाः सन्ति भारतीय-संस्कृतेर्मूलमाधारः। विश्ववाङ्मये वेदात् प्राक्तनं किमपि साहित्यं नोपलभ्यते इति सर्वैः पौर्वात्यैः पाश्चात्यैश्च विपश्चिद्भिर्मन्यते। अतः श्रद्धालवो हिन्दवः सर्वतोऽधिकं वेदप्रामाण्यमेवाभ्युपगच्छन्ति, तन्मूलक-स्मृति-पुराणानुसारमाचरन्ति, व्यवहरन्ति च निरन्तरम्। संस्कृतवाङ्मये पुराणानामस्ति एकं विशिष्टं स्थानम्। वेद-स्मृत्योरनन्तरं पुराणानामेवास्तिकजगति प्रामाण्यमङ्गीक्रियते। यतोऽत्र वेदार्थमेव स्पष्टीकर्तुं ज्ञानकर्मोपासनानां सिद्धान्ता अतिसरलया भावगम्यया प्राञ्जलया भाषया विविधाभि र्भक्तशिरोमणीनां मानवमणीनां कथाभिः सम्यगवबोधिताः सन्ति, येषां मननद्वारा साधारणबुद्धयोऽपि जना व्यावहारिकीं स्थितिं सम्पादयन्तः वेदोपनिषत्प्रतिपाद्यं मानवानां प्रधानं लक्ष्यं परमात्मानं प्राप्य मुक्ता भवितुमर्हन्ति। वेदानां यथार्थमर्थमवगन्तुं पुराणानामस्ति पूर्णः सहयोगः। अतः वेदार्थानां विस्तराय पुराणानुशीलनस्यावश्यकता प्रदर्शिता महाभारतस्यादिपर्वणि भगवता व्यासदेवेन **'इतिहास-पुराणाभ्यां वेदार्थमुपबृंहयेत्'**[1] इति।

अतो भगवन्निश्वासरूपापौरुषेयवेदवत् पुराणानामपि प्रामाण्यं सिध्यति। वस्तुतोऽनादिपरम्परातः प्रचलितायाः भारतीयसंस्कृतेः सदाचारस्य वर्णाश्रम-धर्मस्य समस्तस्य समाजस्य सम्पूर्णस्य राष्ट्रस्य च मर्यादासंरक्षणं यथा वेदैर्विधीयते तदनु स्मृतिभिः सम्पाद्यते तथैव पुराणैरपि क्रियत इति न संशयग्रस्तम्। वेदानां दुरूहतया तदीयतत्त्वसाक्षात्कारो यादृक् काठिन्यमावहति, न तादृक् सरलातिसरल-भाषानिबद्धानां पुराणानामस्ति काठिन्यम्[2]।

साधारणेष्वपि जनेषु वेदरहस्यज्ञानस्यावश्यकत्वमनुभूय भगवान् कृष्णद्वैपायनो महर्षिर्व्यासदेवः पुराणानि रचितवान् कृतवांश्च तत्र ज्ञानकर्मापेक्षया ऋजुभिरुपायैः।

---

१. महाभारतम्—आदिपर्वणि—१।२६७। २. पुराणालोचने पृष्ठ ५५।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानवमात्रेण करणीयस्य भक्तिमार्गस्य-विस्तारम् । अतो निखिलानां जनानां कल्याण-कारिभिरुपायैः परिपूर्णानां पुराणानामनुशीलनेन भवति मानवतायाः जागर्तिः, सम्यक् सञ्जायते धर्मस्य संरक्षणम्, मानवजन्मनः साफल्यञ्च सिध्यति। अतएव सङ्गच्छते निम्नाङ्कितं पद्यम्—

विस्ताराय तु वेदानां स्वयं नारायणः प्रभुः।
व्यासरूपेण कृतवान् पुराणानि महीतले ॥[1]

यथा दिवसे प्रकाशो भगवता भास्करेण भवति, रात्रौ प्रकाशः चन्द्रमसा जायते, गृहान्धकारो दीपेनापनीयते तथैव परमात्मस्वरूपप्रदर्शनार्थं ज्ञानं तु पुराण-वचनैरेव सम्भवितुमर्हति । विविधाभिर्वासनाभिर्भूयो भूयो भवाटव्यामस्यां बंभ्रम्य-माणानां जीवानां कृते पुराणमस्ति सरल आलोकमार्गः । अत एव लोकपितामहेन ब्रह्मणा सर्वासां विद्यानामादौ पुराणविद्यैव स्मृता, ततस्तन्मुखेभ्यो वेदा आविर्भूताः तथा चोक्तं मत्स्यपुराणे[2] ।

सर्वशास्त्राणां ज्ञातृत्वेऽपि पुराणज्ञानाभावात् कस्यापि पुरुषस्य विचक्षणत्वं न सम्भवतीति विष्णुपुराणस्यास्ति डिण्डिमघोषः[3] ।

पद्मपुराणे तु प्रोक्तमस्ति यद् यैर्वेदास्तदितराणि च शास्त्राणि सम्यगधीतानि, परन्तु तैर्यदि पुराणानामध्ययनं न कृतं चेत्, तर्हि तेषामुत्तमज्ञानप्राप्तिर्न जायते[4] ।

धार्मिकसन्देहानां निवृत्तये प्रवृत्तये चाध्यात्मिकपरलोकमार्गे पुराणानामनुशी-लनं नितान्तमस्त्यावश्यकम्, इदं हि विरुद्धैर्हेतुभिर्न हातव्यम् । शास्त्रेषु अप्रतर्क्यपुरा-णमानवधर्मशास्त्रसाङ्गवेदचिकित्सासु पुराणस्यैव प्रथमं स्थानं निर्दिष्टमस्ति महा-भारते, यतो हीमानि भगवत आज्ञारूपाणि सन्ति[5] ।

पुराणं मानवजातेर्हृदयान्धकारस्यापाकरणाय सर्वथा मणितुल्यं प्रकाशकमस्ति परमतत्त्वदृष्ट्या पुराणं हि नूनमस्ति श्रद्धेयं शास्त्रम् । पुराणेषु विविधैर्भावैर्विभिन्नै-र्नामभिर्विविधेभ्योऽधिकारिभ्यो विविधैः प्रकारैः परमं पुरुषार्थमवगन्तुमुपायाः प्रदर्शिताः सन्ति । अद्यत्वे पुराणानां सम्यगध्ययनंभावादेव तत्र निर्मूला अनेके आक्षेपा

---

१. पुराणार्णवम् १।२५, ब्रह्मपुराणं च २२।२९ ।

२. पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।
अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥ (म० पु० ५३।३)

३. यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः ।
न चेत् पुराणं संविद्यान्नैव स स्याद् विचक्षणः ॥ (वि० पु० २।५१)

४. बहुशास्त्रं समभ्यस्य बहून् वेदान् सविस्तरम् ।
पुंसोऽश्रुत पुराणस्य न सम्यग् याति दर्शनम् ॥ (प० पु० ४।१०५।३)

५. पुराणं मानवो धर्मः साङ्गो वेदचिकित्सितम् ।
आज्ञासिद्धानि चत्वारि न हातव्यानि हेतुभिः ॥ (अ० प० ३।७)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवन्ति। गभीरतया तदनुसन्धाने क्रियमाणे तेषामाक्षेपाणामनायासेन निराकरणं जायते। यदि पुराणान्याक्षेपपूर्णानि स्युः, तर्हि महादार्शनिकानां परमतत्त्वविचारकाणां कुमारिलभट्ट–श्रीस्वामिशङ्कराचार्य–रामानुजाचार्यवल्लभाचार्यप्रभृतीनां महानुभावानां निर्भ्रान्तप्रमाणानि पुराणानि कथङ्कारं स्वीकृतानि स्युः ?

पुराणानामन्तस्तलं प्रविश्य एवंविधं कर्त्तव्यमुपदिष्टं वर्तते, येन मानवानां सर्वथा कल्याणमेव जायेत। अतः पुराणानामन्तस्तलं प्रविश्य समीक्षायां क्रियमाणायां स्फुटमवगम्यते, यत् पुराणेषु देशकालस्थित्यनुसारं सर्वानुकूलं कर्त्तव्यमुपदिष्टं वर्तते, येन मानवानां सर्वथा कल्याणमेव जायेत। अतः पुराणपारायणशीलैर्विद्वद्भिर्भारतीयजनताया महत उपकाराय राष्ट्रसमुन्नतये च पुराणज्ञानराशिर्नूनं प्रसारणीयः प्रचारणीयश्च। अद्यत्वे स्वतन्त्रताया उषःकाले नित्यनवीनैरुत्साहैरभिनवचाक्यचिक्ययुगेऽपि पुराणानि महान्तमुपकारं कर्त्तुं प्रभवन्ति। प्राचीनभारतीयपथप्रदर्शनाय पुराणानि महाभारतम्, रामायणञ्च सर्वतोऽधिकं साहाय्यं विधातुं शक्नुवन्ति, यतो हि पुराणादीनां भूमिः समस्तं भूमण्डलं वर्तते, न च केवलं भारतवर्षमात्रम्। पुराणव्यवस्थायां विश्वबन्धुत्वादर्शो निहितोऽस्ति, येनान्तरराष्ट्रियसमस्यायाः समाधानेऽपि पर्याप्तं साहाय्यं भवितुमर्हति।

लौकिकविषयाणामपि पुराणेषु पर्याप्तं विवेचनं विद्यते। यतो हि पुराणानां दृष्टिपथे न केवलं भारतवर्षस्यापि तु तत्रोर्ध्वाधोभागे वर्तमानानां चतुर्दशभुवनानामपि पदार्थाः सम्यग् विवेचिताः सन्ति। एवं सार्वजनीनं हितमुपदेष्टुं प्रवृत्तानां पुराणानां समीक्षा कस्य सचेतसो मानवस्य न प्रियकरी कल्याणकरी च स्यात्।

पुराणं हि हिन्दुजातेः सर्वस्वम्, भारतीयसंस्कृतेः पोषकम्, मानवसमाजस्य पथप्रदर्शकमार्यसाहित्यस्य चाधारस्तम्भो विद्यते, येन सर्वविधधार्मिक-सांस्कृतिक-ऐतिहासिक-नैतिक-सामाजिक-सद्व्यवहारादीनां सौविध्यमवाप्यते। भारतीयस्य प्राचीनेतिहासस्यान्धकारे युगेऽपि पुराणानां प्रभया प्रकाशः प्राप्यते। अतएव महर्षिणा याज्ञवल्क्येन विद्यागणनायां पुराणस्य प्राथम्यमुपात्तम्[१]।

यथा वेदा ईश्वरानुग्रहेण पूर्वं ब्रह्मणो हृदि आविर्भूताः, ततो विभिन्नानां महर्षीणां हृदाकाशे प्रकाशिताः, तदनन्तरं च मानवसमाजे विस्तृताः तथैव सर्वप्रथमं पुराणविद्या ब्रह्मद्वारैव स्मृता, तदनु देवर्षीणां हृदयेषु प्रस्फुरिता, पश्चात् कथनोपकथनद्वारा मानवेषु प्रसरन्ती महर्षिव्यासद्वारा ब्रह्म-पद्म-विष्णु-भागवतादिपुराणरूपेणोपनिबद्धा सती लोककल्याणं कुरुते।

अतएवोभयमर्मज्ञः भगवान् कृष्णद्वैपायनो व्यासः वेदविभाजयिता, पुराणसङ्कलयिता चोच्यते। भारतीयपरम्परानुसारं वेदमन्त्राणां गूढोऽर्थो ब्राह्मणग्रन्थ-

१. पुराणं न्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥ (या० स्मृ० ३)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वाराऽवगम्यते, तस्य स्पष्टीकरणं च पुराणेतिहासाभ्यां भवति । पुराणेषु येऽर्था उक्ता सन्ति त एव वेदार्थस्य विस्तृतरूपा व्याख्या विद्यन्ते । भगवता व्यासेन पुराणातिरिक्तमेकं महाभारतमपि रचितम्, यत्र सर्वविद्यानां सङ्ग्रहो जातः । तदर्थं तेन प्रतिज्ञातं यत्, यदिहास्ति तदन्यत्राप्युपलभ्यते यन्नेहास्ति, न तत् क्वचिदन्यत्र प्राप्यते । महाभारतमितिहासशैल्या लिखितमस्ति । अतः एतदितिहासः प्रोच्यते । पुराणेतिहासयोः यज्ञ-दान-तीर्थ-व्रतोत्सवादीनां वर्णनप्रसङ्गे प्राचीनस्य भारतीयसमाजस्य प्रत्यक्षं रूपं दृष्टिगतं भवति, यत्राद्यत्वे हिन्दुसंस्कृतिरवलम्बिताऽस्ति । एवं पुराणेतिहासाभ्यां नूनं प्राचीनभारतस्य ज्ञानराशिवैभवमवगम्यते ।

आधुनिकभूगोलशिक्षार्थमपि पुराणानामनुशीलनमत्यावश्यकमस्ति । भौगोलिकदृष्ट्या मिश्रदेशस्य सुप्रसिद्धाया नीलनद्यास्तदेव स्थानमस्ति तद् भारते भगवत्या भव्याया भागीरथ्या गङ्गाया विद्यते । तस्या उद्‌गमस्थानजिज्ञासया विल्फोर्ड महोदयेन पुराणवर्णितभूगोलाधारेणान्वेषणमारब्धम्, तेन पुराणवर्णनानुसारं नीलनद्या उद्‌गमस्थानस्यैकं मानचित्रं प्रकाशितम्, किन्तु कनिंघमप्रभृतयो योरपीया विद्वांसो भारतीयपुराणसाहित्यस्य तद्गौरवमसहमाना विल्फोर्डमुपहसन्तस्तन्निमित्तं तन्नीलनदीमानचित्रं सर्वथाऽविश्वसनीयं भारतपक्षपातपूर्णमित्युद्‌घोष्य खण्डितवन्तः । तदनन्तरं वास्तविकतापक्षपातिना लेफ्टिनेन्ट जे० एच० स्पीकेन नीलनद्या उद्‌गमस्थानविषये परिश्रमः समारब्धः । तेन विचारजातमनुशील्य विल्फोर्डमानचित्रं गृहीत्वा मिश्रे भ्रमता तन्मानचित्राधारेणैव यात्रां कुर्वाणेन नीलनद्याः उद्‌गमस्थानमपि प्रत्यक्षीकृतम् । सर्वं तद् वृत्तम् 'डिस्कभरी आफ दि सोर्स नील' नामकेऽङ्कितमस्ति, अस्यैव विषयस्य विवरणम्, 'एसियाटिक रिसर्चेज तृतीय मार्गे लिखितमस्ति'[1] । एवंविधा अनेके सन्दर्भाः पुराणभौगोलिकविवरणानां प्रामाणिकतां साधयन्ति । पुराणेषु प्रधानतया भारतवर्षस्य गौणतया चान्यदेशानामपि किञ्चिद् विवरणं निर्दिष्टमस्ति, परमिदानीं दीर्घकालव्यवधानात्, प्रकृतिपरिवर्तनाद् राजनीतिविप्लवाच्चांशिकरूपेण पुराणनिर्दिष्टानां नदी-जनपदादीनां यथार्थतः परिचयोऽद्यत्वेऽतिकठिनो जातः । परं प्रसन्नताया विषयोऽस्ति यत् पुरातत्त्वानुशीलननिरतानां गवेषकाणां परिश्रमेण पुराणभौगोलिकविवरणसत्यता शनैःशनैः प्रमाणी भवति । शनैः शनैः सिन्धुघाटी-सभ्यता पुराणसमीपे समागच्छति ।

अथर्ववेदस्य पृथ्वीसूक्ते मातृभूमिं प्रति भारतीयभावनाया अत्यन्तमुदात्तंवर्णनं विद्यते । यथा माता स्वकीयं तनयं वात्सल्येन दुग्धं पाययति, तथैवास्माकं मातृभूमिरपि विभिन्नाभिः पयस्वतीभिर्भारतीयां जनतामाप्याययति । अत एवेयं विश्वम्भरा धात्री चोच्यते—माता भूमिः पुत्रो अहं पृथिव्याः[2] इति । अस्मिन्मन्त्रे मातृभूमेः

---

१. एशियाटिक रिसर्चेज, तृतीय भाग, पृष्ठ ९२ । २. अथर्ववेदः १२।१।१२ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वरूपस्य तथा तया सह मानवहृदयस्य चैकताया यादृशमुत्कृष्टं रूपं वर्तते तादृशमन्यत्रास्ति दुर्लभम् । भारतीयसंस्कृतौ सत्यस्य यः प्रकाशः उपलभ्यते तस्योद्गमो मातृभूमिरेवास्ति[1] तत्र वायुपुराणेनापि पृथिव्या अनन्तेति नाम निर्दिशता सा सर्वभूताश्रया जननी प्रोक्ताऽस्ति[2]—

जननी सर्वभूतानां सर्वभूतधरा धरा ।
नानाजनपदाकीर्णा नानाधिष्ठानपत्तना ॥
नानानदनदीशैला नैकजातिसमाकुला ।
अनन्ता गीयते देवी पृथ्वी बहुविस्तरा ॥

पृथ्वीसूक्ते राष्ट्रं त्रिविधं निर्दिष्टमस्ति—निकृष्टम्, मध्यमम्, उत्तमं च । तत्र निकृष्टकोटिके राष्ट्रे भौतिकसम्पत्तेः पूर्णतया विकासो दृश्यते । मध्यमे राष्ट्रे जनताया वुद्धौ सर्वदा चाञ्चल्यमवतिष्ठते । उत्तमस्य राष्ट्रस्य वैशिष्ट्यं तत्रत्या संस्कृतिर्भवति । अतो वेदमन्त्रद्वारा उत्तमराष्ट्रे मानसिकस्य तेजसः शारीरिकबलप्राप्तेश्च प्रार्थना कृता विद्यते[3] । पृथ्वी हि राष्ट्रस्य शरीरम्, जनता प्राणाः, संस्कृतिश्चास्ति मनः, एषां त्रयाणां सम्मेलनेनैव राष्ट्रस्यात्मनो भवति निर्माणम् । अतो यस्मिन् कस्मिन्नपि राष्ट्रे समुत्पद्य तत्रत्यायाः संस्कृतेः समुन्नतीकरणं तत्रत्यायाः प्रत्येकव्यक्तेः पुनीतं कर्तव्यम् । स्वस्याः संस्कृतेः समुन्नतिद्वारैव मानवो राष्ट्रे जन्मग्रहणस्य ऋणान्मुक्तो भवितु मर्हति । यथा प्रत्येकव्यक्तिः स्वकीयं नैजं वैशिष्ट्यं बिभर्ति, तथैव प्रत्येकराष्ट्रम नैजी विशेषता भवति; यथा तद्राष्ट्रम परराष्ट्रापेक्षया समुन्नतं प्रतीयते । तत्र भारतस्य वैशिष्ट्यमस्माभिर्वेदपुराणद्वारैवावगन्तुं शक्यते । अन्यराष्ट्रापेक्षया भारतस्य वैशिष्टयमत्रैवास्ते, यत्तत्राध्यात्मिके ज्ञाने, स्वधर्मपालने, परोपकारकरणे संयमे, राष्ट्रस्योद्धारे सर्वसमुन्नतौ च बलं दत्तमस्ति ।[4]

यदि वेदो भारतीयसंस्कृतेः सर्वोच्चमुद्गमं स्थानमस्ति तर्हि पुराणानि सन्ति भारतीयसंस्कृतेः शाश्वतानि स्रोतांसि । हिन्दुजातिसंस्कृतिसम्बन्धिनः कदाचिदेव केचन एवंविधाः विषयाः सम्भवेयुः येषु प्रकाशः पुराणैर्न दत्तः स्यात् । वेदानन्तरं भारतीयसंस्कृतेर्वास्तविकं स्वरूपमस्माभिः पुराणैरेवागन्तुं शक्यते । पुराणानुसारं पुराणानि हि धार्मिक-सामाजिक-सांस्कृतिक-राजनीतिक-आर्थिकादिषु क्षेत्रेषु लोकवर्गस्य विचाराणां कार्याणां च यथार्थं चित्रमुपस्थापयन्ति । पुराणानामनुशीलनेनास्माभिः स्वजीवनोद्देश्यपूर्तये आदर्शमयः सदुपदेशो लभ्यते । यतो हि

---

१. यस्य हृदयं परमे व्योमन् सत्येनावृतमनृतं पृथिव्याः । २. वायु-पुराणे ५।२३ ।
३. सा नो भूमिस्त्विषिं राष्ट्रे दधात्तमे ।
४. सर्वेऽत्र सुखिनः सन्तु सर्वे सन्तु निरामयाः ।
सर्वेभद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुराणेष्वेकत्रैवैहिकामुष्मिकहितसिद्धये उदाहरण-प्रत्युदाहरण-कथानकोपकथानकद्वारा शुभकर्मणि प्रवृत्तयेऽशुभकर्मभ्यश्च निवृत्तये सदुपदेशः दत्तोस्ति यथा—'रामादिवद् वर्तितव्यं न रावणादिवत्' इति ।

पुराणानुसारमस्माकं देशस्य नामास्ति भारतवर्षम् । तथात्र निवासिन्याः प्रजायाः नामास्ति भारती[१] । पुराणेषु भारतवर्षस्य भौगोलिको विस्तारः समुद्राद्दुत्तरे हिमालयाच्च दक्षिणे प्रोक्तोऽस्ति । यथा कन्याकुमारीतः हिमालये गङ्गायाः उद्गमस्थान पर्यन्तं विस्तृतो भूभागो भारते सम्मिलितोऽभिमतोऽस्ति[२] । निरुक्तशास्त्रदृष्ट्या वायु-मत्स्य-पुराणयोर्भारतवर्षस्य निर्वचनं कृतमस्ति यत् प्रजानां भरणपोषणकारणादेका संज्ञा भरत इत्यस्ति एतन्निरुक्तेराधारेणायं देशः भारतमित्युच्यते[३] ।

इदमस्य रहस्यम्—भरण-पोषणात्मकेन गुणेन मनुर्भरतः प्रोक्तोऽस्ति । तथा यत्र भूभागे मनुपद्धत्यनुसारं तत्सन्ततयो निवसन्ति ? तन्नाम भारतमिति जातम् । यद्वा राज्ञः ऋषभदेवतनयस्य भरतस्य नाम्नाऽयं देशो भारतमित्युच्यते 'अजनाभं नामैतद्वर्षं भारतमिति, यत आरभ्य व्यपदिशन्ति इति ।[४] अथवा-दौष्यन्तेर्भरतस्य (सर्वदमनस्य) नाम्नास्माकं देशो भारतमिति निगद्यते । तथाचोक्तं वायुपुराणे ।

चक्रवर्ती ततो जज्ञे दौष्यन्तिर्नृपसत्तमः ।
शकुन्तलायां भरतः यस्य नाम्ना तु भारतम् ॥

एवं तत्तत् पुराणेषु भारतस्य नामकरणविषये त्रीणि मतान्युपलभ्यन्ते ।

पुराणेतिहासयोर्या भारतवर्षस्य वन्दना विद्यन्ते । तासु महाभारतस्य भीष्मपर्वणि भारतवन्दना भावदृष्ट्याऽत्यन्तमुत्कृष्टास्ति[५] । तेषु पद्येषु येषां चक्रिवर्तिनां राज्ञां नामानि गणितानि सन्ति तेषां धार्मिको भावः, प्रजावात्सल्यम्, सत्यपालनम्, परोपकारजनकंजीवनम्, निर्भयं लोककल्याणकामना तैः स्थापिता, आदर्शमयी राज व्यवस्था च भारतीयगौरवस्यास्ति विषयः । ये महापुरुषाः स्वदेशस्य कालस्य च

---

१. उत्तरं यत् समुद्रस्य हिमवद्दक्षिणं च यत् ।
वर्षं तद्भारतं नाम यत्रेयं भारती प्रजा ॥ (वा० पु० ४५।७५)

२. आयतो ह्याकुमारिक्यादागङ्गाप्रभवाच्च वै ।
तिर्यगुत्तर विस्तीर्णः सहस्राणि नवैव तु ॥ (वा० पु० ४५।८१)

३. भरणाच्च प्रजानां वै मनुर्भरत उच्यते ।
निरुक्तवचनाच्चैव वर्षं तद्भारतं स्मृतम् ॥ (म० पु० ४५।७६)

४. वायु-पुराणे ९९।११३ । ४. श्रीमद्भागवते ५।७।३ ।

५. प्रियमिन्द्रस्य देवस्य मनोर्वैवस्वतस्य वा ।
पृथोऽस्तु राजन् वैन्यस्य तथेक्ष्वाकोर्महात्मनः ॥
अन्येषां च महाराज ! क्षत्रियाणां बलीयसाम् ।
सर्वेषामेव राजेन्द्र ! प्रियं भारत ! भारतम् ॥ (म० भा० भी० प० ९।५।९)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिनिधयो भवन्ति तेषामेव वृत्तान्तोपस्थानं पुराणेतिहासयोरनिवार्यं जायते। एतदनुसारमेव तेषां चरित्रचित्रणं कृतमस्ति। पुराणेषु भारतवर्षं स्वर्गादप्युत्कृष्टं वर्णितमस्ति। तत्र सिद्धान्तितं वर्तते यद् देवाः स्वर्गे गीतं गायन्ति यत्ते मानवाः सन्ति धन्यतमाः, ये भारते जन्म गृह्णन्ति। भारतवसुन्धरा हि स्वर्गादपि उत्कृष्टास्ति यतो हि तत्रत्याः जनाः स्वर्गं मोक्षं चोभयं लब्धुं शक्नुवन्ति। ये स्वर्गे सुखजातं भुक्त्वा मोक्षाय भूयो भारते जन्म गृह्णन्ति। सुरत्वं प्राप्तानस्मानपेक्ष्याधिकं सुकृतिनस्ते। अतो भारतवर्षे जन्मग्रहणं नास्ति साधारणस्य पुण्यस्य फलम्[१]।

अपि च जम्बूद्वीपे वर्तमानेभ्यो देशेभ्यो भारतवर्षं सर्वश्रेष्ठं चाभिमतम्। यतो हि अन्यानि वर्षाणि केवलं भोगस्थानानि सन्ति, किन्तु भारतवर्षं कर्मभूमिः प्रोक्ता, अन्य वर्षेभ्यो ज्येष्ठं श्रेष्ठं चाभिमत मस्ति। अत्र सत्कर्मानुष्ठानद्वारा मानवो भोगं मोक्षं चोभमयपि लब्धुं शक्नुयात् तथाहि विष्णुपुराणे[२] इदमस्य रहस्यं भारतमूरेव सदसत्कर्मानुष्ठानयोग्या भूमिः। भारतादन्या भूमयो हि सुख-दुःख-साक्षात्काररूपस्य भोगस्य स्थानानि। अत्रैवानुष्ठितेन विहितकर्मणा धर्मः, निषिद्धेन च कर्मणाऽधर्मो जायते, ताभ्यां च यथाक्रमं सुख-दुःखे तद्भोगाश्च जायन्ते, न त्वन्यत्र समनुष्ठितेन कर्मणा तथेति भावः।

यदा काचिज्जातिः परस्परं विद्वेषवशात् स्वकीयमादर्शमयं चरित्रं विस्मृत्यात्मनः स्वरूपं परित्यजति, अन्याधीना च भवति तदा विश्वस्य इतरजातयः तस्या उपेक्षणं कर्तुं प्रारभन्ते। तद्धार्मिका ग्रन्थाः पोपकल्पनाः, तत्पूर्वजा असभ्याः तद्भाषा अव्यवहार्या तद्देशस्य वेशभूषादिकं लज्जाजनकं तदाचार-विचार-व्यवहारादिकं च बालानां क्रीडनकम् इत्याद्युक्त्वा तां जातिं सर्वथाऽयोग्यामुद्घोष्टुं चेष्टन्ते। एतन्नैसर्गिकनियमानुसारं विविधा जातयोऽन्येषां कुचक्रे समागत्य स्वीकीयं स्वरूपं परिहरन्ति। तासामस्तित्वं केवलमितिहास पृष्टेष्वेवाङ्कितमवतिष्ठते। विश्वस्येतिहासोऽस्ति साक्षी यद् हिन्दुजातिर्विश्वस्मिन् सर्वतः प्राचीनतमा। अस्या पवित्रतम मुद्देश्यमस्ति स्वधर्माचरणम्, परोपकारकरणम्, स्वार्थत्यागः, ईश्वरं प्रति अनन्यप्रेमप्रतिष्ठापनम्, समस्तं विश्वं विष्णुमयं मत्वा तत्र श्रद्धाचरणं च। अतस्तत्र विश्वबन्धुत्वभावनया 'वसुधैव कुटुम्बुकम्' इति पुनीता भावना सर्वदा तिष्ठति। या हिन्दुजातिः प्रारम्भतोऽन्यासु जातिषु शासनं करोति स्म, सैव दैववशाद् अन्याधीना

---

१. गायन्ति देवाः किल गीतिकानि धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदहेतुभूते भवन्ति भूयः पुरुषाः सुरत्वात्॥ (ग० पु० २।३।२४)

२. तत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने!
यतो हि कर्मभूरेषा ततोऽन्या भोगभूमयः॥
इतः सम्प्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति वै।
त्रिर्यक्त्वं नरकं चापि यान्त्यतः पुरुषा मुने॥ (२।३।२२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूत्वा शासिता शोषिता चाभवत् । सर्वप्रथमं हिन्दुजातौ बौद्धानां शासनमजायत, ततो, यवनानामाक्रमणमभूत् । अनयोः शासनाधीनयाऽपि हिन्दुजात्या शिक्षापद्धतिः स्वाधीनैव रक्षिता । एतत्परिणामस्वरूपेण कुमारिलभट्ट-स्वामिशङ्कराचार्यसदृशा अद्भुतप्रतिमाशालिनो मनीषिणोऽस्यां जातावुत्पद्य बौद्धसाम्राज्यं समूलमुन्मूल्य बौद्धान् भारताद् बहिः कृतवन्तः ।

यवनशासनकालेऽपि शिक्षापद्धतिर्हिन्दुनामधीनैव सुरक्षिताऽवर्तत । येनानेके धर्मबीरा हिन्दवः स्वजातेः धर्मस्य च संरक्षणे कृतसङ्कल्पा आसन् । महाराणाप्रतापसिंह-छत्रपतिशिवाजी-गुरुगोविन्दसिंह-हकीकतरायप्रभृतिभिर्महापुरुषैश्छिन्ना भिन्ना वा हिन्दुजातिः प्रणाशात् संरक्षिता, राजास्थानीयाभिः पद्मिनीप्रभृतिभिः-सतीनारीभिश्च जौहरव्रतं स्वीकृत्य प्रज्वलितेऽग्नौ स्वानि शरीराणि भस्मसात्कृत्वा भारतीयकुलयोषितामादर्शभूतः पातिव्रत्यधर्मः परिरक्षितः । परिणामस्वरूपं यवन-साम्राज्यस्य सत्ता शिथिला भूत्वा जर्जरीभूता वभूव । अस्मिन्नेवावसरे योरपनिवासिन्या आङ्ग्लजाते भारतवर्षे प्रवेशोऽभवत् । शनैः शनैः शासनस्याधिकारस्तस्याः हस्तगतो जातः । तत्प्रमुखेन शासकेन लार्डमेकालेमहोदयेन यदा दृष्टं यद् भारतीयाः पाश्चात्यानुपेक्षन्ते घृणादृष्ट्या च तान् पश्यन्ति, तदा तेन शिक्षापद्धतिं स्वाधिकारे कृत्वा एवंविधानि पाठ्य-पुस्तकानि निर्मापितानि, यान्यधीत्य हिन्दुजातिः स्वं वास्तविकमितिहासं विस्मृत्यांग्लजात्या सह सम्मिलिता स्यात् । तेषु पुस्तकेषु स्थले स्थलेऽङ्कितमासीद् यदार्याः न सन्ति भारतस्यादिवासिनः, किन्तु मध्य एशियातत-त्रत्यानां दललयं प्रचलितं तत्रैकदलं यूरोपाभिसुखंः प्रस्थितम्, द्वितीयं च भारते आगत्य न्यवसत् । अतो योरपवासिनी आंग्लजातिस्तथा भारतवासिनी हिन्दुजातिश्च द्वे अपि एकस्य पितुः स्तः सन्तत्यावुभयत्र भेदभावोऽनुचितः । प्रथमं ये आर्या भारते आगतास्ते विद्याविहीना गुणहीना असभ्या आरण्यका इव महामूर्खा कृषकाश्चासन् । ते कृषिं कर्तुं जानन्तिस्म पशून् पालयन्ति स्म, गोचारणसमये यानि गीतानि गायन्ति स्म, तानि एकत्र सङ्गृह्य वेदनाम्ना व्यहर्तुं प्रारभन् ।

अतो न वेदः कस्यचन महत्त्वस्य पुस्तकमस्ति । आर्याणां संस्कृतभाषा मृत-भाषाऽस्ति, हिन्दी चाल्पसंख्यकानां भाषा वर्तते, हिन्दूनां वेशभूषादिकं घृणास्पदं तथा तेषां भोजनं बलहीनं विद्यते । एषां व्यवहारो लोकविरुद्धः, आचार-विचाराश्चासभ्यानां चिन्हानि सन्ति । अत एते सर्वथाऽव्यवहार्या असभ्याश्च सन्ति ।

एवं पाश्चात्यैरनुभवः कृतो यद् भारते वर्षे यावद् विधिवद् वेदपाठो भविष्यति तथा पुराणानां प्रवचनं प्रचलिष्यति तावद् हिन्दुधर्मस्य हिन्दजातेः तत्संस्कृतेश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न काऽपि क्षति र्भविष्यति । एनमनुभवं लक्ष्यीकृत्य तैर्लेखनी गृहीताऽनेकानि पुस्तकानि च रचितानि, येषु पुराणानामसत्यतां तत्कथासु परस्परं विरूद्धताम्, असम्भवताम्, अदूरदर्शितामश्लीलतां, मूर्खतां च साधयितुं महती कुचेष्टा कृता । तानि पुस्तकानि पठित्वाऽभिनवशिक्षितवर्गः साधारणजनता च व्यामोहिता सती पुराणान्युपेक्षितवती । एवंविधाया दूषित शिक्षापद्धतिदृष्टेः परिणामोऽभवद् यद् आंग्लशिक्षितसमुदायस्य मानसिकः स्तर एव परिवर्तितः । आंग्लशिक्षादीक्षिताः स्वान् भारतीयान् कथयितुं सङ्कोचं तथा आंग्लानामनुकरणे गौरवं चानुभवन् । एवंविधां शिक्षामनुभूय लार्डमेकाले महोदय आत्मानं कृतकृत्यं मत्वा महत्या प्रसन्नतया स्वपितुः पार्श्वे एवमाशयकमेकं पत्रं व्यलिखत्-तात ! ये हिन्दव आंग्ल-शिक्षां प्राप्नुवन्ति ते स्वधर्मान्नसहानुभूतिं कुर्वन्ति । तत्र कियन्तस्तु नास्तिका भवन्ति, केचन च खीष्टधर्मं मन्तुं प्रवर्तन्ते । अनया शिक्षया अहमेकं वर्गमेवं-विधं निर्मातु-मिच्छामि, योऽस्माकं तेषां च मध्येऽनुवादकार्यं कर्तुं शक्नुयात् । वर्गोऽयं रक्तरङ्गाभ्यां भारतीयो भविष्यति, परन्तु विचारेषु नूनमांग्लवद् भविष्यति इति ।

अनया लार्डमेकालेविषाक्तशिक्षया शिक्षितसमुदायो हिन्दुधर्म-हिन्दुसंस्कृति-हिन्दुजातीनां प्रबलशत्रुरभवत् तथा स्वमतीतं गौरवं विस्मृत्यावतारवाद-वर्णाश्रम-व्यवस्था-मूर्तिपूजा— मृतश्राद्धादीन् वैदिकपौराणिकविषयान् खण्डयितुं प्रवृत्तः । अस्या अभिनवशिक्षया भारतीयेषु विद्यार्थिषु महान् कुप्रभावो जातः । अवरङ्गजेबप्रभृति-भिर्यवनैर्यावती हानिर्नाजायत तावती हानिरनया शिक्षतहिन्दुनाम-धारिभिर्जाता ।

कस्या अपि जातेरुत्थानं पतनं च तज्जातीये साहित्येऽवलम्बितं भवति । यस्या जातेः स्वधार्मिकसाहित्यतो धृणा जायते, तस्या पतनमनिवार्यतया भवति । इयमेव दशाऽद्यत्व हिन्दुजातेरुपस्थिताऽस्ति । सम्प्रतमस्या जाते विश्वासो निज-धर्मिकाग्रन्थेभ्यो विच्छिद्यते । आंग्लानां यवनानां च स्वधार्मिकग्रन्थेषु यावान् विश्वासो वर्द्धते, तावती एव हिन्दुजातिः स्वाधार्मिकग्रन्थामध्ययनाद् विमुखा भवति । एतस्य मुख्यं कारणमस्ति धार्मिकशिक्षायाः प्रचार-प्रसारयोरभाव एव ।

यस्यां शिक्षायां धर्मस्य न भवति स्पर्शः, तया शिक्षया युवकेषु युवतीषु च सद्गुणानां प्रादुर्भावस्य स्वप्नदर्शनमुपहासास्पदातिरिक्तं किमपि न सम्भवति । सुशिक्षाद्वारैव विवेकशीलाया बुद्धेर्विकाशो भवति, ज्ञानस्य वृद्धि र्जायते कर्त्तव्य-पालनस्य रुचिरुत्पद्यते, ईश्वरीयालोकिकशक्तिषु विश्वासः सम्भवति । महत्सु सम्मानभावो जागर्ति, सद्गुणार्जने उत्साहो वर्द्धते, स्वधर्मपालने प्रवृत्तिर्भवति, मानवः सत्कर्मसु सदा प्रवर्तते तथा दुष्कर्मणो निवर्तते स्वदेशगौरवरक्षणे च मनो लगति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विश्वस्मिन् प्रत्येकदेशस्य कृते स्वसाहित्यस्यावश्यकता भवति, यतो हि साहित्य-मेंव सभ्यता-संस्कृत्योः परिचायकं भवति। यस्य देशस्य सभ्यतासंस्कृत्यौ यावत्यौ समुन्नतिशिखरारुढे भवतः, तस्य साहित्यं तावदेव समुन्नतिशीलं भवति। हिन्दूनां संस्कृतसाहित्येन समं समृद्धं विकासशीलं च साहित्यं नास्ति विश्वस्य कस्या अपि जातेः सविधे। यदि भाषा-भाव-दर्शन-अचार-विचार-रीति-नीति-शिल्प-कला-पुरात-विविधज्ञान-विज्ञानदीनि एकत्र द्रष्टुं समीहा स्यात्तर्हि संस्कृतसाहित्यस्य वेदस्मृतिपुराणानि द्रष्टव्यानि, यतो हि सन्त्येतानि एषामागाररूपाणि। समेषु तेषु चतुर्णां वर्णानामाश्रमाणाञ्च रीति-नीति-अचार-विचारादोनां विस्तृतस्तर्कपूर्णश्चो-ल्लेखो विद्यते। पुराणद्वारा प्राचीनेतिवृत्त-सृष्टि-प्रलय-वंश—वंशावली-युग-मन्वन्तर-कल्पादीनां सम्यग् ज्ञानमुपजायते : तथा पुराणानामाख्यानोपाख्यानगाथाभि र्वेदानां वास्तविकोऽर्थोऽवगन्तुं शक्यते। पुराणैः स्वपूर्वजानां निर्मलो विचारो ज्ञायते, तथा पुराणानामनुशीलनेनैव विभिन्नजातीनामुत्पत्तिः समस्तस्य विश्वस्य विभिन्नभागानां भिन्ना भिन्ना नियमाश्च ज्ञायन्ते।

पुराणज्ञानं विना संसारोऽन्धकारमयो भवति। उपासनाया भाण्डारम्, मुक्ते-र्द्वारम्, ज्ञानस्याकरः, भक्तेःसाधनम्, कर्मणां, प्रदीपश्च पुराणमेवास्ति। भगवदवतार-वैशिष्ट्यं वर्णयन्त्यः पुराणानां गाथा जीवमीश्वरशरणे समुपस्थापयितुमत्यन्तमुपयो-गिन्य सन्ति। किमधिकं वक्तव्यम्, ये ये विषया स्तत्रान्वेष्टुमिष्टाः स्युस्ते सर्वेऽपि प्राप्तुं शक्यन्ते। महाभारतसम्बन्धे भगवता व्यासेन तु स्पष्टमुद्घोषितमस्ति यद् ये हि विषया महाभारते वर्णिताः सन्ति, त एव सर्वत्र विवेचिता विद्यन्ते, यश्चात्र विषयो न विवेचितोऽस्ति, स कुत्राप्यन्यत्र न दृश्यते[१]। तदनुसारं तत्र राजवंशानां गणतांत्रिक-प्रणालीतः संवैधानिक-सुव्यवस्थितसमुदारकल्याणकारि शासनव्यवस्थायाः सङ्केतोऽपि मिलति।

ईशापूर्वषष्ठशताब्दीतः प्रागपि भारते भव्या राजनीतिकविचारधारा प्राप्यते। बुद्धसमये गणतांत्रिकसाम्राज्यवादिन्यौ राजनीतिकप्रवृत्तिसमानान्तरे प्रचलिते आस्ताम्। राजसंस्थायाः सम्बन्धे महाभारतस्य शान्तिपर्वणि प्रोक्तमस्ति यत् समस्तस्य जीवलोकस्याधारो राजधर्मोऽस्ति, यतो योगक्षेम-सुवृष्टि-आधिव्याधि-मरण भयानि राजन्येवावलम्बितानि भवन्ति।[२]

---

१. धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ !
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥ (म० भा० स्व० प० ५।५०)

२. राजमूला महाभाग ! योगक्षेमसुवृष्टयः।
प्रजासुव्याधयश्चैव मरणं च भयानि च॥ (म० भा राजधर्म।१५।२७)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रैव पुनरुद्योगपर्वणि शान्तिप्रयासाय दूतभूतश्री-कृष्णद्वारा धर्मराजं युधिष्ठिरं उपदिशन्त्या देव्या कुन्त्या वचनं यथा-वत्स। कालो राज्ञः कारणं भवति, आहोस्वित् राजा कालस्य कारणं जायते; इत्यत्र त्वया सन्देहो न विधेयः। वस्तुतो राजैव कालस्य कारणस्ति[1] राजा हि सत्ययुग-त्रेता-द्वापर-कलियुगानां स्रष्टास्ति। तस्माद् सत्कर्मद्वारा त्वया सत्ययुगमुपस्थाय स्वर्गप्राप्तिर्विधेयेति मम निश्चिता मतिरस्ति। तदनुसारमेव स्वकीयं कर्तव्यं कृत्वा ते धर्मिष्ठाः पाण्डवा निजमनोरथानुकूलं स्वं प्राज्यं राज्यं प्राप्तवन्तः।

महान्तोऽपि वैज्ञानिका भूगर्भविशारदा विद्वांसः परिश्रमेण असंख्यद्रव्यराशिं व्ययीकृत्वाऽपि यदन्वेषणं कर्त्तुं न पारयन्ति तानि पुराणानि अनायासेनोपदिशन्ति। पुराणानां विभिन्नेषु प्रसङ्गेषु यानि तीर्थ-पीठ-क्षेत्र-नद-नदी-सरोवराणां विवरणानि प्रदत्तानि सन्ति तैरनुसन्धानकर्त्तॄणां महत् साहाय्यमवाप्यते।

न केवल कविकुलकलाधार कालिदास-भास-माघ-भारवि-भवभूति-श्रीहर्षप्रभृति-भिभारतीयैरमरमहाकविभिरेव विभिन्नानि पुराणानि स्वस्वमहाकव्याधारीकृतानि, प्रत्युत टालस्टाय-होमर-मिल्टन-शेक्यसपीयर-प्रभृतीनां पाश्चात्यलेखकानां ग्रन्थावलोकनेन स्पाष्टं प्रतीयते यत्तैरपि यत्र तत्र पौराणिकैरव्यानकैः स्वग्रन्थानां सज्जीकरणे न सङ्कोचः कृतोऽस्ति। एवं निःशंसपं वक्तुं शक्यते यद् विश्ववाङ्मये पुराणानामप्रतिमं स्थानमस्ति कालक्रमेणाद्यत्वे संस्कृतवाङ्मयस्य पठनपाठनयोर्ह्रासात् पुराणानुशीलनश्रवणमननप्रचारप्रसाराणामुत्तरोत्तरं ह्रासो जायते।

यत्र 'विद्यावतां भागवते' परीक्षा इत्यनुसारं पुराणं विद्वत्ताया निकषा अभिमताऽऽसीत् तत्र तदेव संस्कृतज्ञानशून्यानामल्पज्ञानामुपहासपात्रं जायते। अद्यत्वे विविधाभिःकुतर्कपूर्णाभिर्व्यर्थशङ्काभिः पुराणानि व्यर्थीक्रियन्ते। परं पुराणं हि एका विशशिष्टा विद्या वर्तते। पुराणविद्या हि गुरमन्तरा नावगन्तुं शक्या। सद्गुरुद्वारा एषां शङ्कायाः समाधानं कर्तुंशक्यते। तथा तेषां वास्तविकोऽर्थस्तद्रहस्यं चावगन्तुं-शक्यते, नान्यथा।

संस्कृतवाङ्मये पुराणानामेकं विशिष्टं स्थानमस्ति तथा तेषां महन्महत्त्वमपि विद्यते। सर्वसाधारणजनेषु सभ्यतासंस्कृत्योः प्रचारः प्रसारश्च पुराणानां प्रधानं कार्यमस्ति। पश्चात्या इतिहासवेत्तारोऽपि पुराणानि भारतीयानाममूल्यं निधिं मन्यते। यद्यपि भारतीयसाहित्ये पुराणैः सहेतिहासस्यापि नाम समागच्छति तथा

---

१. कालो वा कारणं राज्ञः राजा वा कालकारणम्।
इति ते संशयो माभूद्राजा कालस्य कारणम्॥ (३२।१७)
एवं युधिष्ठिरो वाच्य एवं वाच्यो वृकोदरः।
यदर्थं क्षत्रियाः सूते तस्य कालोऽयमागतः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पीतिहासे तासामेव घटनानां वर्णनं विद्यते, या भूतकाले व्यतीता, किन्तु पुराणानि भविष्यद् घटनानामपि सङ्केतं कुर्वन्ति । अतः पुराणानां विषय इतिहासादप्यधिको व्यापको विस्तृतश्च च विद्यते । वास्तविक इतिहासो न काव्यकल्पनां कामयते, न वा स धर्मशास्त्रवदादर्शोन्मुखो भवति, किन्तु यथार्थं चित्रमुपस्थापयति । कस्या अपि मानवजातेरितिहासस्तदैव पूर्णो भवितुमर्हति यदा तस्य कथानकं सृष्टेरारम्भतः क्रमवद्धरूपेण लिखितं स्यात्, सर्वथा इदं हि रूपं पुराणेषु पूर्णतया प्राप्यते । आधुनिकैरितिहासकारैरस्या शैल्या उपपेक्षा कृता, परन्तु इङ्गलैण्डस्य प्रसिद्धेन विचारकेन विदुषा एच० जी० विल्सनेन स्वकीयायामितिहासस्य रूपरेखायां पौरणिकप्रणल्या एवानुकरणां कृतमस्ति । तेन तत्र मानव समाजस्येहातिसलेखनात् पूर्वं सृष्टिप्रारम्भतः मनुष्यविकासस्येतिहासोऽपि लिखितः । मानवजन्मग्रहणात् पूर्वं जीवः किं किं रूपं धत्ते तथा तस्य क्रमिको विकासः कथं जायते इत्यादेरपि मनोरमं विवेचनं कृतमस्ति ।

प्राचीनं भारतस्यैतिह्यं पुराणेष्वेव निहितं सुरक्षितं चास्ते सौभाग्येनास्माकमधुनातना अपि केचनैतिह्यविदो भारतस्येतिहासनिर्माणे साम्प्रातं पाश्चात्यानां मुखापेक्षितां विहाय पुराणनां साहाय्यं गृहणन्ति । पुराणेषु विविधानां वृत्तानां साकल्येनैकत्र समवायात् 'श्रुतिस्मृती उभे नेत्रे पुराणं हृदयं स्मृतम्, इत्यनुसारं पुराणं हृदयं निगद्यते । एवं नेत्रं विना मानवो जीवितुं शक्नोति, परं हृदयं विना न कोऽपि जीवितुं पारयति । अतः 'आत्मा पुराणं वेदानाम्, इति स्कन्दपुराणीयं वचनं सङ्गच्छते । हिन्दुशास्त्रेषु वस्तुकथनस्य त्रयः प्रकारा उक्ताः सन्ति—

१—तथ्यकथनम्, २—रूपकथनम्, ३—अतिशयोक्तिथनं च ।

तत्र यद् वस्तु यादृशं स्यात्तस्य तादृगेव वर्णनं तथ्यकथनमस्ति प्रकारोऽयं वैज्ञानिकानां कृते उपयोगी वर्तते । यत्र रूपकालङ्कारमाश्रित्य किञ्चिदुच्यते तद्रूपकथनम् । प्रणालीयं प्रायो वेदेषु विद्यते-यथा सूर्यकिरणेषूपलभ्यमानानि ससरङ्गानि अनुक्त्वाश्वानां रूपकं प्रदत्तमस्ति । पुराणेषु वस्तुवर्णनार्थमतिशयोक्त्यलङ्कारस्याश्रयो गृहीतोऽस्ति । यथा इन्द्रवृत्रासुरयुद्धे इन्द्रवृत्रासुरो राज रूपेणाङ्कितो स्तः । एवं वर्षावर्णनं त्रिषु साहित्येषु विशेषदृष्ट्या कृतमस्ति । ज्योतिषज्ञानं हि कस्मिन् नक्षत्रे कीदृग् वायुर्वहति कथं मेघ उत्पद्यते कियती वृष्टिर्भविष्यति, बृष्टेरवरोधकः कोऽस्ति, कथं च भवति तस्य विनाश इति तथ्येन विचारयति । वेदो वृत्रं वृष्टिनिरोधकं तत्त्वमिद्रं च बृष्टिकारकं मन्वाऽनयोः तत्त्वयोरुत्पन्नं सङ्घर्षमिन्द्रबृत्तयुद्धद्वारा निरूपयति । पुराणसाहित्यं चातिशायोक्त्या इन्द्रदेवानां राजानं वृत्रं चासुराणाधिपमुक्त्वा देवासुरसंग्रामो वर्णितः अतः पौराणिककथानां सम्बन्धे तदीयप्रणाल्यां ध्यानं दत्वैब तदध्ययनं बिधेयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानवानां कल्याणर्थं स्वयं नारायणेन व्यासात्मना पृथिव्यामवतीर्य पुराणानि विरचितानि वेदविज्ञानस्य मनोरञ्जकोपाख्यानरूपेणोपस्थापनं पुराणानामस्ति अद्भुता विशेषता। पुराणानां पवित्रे प्राङ्गणे एकतो भक्तेर्भागीरथी प्रवहति, तर्हि अपरत्र विज्ञानस्य स्रोतो निःसरद् दृश्यते। वेदेषु यस्य सूचनामात्रमस्ति पुराणेषूपाख्यानादिद्वारा तस्यैव विस्तारोऽस्ति। वेदेषु यासामाभासमात्रमस्ति पुराणेषु ता एव कथा मनोरञ्जकरूपेण विस्तृता सती सत्यं एकं नवीनं रूपं धृतवत्यः यथा "विष्णुर्विचक्रमे त्रेधानिदधे पदम्" इतीदमृग्वेदीयं वामनोपाख्यानं वामनादिपुराणेषु क्रमनामकस्य वामनावतारस्य प्रसङ्गे विस्तृतरूपेण वर्णितमस्ति।

वास्तुस्तु पुराणं विना वेदार्थोपवृंहणमेव न सम्भवति, यतो हि वेदेषु निर्दिष्टानमाख्यानानां व्याख्या पुराणेष्वेवोपलभ्यते। यथा 'अहल्यायै जारः' इत्यस्य वेदप्रतीकस्य तात्पर्यं पुराणान्तर्गतामिन्द्रकृतं अहल्याधर्षणं विना न स्फुटतां प्रयाति। अत एव वाल्मीकि रामायणेऽग्निप्रभृतीन् देवान् प्रति स्वयमिन्द्रेणाभिहितम्-

कुर्वता तपसो विघ्नं गौतमस्य महात्मनः।
क्रोधमुत्पाद्य तु मया सुरकार्यमिदं कृतम्॥

वेदा न सन्ति उपाख्यानमूलका ग्रन्थाः। तत्र तु स्थलविशेषे उदाहरणोपाख्यानानि वर्णितानि सन्ति, परं पुराणेषूपाख्यानानामेकत्र समावेशोऽस्ति। अतः तत्रोपाख्यानबाहुल्यं विस्तारश्च परीदृश्यते। कस्याप्युपाख्यानस्य विस्तरतो वर्णनं वेदस्य नोद्देश्यम्, किन्तु तत्रत्यात्यन्तसंक्षिप्ताःकेनचिद् विशेषोद्देश्येन वर्णिता याः कथाः सन्ति ता एव पुराणेष्वाख्यायिकारूपं धृतवत्यः। यतो हि साधारणेषु मनुष्येषु कौतूहलपूर्वकं भगवद्भक्त्युत्पादनमाख्यानानामस्ति मुख्यमुद्देश्यम्। वेदपुराणयोरिदमेवास्ति विशेषतोऽन्तरं यद् वेदस्यातिसंक्षिप्ताः प्रसङ्गाः पुराणेषु स्वतन्त्रतया समुपबृंहिताः सन्ति। अत एव वेदवत् पुराणानामपि प्रामाण्यमभिमतमस्ति। तथा तानि असामान्यदृष्ट्या दृश्यन्ते श्रूयन्ते च। एतदतिरिक्तंस्य वेदानुकूलस्य ज्ञानस्य कर्मण उपासनायाश्च विवेचन मपि पुराणेषु स्पष्टतयोपलभ्यते, येन समेषां भवति महानुपकारः, तथा तैः पुराणैर्धर्मसम्बन्धिनो विविधा उपदेशा अपि प्राप्यन्ते।

अत्र नास्ति कश्चन सन्देहलेशो यद् भूयो भूय आक्रमणेन राज्यविप्लवैः, अनेकविधपरिवर्तनेन च पुराणानां वास्तविकस्थितावद्यत्वे महदन्तरमुपस्थितमस्ति, न कियन्त्यपि पुराणानि पूर्णानि मिलन्ति। कतिपयानि स्वसंख्ययाऽधिकानि रूपाणि अधारयन्, प्रक्षिप्तैरंशैः कियतां कलेवरमपि परिवर्तितम्। एकस्य पुराणस्य विषयाः क्वचनान्यपुराणेषु प्रविष्टाः। विदुषामनुमानस्ति यत् सम्प्रदायवादिनां पारस्परिकेन सङ्घर्षेण स्वसम्प्रदायेतरान् हीनतरान् बोधयितुं पश्चाद् यत्र कुत्रचित् पुराणेषु प्रक्षिप्ता अंशा मेलिताः सन्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्तु यदि केनचित् कारणेन पुराणेषु कुत्रचित् प्रक्षिप्ता अंशाः समागतास्तर्हि पुराणमात्रमप्रामाणिकं मन्तुं न युक्तमस्ति। यदि बहुमूल्येषु रत्नेषु कश्चन काचं मेलयेत्तर्हि किं तानि हेयानि जायन्ते ! न हि, कथमपि न सम्भवति रत्नानां हेयता, किन्तु नीरक्षीरविवेकिनो हंसा इव विचारशीला विद्वांसः सदसती विचार्य हेयस्यांशस्य त्यागः, उपोदयस्यांशस्य च ग्रहणमेव बुद्धिमत्तां मन्यन्ते। यदि विवेकपूर्वकं मनोयोगेन पुराणानि पठ्येरन्, तर्हि प्रक्षिप्ता अंशा अवश्यं परिज्ञातुं शक्यन्ते। यत्र कुत्रापि भस्म-रुद्राक्ष-तिलक-तुलसीमालादीनां निन्दा तथा देवतानां परस्परं विरोधमूलकानि वचनानि स्युस्तर्हि तानि सम्प्रदायवादिनां दुराग्रहिणां कुपुरुषाणां बुद्धेः परिणामस्वरूपाणि ज्ञेयानि। एतादृशा अंशा समन्वयवादिनो महर्षेर्व्यासस्य लेखनीतो न प्रसूता भवितुमर्हन्ति। तेऽशास्तु सम्प्रदायवादस्य तरङ्गैः समुद्गता अवगन्तव्याः। भगवान् व्यासदेवस्तु समेषामैक्यप्रतिपादयिताऽस्ति। पुराणेषु विभिन्ना भक्ता भिन्न-भिन्न-देवतानामुपासका दृश्यन्ते,। यतो हि हिन्दुशास्त्राणां विभिन्ना देवताया परब्रह्मणो रूपान्तराणि सन्ति। येषां केषामप्युपासनया स्वेष्टसिद्धिर्भवति। एवं गीतायामपि भगवता श्रीकृष्णेन स्पष्टमुद्घोषितमस्ति[1]। प्रायो लोके दृश्यते यद् यो मनुष्यो येन साकं प्रेम प्रकुरुते स वाञ्छति यद् मत्समः सर्वेऽपि अनेन सह प्रेम कुर्वन्तु नाम। एवं यो ऋषिर्यस्या देवतायय आराधनेनात्मनोऽभीष्टसिद्धिं कामयन्ते तेन तस्या देवताया विशिष्टा भक्तिः कृता। तदनुगामिना शिष्यवर्गेनापि तस्या एव देवताया उपसनाप्रचारो विहितः। तदनुसारमेव तद्देवतोपासनाया फलप्रतिपादकानामुपाख्यानानामेकंस्मिन्नेव पुराणे सङ्कलनं कर्तुं चेष्टाऽजायत। एवं यो मानवो यस्या देवतायाः भक्तोऽस्ति, स स्वेष्टदेवतामाहात्म्यप्रकाशकमेव पुराणमाद्रियते। एतेनैव कारणेन प्राचीनान्युपाख्यानानि नैकरूपाणि प्राप्यन्ते।

वेदमन्त्रेषु देवतानां स्तुतिमात्रं विद्यते। ब्राह्मणग्रन्थेषु यज्ञादीनां प्रसङ्गे यत्र तत्र कथानामपि संक्षेपत उल्लेखो विद्यते, किन्तु विस्तरतः एकत्र कथाख्यानोपाख्यानानां सङ्ग्रह आवश्यक आसीत्। एतत्पूर्तये एव महर्षिणा व्यासेन पुराणानि प्रणीतानि। संस्कृतवाङ्मय-सिद्धान्तानुसारं मानवजीवनस्यास्ति प्रधानं लक्ष्यमाध्यात्मिकजीवनसमुन्नतिद्वारामोक्षप्राप्तिरेव। ज्ञान-कर्मोपासनामाध्यमेन मानवमात्रस्य सुमार्गे नयनपूर्वकं मोक्षाधिकारित्वसम्पादनं पुराणानां रचनायाः मुख्यमुद्देश्यमस्ति। विभिन्नेषु पुराणेषु भिन्न-भिन्न-कल्पानां कथाः सन्ति। पौराणिक

---

१. यो यो यां यां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति।
तस्य तस्या-चलां श्रद्धां तामेव विदधाम्यहम्॥ (गीता० ७।२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथासु कुत्रचिदस्ति साम्यम्, क्वचन च वैषम्यमपि। तत्परिहारे विद्वांसः कल्पभेदमेवाश्रयन्ति[१]।

पुराण-रामायण-महाभारत-तन्त्रशास्त्राणि विश्वकोशकार्यं कुर्वन्ति। अद्यत्वेऽस्माकमुत्तरोत्तरावनतेः कारणं सुशिक्षायां अभवोऽस्ति। शिक्षाया उद्देश्यं न केवलमुदरपुर्तिमेव मन्यते भारतीयाः। अतोऽस्माकं धार्मिक-आर्थिक-सामाजिक-नैतिक-शारीरिक-मानसिक-वाचनिकाध्यात्मिको ह्रासः शनैः शनैर्वर्द्धते। कस्यापि देशस्य धर्मस्य जातेश्चोन्नतिमूलकारणं तत्रत्या शिक्षैवास्ते। अतः आलोचकानां मतमस्ति यत् कस्यापि देशस्य जातेश्च धार्मिक-सामाजिक-आर्थिक-समुन्नतिं द्रष्टुमिष्टास्यात्तर्हि तदीयशिक्षाप्रणाल्याः निरीक्षणं कर्तव्यम्। बालका एव देशस्य धर्मस्य जातेश्च सन्ति विभूतयः। तेषां यादृशं चरित्रं संचितं भविष्यति। तादृशमेव देशस्य धर्मस्य जातेश्च भविष्यमपि संञ्चितं भविष्यति। अतो बालकानां चरित्रसञ्चये विशेषतो ध्यानं प्रदाय तेभ्यो धार्मिकशिक्षाप्रदानस्य महत्यावश्यकतास्ति।

यवन-ख्रीष्टीयबालकानां कृते तु तत्संस्थास्थापितेषु शिक्षालयेषु प्रवर्तते तदीय धार्मिक-शिक्षा-प्रदानस्य व्यवस्था, किन्तु हिन्दुबालकानां कृते धर्मनिरपेक्ष-सर्वकारद्वारा सञ्चालितेषु शिक्षालयेषु धार्मिकशिक्षाप्रदानस्य वार्तं तु दूरे तिष्ठतु। धार्मिकग्रन्थानां नामापि न बालकैर्ज्ञायते। परिणामेऽस्माकं बालका ध्रुव-प्रह्लाद-लव-कुश-भरत-अभिमन्यु-प्रभृतीनां वीरबालानां स्वप्नमपि न पश्यन्ति। इदं हिन्दुजातेर्ह्रासस्य न कारणं तर्हि किमन्यत् सम्भवेत्।

भारतीयशिक्षाया उद्देश्यं न केवलं धनोपार्जनमात्रमेवास्ति, प्रत्युत धर्मार्थकामानां समानतया सेवनमनिवार्यं विद्यते। अर्थात् त्रयाणां धर्मार्थकामानां समानरूपेण समादरो विधेयः। यो हि त्रिष्वेतेषु कस्मिंश्चिदेकस्मिन् व्यासज्जते स निकृष्टकोटिकः पुरुषः निगद्यते। यो द्वयोर्निरतो भवति सोऽस्ति मध्यमकोटिकः नरः। यश्च त्रिषु समानरूपेण प्रवर्तते स उत्तमकोटिको मानवो गण्यते[२]।

एवं भारतीया धर्मदर्शनाभ्यां सदैव जीवनस्य भौतिकेष्वङ्गेष्वपि पर्याप्तां रुचि दधते स्म। तेषां पुरुषार्थेषु धर्ममोक्षातिरिक्तावर्थकामावप्यास्ताम्, याभ्यां जीवनस्य प्रवृत्तिमार्गे उचितं स्थानं प्राप्तमासीत्। या हि धर्मप्राणा हिन्दुजातिरन्यजातिषु शिरोमणिः मानवमणिः आदि गुरुः, शिक्षिका, पथप्रदर्शिका, चासीत्, अद्यत्वे तस्या एव बालका धर्महीना अन्यानुकरणकुशला विस्मृतपूर्वजपुरुषार्था उच्छृङ्खला-

---

१. क्वचित् क्वचित् पुराणेषु विरोधो यदि दृश्यते।
कल्पभेदादिभिस्तत्र व्यवस्था सद्भिरिष्यते॥

२. धर्मार्थकामाः सममेव सेव्या यो ह्येक सेव्यः स नरो जघन्यः।
द्वयोस्तु दाक्ष्यं प्रवदन्ति मध्यं, स उत्तमो यो निरतस्त्रिवर्गे॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चाराश्च भवन्ति निरन्तरमित्यहो दौः भाग्यम् भारतस्य । यदि हिन्दुभिर्निजबालकेभ्यः पूर्ववर्तिनां स्वनिर्भीकवीरबालकानां कथानकमुपदिष्टं स्यात्तर्हि तेषां नैवं दशा सम्भवेत् ।

अद्यत्वे धार्मिकशिक्षाया अभावस्य परिणामो जायते, यदाधुनिकानां बालकानां हृदयपटलेषु हिन्दुसंस्कृते रुपरेखा न विकसिता भवति, येन ते स्वपूर्वजानां गौरवमनुकरणायमादर्मं च सर्वथा विस्मृत्यानेकानर्थकरणे प्रवृत्ता भवन्ति, प्राचीनस्य भारतस्य नेषदपि अभिमानं तेषु भवति । न ते जानन्ति यदस्माकं धर्मसाहित्यपूर्वपुरूषाणां वास्तविकं स्वरूपं कीदृग् आसीत् किञ्चास्ति कर्तव्यमस्माकम् ।

तात्पर्यमिदमस्ति यद् बाल्यावस्थायां धार्मिकशिक्षाया अभावादद्यतनीया अस्माकं बालका हिन्दुधर्म-साहित्य सभ्यता-संस्कृतिसामाजिक विषयाणां किमपि न जानन्ति किन्तु पाश्चात्यधर्म-रीति-नीति व्यवहारादि विषयेऽत्यधिका प्रवीणा जयन्के । यस्य परिणामेऽस्माकं वैदिकधर्मसदाचारः भारतीय रीति नीति व्यवहारादयो-बालकानां हृदयेभ्यः उत्तरोत्तरं निःसरन्ति । प्रविशन्ति च वैदेशिका आचार विचार व्यवहारादयः । अद्यत्वेस्माकं बालका स्वकीयस्वरूप भाषा-भावादिग्रहणे सङ्कुचन्ति, किन्तु विदेशीय भावना-भाषा-आचार-विचार व्यवहारादीना मनुकरणे स्वकीयं गौरवमनुभवन्ति । यत्रास्माकं शिक्षाया आदर्श 'महाजनो येन गतः स पन्थाः, इत्यासीत् तत्राद्यतनीया बालकाः स्वपूर्वजान् आरण्यकानसभ्यान् सङ्कीर्णविचाराननुदर्शं च मन्यन्ते ।

इतिहासनाम्नाऽस्माकं बालका यत् शिक्ष्यन्ते किं तदेवास्ति वास्तविक इतिहासः ? अद्यतनीये इतिहासे बालकाः शिक्ष्यन्ते यद् हिन्दुसभ्यता साहित्य चार्वाजीनेस्तः । हिन्दुपूर्वजाः मध्येशियातो भारतमाक्रम्यात्रत्यानामानिवासिनामादिनिवासिनामार्याणां सर्वस्वं लुण्ठितवन्तस्तथा तांश्चदूरे दक्षिणेडपसारयम् हिन्दवो भारतस्यादिनिवासिनः न सन्ति किन्तु तेऽपि आंग्लजातिवद् ब्राह्मप्रदेशादागताः । किं सर्वविजज्ञानभाण्डाराणां भारतीयेतिहासस्त्रोतसां वेदानां पुराणानामस्मत्पूर्वजानां च विषये निर्मूलभ्रमोत्पादकचर्चैवास्तीतिहारुः ? नहि कदापि नैतत् सम्भवति । कथनस्येदमस्ति तात्पर्य यद् या जातिः स्वान् धर्मग्रन्थान् आत्मनः पूर्वजांश्च विस्मरति । तान् प्रतिदोषदृष्टि वा कुम्भते वानस्थायिनीं कर्सुं प्रभवति । अद्यतनशिक्षायाः प्रभावेण भारतीयानामियमेवास्ति दशा । पाश्चात्यंन विचारकेण विदुषां मैक्समूलरेण सत्यमुक्तमति 'या जातिः स्वकीयेन प्राचीनेन-गौरवेण-इतिहासेनसाहित्येन चा नात्मानं गौरवान्वितं मनुते सा स्वजातीया जीवनस्य प्रधानमाश्रयं समुन्मूलयति ।

वस्तुतोऽद्यत्वे शिक्षपद्धतावनेके दोषाः समागताः सन्ति—अनुशासनहीनता दैनन्दिनं बर्द्धतेऽगुरुशिष्य सद्भावो विलयं गच्छति, कक्षा बहिस्वारोऽहरहः क्रियते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रधानाचार्यस्य कुलपतेर्वाऽपमानकरणे सङ्कोचो न क्रियते। परीक्षायां प्रश्न-पत्रस्य काठिन्ये केन्द्राध्यक्षस्य दुर्दशा भवति। कार्यालयस्य त्रोटनं, वस्तुभेदनं च विधीयते, यत्र तत्र बहुविध उपद्रवो जायते।

वस्तुतो यस्यां शिक्षायां धर्मस्य स्पर्शो न दरीदृश्यते। तद्द्वारा युवकेषु युवतीषु च सद्गुणानां प्रादुर्भावस्य स्वप्नदर्शनमुपहासास्पदातिरिक्तं किमपि न सम्भवति। सुशिक्षया च विवेकशीलाया बुद्धेर्विकाशो जायते ज्ञानवृद्धिर्भवति, कर्तव्यपालने रुचिरुदेति, ईश्वरस्यालौकिकशक्तिषु श्रद्धा विश्वासो वा समुदेति, महतां सम्मानभावो जगृतो जायते तथा मनुष्यः सत्कर्मसु सदा प्रवर्तते, दुष्कर्म्मभ्यो निवृत्तये च चेष्टां कुरुते।

अतः पुराणानां सत् शिक्षाऽवश्यं प्रदेया, यत्र हि धर्म-दर्शन-आचार-विचार-सद्व्यवहार-रीति-नीति-पुरावृत्तादिविविधज्ञानविज्ञानादयो निहिताः स्युः। पुराणेषु चतुर्णां वर्णानामाश्रमाणां च आचार-विचार-व्यवहाराणां विस्तृतः उल्लेखो वरीवर्ति। पुराणद्वारा प्राचीनभारतस्येतिवृत्त-धर्म-कर्मादीनं प्रचुरं ज्ञानं जायते। पुराणोपाख्यानैरिव वेदस्य वास्तविकं रहस्यं स्फोरितमस्ति।

अत एव भगवता वेदव्यासेन महाभारते लिखितमस्ति—

इतिहासपुराणाभ्यां वेदार्थमुपबृंहयेत्।

पुराणद्वारा हि निजपूर्वजानां निर्मलस्य ज्ञानस्य वृत्तमुपगम्यते। अतो पुराण-साहित्यं भारतीयानां परमं धनं वर्तते। एषां ज्ञानं विना संसारोऽन्धकारमयः एवास्ते। अतः पुराणं भक्तेरागारः, ज्ञानभण्डारं मुक्तेर्द्वारं, कर्मणश्च प्रदीपप्रज्वालकं चास्ति। वस्तुतो भारतीयसंस्कृतेः रूपरेखा पुराणेष्वेव सुरक्षिता वर्तते। पुराणेषु कर्म-भक्ति-ज्ञानोपासनादिद्वारा मानवजन्मनः प्रधानलक्ष्यभूताया भगवत्प्राप्तेः साधनं सदाचारः सृष्टेरादिकालतः पूर्वजानां विवरणं लोककल्याणनिरतानां मुनीनामृषीणाञ्च पवित्रतमाचरणं तथादर्शभूतानामुदारहृदयानां महापुरुषाणा-मुज्वलं चरित्रं चित्रितमस्ति। यदाधारेण सर्वोऽपि जनो नैजं जीवनं समुन्नति-शीलं विधातुं शक्नोति।

एवं भारतीयजीवनस्य प्रतिविम्बदर्शनात् पुराणेषु देशस्यास्य साहित्य-संस्कृत्योर्वास्तविकं स्वरूपमुपलभ्यते। पुराणानां समस्तं वृत्तान्तं भारतीयसंस्कृतेः प्रातिनिधित्वं करोति। व्यवहारिकजीवनेन सह सम्बद्धाया भारतीयसंस्कृतेर-विकृत रूपोपस्थापनं पुराणानां परमं वैशिष्ट्यं वर्तते।

पुराणेषु मानवीयजीवनस्य प्रतिबिम्बदर्शनं तथा राष्ट्रियसमुन्नतेरुदन्त उत्साहो निहितोऽस्ति। दैशिक-राष्ट्रिय-सामाजिक-सांस्कृतिक चेतनायाः समाजहितभावनया मनोरञ्जकरुच्या च प्रेरितो भगवान् वेदव्यासः पुराणानां प्रणयनं विधायास्माक-मैहिक्याः पारलौकिक्याश्च समुन्नतेः साधनं सुगमं कृतवान्। पुराणानुसारं जीवन-निर्वाहार्थं हिन्दुसमाजः सदा जागरूकः तिष्ठति। पुराणसाहित्यं भारतीयसामाजिक-

२ क० भू०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जीवनस्यास्ति स्वच्छं दर्पणम् । सरल-सुबोध-प्रबुद्ध-प्राञ्जल शैली द्वारा अतिप्राचीनं सदपि पुराणसाहित्यं नित्यनवीनतायाः स्फूर्तेरुत्पादने महदुपकारि साहित्यं वर्तते । स्वकीयैः विशुद्धैः सदुपदेशैः समाजं शुद्धं विधाय सत्यं शिवं सुन्दरमादर्शमुपस्थापयति पुराणसाहित्यमिति निश्चप्रचम् ।

अत एव वेदानां मर्मं विज्ञातुं पुराणानामनुशीलनेऽस्माकं पूर्वजैर्महद्बलं प्रदत्तं वर्तते । यावत् पुराणानामध्यनं न क्रियते तावद् भारतीयमध्ययनं न्यूनतापूर्णमेवावतिष्ठते ।

पुराणवाङ्मये देवी-देवतानां नानाविधा गाथा गीयन्ते । ऋषि-मुनि-देवर्षि-महर्षीणां चारु चरित्रं चर्चितमस्ति, पातिव्रत्यपरायणानां सतीनारीणामादर्शजनकं विचित्रमुपाख्यानकमस्ति, पुण्यश्लोकानां लोकोत्तरचरित्राणां महापुरुषाणां जीवन-चरितं च गुम्फितमस्ति । तत्र क्रमबद्धप्राचीनेतिहास-काव्य-राजनीति-समाजनीति-आध्यात्मज्ञानं, व्यवहारज्ञानं, सामाजिकार्थिक-धार्मिकादिव्यवस्था, सर्वविधविद्या विद्यन्ते । पुराणसाहित्यमेतादृक् परिपूर्णं वाङ्मयमास्ते येन सामान्यवर्गप्राणिन आरभ्य परमोच्चतमान् आदर्शमहापुरुषान् यावत् सर्वेषां यथाधिकारं वास्तविको लाभो भवितुमर्हति ।

पुराणानां भाषा नितान्तं सुबोधा, सरला, मनोग्राहिणी, प्राञ्जलाऽतिमञ्जुला चास्ति । तत्र वर्णितं तत्त्वज्ञानं सातिशयं सुगमं मनोहारि च वर्तते । प्रसादगुणपूर्णं पुराणसाहित्यं पठतो मानवस्य न तत्र कदाचिद्विरसता जायते परमुत्तरोत्तरमभिरुचि र्जायते एव । नैकशः पठितेऽपि पुराणसाहित्ये उत्तरोत्तररुचिर्वर्द्धते एव न चित्ते तथारुचिरुदेति । चिन्ताशीलैर्विचारकैर्निर्विवादं मन्यते यदन्येषां ग्रन्थानामेकवारं द्विवारं वा अध्यनेन न पुनः पाठतुं पाठकानां चित्तमुत्कण्ठते, किन्तु न जाने पुराणसाहित्ये कीदृगलौकिकत्वं विद्यते यद् यावद्वारं पुराणानां पाठो विधीयते तावदेवाधिकमेतेषां माधुर्यमेधमानं पाठकानां मनांसि मोहत्येव । परं सहस्रवर्षेभ्योऽपि कालेभ्यो जनाः पुराणपाठं प्रकुर्वते, अपिचैकव्यक्तिरेव बहुवारं पुराणजातमधीते शृणोति च अथापि तस्य तत्र दैनन्दिनं नूतनत्वं विवर्द्धते एव । सदा पल्लविता कल्पलतिकेव प्राचीनोऽपि पुराणराशिर्नवीन एव प्रतिभाति, नैव पुराणत्वमुपगच्छति । पुराणानां सर्वग्राहकत्वं सर्वव्यापकत्वं सकललोकोपकारकत्वञ्च अनुपममेवास्ति । पुरातनस्य वैदिक सनातनधर्मस्य श्रुतिः स्मृति पुराणमिति त्रिविधं प्रामाणिकं पुस्तकमभिधीयते । तत्र च सर्वे श्रद्दधते । तत्र श्रुतीनां परब्रह्मणः परमात्मनः साक्षान्निश्वासभूतत्वात्तासां रहस्यं वास्तविकं मर्म वा न सर्वैः सहसा ज्ञातुं शक्यते । यदि विश्वस्य सामाजिकं विज्ञानं परिशील्येत तर्हि पुराणेऽपि तद् यत्र कुत्रापि व्यासकृपयाऽवश्यं प्राप्येत । आदर्शमयसामाजिकव्यवस्थार्थं पुराणेषु महान् प्रयासः कृतोऽस्ति । पुराणातिरिक्तं कुत्रापि सर्वजनोपकारि विवेचनं दुर्लभमस्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आध्यात्मज्ञानैः परिपूर्णानि पुराणानि विविधज्ञानमयानां वेदानां भाष्यभूतानि सन्तीत्यत्र न काप्यस्ति विचिकित्सा। त्रिकालदर्शिना महर्षिणा कृष्णद्वैपायनेन वेदव्यासेन सांसारिकदुःखान्यनुभूय निश्चितं च मानवजीवनस्य प्रमुखं लक्ष्यं भगवत्प्राप्तिः। तत्र ज्ञानमन्तरा नात्यन्तिकः सुखलाभो भवितुमर्हति। सर्वे च मानवाः सुखार्थमेव प्रवृता दरादृश्यन्ते, न दुःखार्थं कश्चिदपि विवेकी मानवः चेष्टते। सर्वोऽपि मानवो निरन्तरं सुखार्थमेव यतते। तदुक्तं महाभारतस्य शान्तिपर्वणि—

दुःखादुद्विजते जन्तुः सर्वस्य सुखमीप्सितम्।

गरुडपुराणस्य प्रेतकल्पेऽप्युक्तमस्ति—

इच्छति शती सहस्रं सहस्री लक्षमीहते।
लक्षाधिपश्च साम्राज्यं सर्वस्य सुखमीप्सितम्॥

पुराणेषु तत्त्वज्ञानैः सह मनोरञ्जक कथोपकथनोपाख्यानाख्यानरोचकता-सद्भावात् पुराणग्रन्थाः सर्वविधानामधिकारिणां चित्तान्याकर्षमन्त्येवेति तेषामस्ति वास्तविकं स्वारस्यमपूर्वत्वमद्भुतत्वञ्च।

यदि बालवृन्दं पुराणं पठेत् तदा तस्य सौजन्यसमृद्धिपूर्वकं भाविजीवनस्य पुण्यमयः पन्थाः प्रशस्तो भवेत्, यदि प्रौढाः पुरुषाः पुराणशास्त्रस्य स्वाध्यायं कुर्वीरन् तर्हि तेषां पुरुषार्थकर्तव्यनिष्ठा विवर्द्धेत, वृद्धाश्च, परलोकप्राप्तिं कुर्युः तथा परमात्मानं प्राप्य कृतकृत्याः सन्तो मानवजीवनं सफली विदधीरन्। पुराणानां पाठप्रभावाद् भारतीयानां नराणां नीराणाञ्च जीवनमादर्शमयं स्यात्। पुराणानां प्रभावात् स्त्रीणां सद्गृहिणीधर्मस्योदयेन पातिव्रत्यधर्मो दृढमूलो भवेत् पुत्राणां तथा तासां पतीनां च जीवनं साधु प्रचलेत्।

स्कन्दपुराणस्य रेवाखण्डे तु श्रुतिः स्मृतिश्च ब्राह्मणानां नेत्रसमे प्रोक्ते स्तः तथा पुराणं हृदयं निगदितमस्ति। तत्रैकेन रहितो मनुष्यो काणः कथ्यते, द्वाभ्यां हीनः अन्धो निगद्यते, पुराणशून्यस्तु हृदयशून्यो भवति। अतः श्रुति-स्मृति-पुराणानि एतानि त्रीणि विपश्चितां नेत्राणि प्रोक्तानि सन्ति। तथाहि—

श्रुति-स्मृती उभे नेत्रे पुराणं हृदयं स्मृतम।
एकेन हीनः काणः स्याद् द्वाभ्यामन्धः प्रकीर्तितः॥

अपि च तत्रैव पुनः

श्रुति-स्मृति-पुराणानि विदुषां लोचनत्रयम्।
यस्त्रिभिर्नयनैः पश्येत् सोंऽशो माहेश्वरो मतः॥

अत एव नारदीयपुराणे पुराणानां कृते वेदेभ्योऽप्यधिकतरा मान्यता प्रदत्ताऽस्ति—

वेदार्थादधिकं मन्ये पुराणार्थं वरानने!
वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः॥ २।२४।२७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यो हि वेदविभाजयिता भगवान् व्यासः, स एव पुराणानां च कर्ताऽस्ति। तेन वेदविषयजातं यत्र तत्र पुराणेषु निहितमस्ति। अतएव साम्प्रतं समस्तस्य वेदस्यानुपलब्धावपि तत्प्रतिपाद्यो विषयः पुराणेषु कथनोपकथनाख्यानोपाख्यानादिमुखेन प्राप्यते एव। अत एव स्कन्दपुराणस्य प्रभासखण्डे पुराणसाहित्यं सर्वशस्त्रमयमुक्तमस्ति—

पुराणमखिलं तात ! सर्वशास्त्रमयं स्मृतम्। ६। १४

यथेदमाश्चर्यमयं विश्वं भगवतो नारायणादेवोत्पन्नं तथैव समस्तं वाङ्मयं पुराणादेव प्रकाशितमस्ति। वस्तुतोऽस्माकं सविधे श्रुति-स्मृति-पुराणान्येवैतादृशं साधनं वर्तते, यतोऽस्माभिः स्वपूर्वजानां ज्ञानं सम्पाद्यते। एषु भारतीयसंस्कृतेर्वास्तविकं स्वरूपं पर्याप्तमत्रायां प्रतिबिम्बितं विद्यते। अतः भारतीयसंस्कृतेर्वास्तविकस्वरूपज्ञानाय पुराणानामनुशीलनं नितान्तमुपकारि उपादेयं श्रद्धेयं चास्ति।

नह्यविदितचरमस्ति केषाञ्चिदपि विपश्चितां यज् जगदिदानीं यदभिमुखं दृश्यते तद् आगमिष्यन्त्या विभीषिकातो रक्षितुमलं चेत् किञ्चिदस्ति तर्हि भारतीया संस्कृतिरेव। भारतीयसंस्कृतेः सम्यगनुशीलनार्थं वेदमूलक स्मृति-पुराण-महाभारत-तन्त्रशास्त्राणां समीक्षणमत्यावश्यकमस्ति। पुराणमहोदधावगाहननिपुणतायै श्रुति-स्मृत्यनुकूलत्वानुसरणं नितान्तमावश्यकम्। अत एव सकलशास्त्रनिष्णातैः सहृदयैः सुरिभिर्वेदाध्ययने एव वलं प्रदत्तम्। तथाहि पस्पशाह्निके महाभाष्ये भगवान् पतञ्जलिः—'ब्राह्मणेन निष्कारणं षडङ्गो वेदा ध्येयो ज्ञेयश्च।' मानवजीवने ये ये प्रसङ्गा उपतिष्ठन्ते, तेषां समेषां मार्गप्रदर्शनस्य क्षमता वैदिकविचारधाराया एकं वैशिष्ट्यं विद्यतेतराम्। वेद-स्मृत्योरनन्तरं पुराणानामेवास्तिकजगति प्रामाण्यमङ्गीक्रियते, यतोऽत्र वेदार्थमेव स्पष्टीकर्तुं ज्ञानकर्मोपासनानां सिद्धान्ता एव अतिसरलतया भावगम्यया प्राञ्जलसंस्कृतभाषया विविधाभिर्भक्तशिरोमणीनां मानवमणीनां कथाभिः, सम्यगवबोधिताः सन्ति, येषां सिद्धान्तानां मननद्वारा साधारणबुद्धयोऽपि जना व्यावहारिकीं सांस्कृतिकीं धार्मिकीं च स्थितिं सम्पादयन्तो वेदोपनिषदादिप्रतिप्राद्यं मानवानां प्रधानं लक्ष्यं परमात्मानं प्राप्य संसारसागरादस्मादुत्तर्त्तुं प्रभवितुमर्हन्ति नराः। अपौरुषेयाणामनादिवेदानां विस्ताराय पुराणसाहित्यस्यावश्यकतामनुभूय पराशरमुनेः सत्यवत्यङ्गजन्मा महर्षिर्वेदव्यासोऽष्टादशमहापुराणानि रचितवान्, कृतवांश्च तत्र ज्ञानकर्मोपासनापेक्षया ऋजुभिरुपायैर्मानवमात्रस्याचरणीयभक्तिमार्गस्याविष्कारम्। अतो निखिलानां जनानां कल्याणकारिभिरुपायैः परिपूर्णानां पुराणानां सम्यगनुशीलनेन भवति मानवताया जार्गतिः, वेदस्योपबृंहणम्, सम्यक् सञ्जायते सनातनस्य धर्मस्य संरक्षणम्, मानवजन्मनः साफल्यञ्च सिध्यति। तथाचोक्तं पुराणार्णवे—

विस्ताराय च वेदानां स्वयं नारायणः प्रभुः।
व्यासरूपेण कृतवान् पुराणानि महीतले॥ ५।७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा दिवसे प्रकाशो भवति भगवता भास्करेण, रात्रौ प्रकाशश्च चन्द्रमसा जायते, गृहान्धकारश्च प्रदीपेनापनीयते तथैव परमात्मस्वरूपप्रदर्शनार्थमुपयुक्तं ज्ञानं तु पुराणवचनैरेव भवितुमर्हति। विविधाभि र्लौकवासनाभिर्भूयो भूयो भवाटव्यामस्यां वम्भ्रम्यमाणानां जीवानां कृते पुराणमस्ति सरल आलोकमार्गः। अत एव लोकपितामहेन ब्रह्मदेवेन सर्वासां विद्यानामादौ पुराणविद्यैव स्मृता, तदनन्तरं तस्य मुखेभ्यो वेदा आविर्भूताः। तदुक्तं मत्स्यपुराणे—

पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम्।
अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः॥ ५३।३

अत एव सर्वशास्त्राणां ज्ञातत्वेऽपि पुराणज्ञानाभावात् कस्यापि पुरुषस्य विचक्षणत्वं न सम्भवतीति विष्णुपुराणस्यास्ति डिण्डिमघोषः—

यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः।
नो चेत् पुराणं संविद्यान्नैव स स्याद्विचक्षणः॥ २।५१

पद्मपुराणेऽपि प्रोक्तमस्ति यद् यैर्वेदास्तदितराणि च शास्त्राणि सम्यगधीतानि, किन्तु तैर्यदि पुराणानामध्ययनं न कृतं चेत्तर्हि तेषामुत्तमज्ञानप्राप्तिर्न जायते—

बहुशास्त्रं समभ्यस्य बहून् वेदान् सविस्तरम्।
पुंसोऽश्रुतपुराणस्य न सम्यग् याति दर्शनम्॥ ४।१०५।१३

धार्मिकसन्देहानां निवृत्तये, प्रवृत्तये चाध्यात्मिक परलोकमार्गे पुराणनां परिशीलनं नितान्तमावश्यकम्। इदं हि विरुद्धैर्हेतुभिर्न हातव्यम्। शास्त्रेषु अप्रर्तवयपुराण-मानवधर्मशास्त्र—साङ्गवेदचिकित्सासु पुराणसाहित्यस्यैव सर्वप्रथमं नामनिर्दिष्टं महाभारतस्यानुशासनपर्वणि, यतो हीमानि भगवत आज्ञरूपाणि सन्ति—

पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम्।
अज्ञासिद्धानि चत्वारि न हातव्यानि हेतुभिः॥

पुराणं मानवजातेर्हृदयान्धकारस्यापसारणाय सर्वथा मणिमयं प्रकाशकमस्ति। परमतत्त्वदृष्ट्या पुराणं हि नूनमस्ति श्रद्धेयं शास्त्रम्। पुराणेषु विविधैर्भविर्विभिन्नैर्नामभिर्विविधेभ्योऽधिकारिभ्यो विविधैः प्रकारैः परमं पुरुषार्थमवगन्तुमुपायाः प्रदर्शिताः सन्ति। अद्यत्वे पुराणानां सम्यग्ज्ञानाभावादेव तत्र निर्मूला अनेके आक्षेपा भवन्ति। गभीरतया तदनुसन्धाने क्रियमाणे तेषामाक्षेपाणामनायासेन निराकरणं जायते। यदि पुराणान्याक्षेपपूर्णानि स्युः, तर्हि महादार्शनिकानां परमतत्त्वविचारकाणां कुमारिलभट्ट-स्वामिशङ्कराचार्य-रामानुजाचार्य-वल्लभाचार्यप्रभृतीनां महानुभावानां पुराणानि निर्भ्रान्तप्रमाणानि कथङ्कारं स्वीकृतानि स्युः ?

पुराणानामन्तस्तले प्रविश्य विवेचने क्रियमाणे स्फुटमवगम्यते यत् पुराणेषु देश-काल-परिस्थित्यनुसारं सर्वानुकूलं कर्तव्यमुपदिष्टं वर्तते, येन मानवानां सर्वथा कल्याणमेव स्यात्। अतः पुराणपारायणपरैर्विद्वद्भिर्भारतीयजनानां महते उपकाराय भारतराष्ट्रसमुन्नतये च पुराणज्ञानराशिः प्रचारणीयः प्रसारणीयश्च।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अद्यत्वे स्वतन्त्रताया उषःकाले नित्यनवीनैरुत्साहैरभिनवचाक्यचिक्ययुगेऽपि पुराणानि महान्तमुपकारं कर्तुं प्रभवन्ति। भारतीयजनतापथप्रदर्शनाय पुराणानि महाभारतं रामायणञ्च सर्वतोऽधिकं सर्वविधं साहाय्यं च विधातुं शक्नुवन्ति, यतो हि पुराणानां भूमिर्न केवलं भारतवर्षमात्रं वर्तते, अपितु समस्तं भूमण्डलं वर्तते। पुराणव्यवस्थायां विश्वबन्धुत्वस्य सार्वभौमस्य चादर्शो निहितोऽस्ति येनान्ताराष्ट्रियसमस्यायाः समाधाने पर्याप्तं साहाय्यं भवितुमर्हति।

लौकिकविषयाणामिव पारलौकिकविषयाणामपि पुराणेषु प्रचुरं विवेचनं कृतं विद्यते, यतो हि पुराणानां दृष्टिपथे न केवलं दृश्यमानभूमण्डलस्यैवापितु ऊर्ध्वाधोभगे विद्यमानानां चतुर्दशभुवनानां पदार्था अपि सम्यग्विवेचिताः सन्ति। एवं सार्वजनीनं हितमुपदेष्टुं प्रवृत्तानां पुराणानां समीक्षा कस्य सचेतसो मानवस्य न प्रियकरी कल्याणविधायिनी च स्यात्?

पुराणं हिन्दुजातेः सर्वस्वं भारतीय संस्कृतेः पोषकं मानवसमाजस्य पथप्रदर्शकमार्यसाहित्यस्य चाधारस्तम्बो वर्तते, येन सर्वविधं धार्मिक-नैतिक-सामाजिक सद्व्यवहारादीनां सौविध्यमवाप्यते। भारतीयप्राचीनेतिहासस्यान्धकारयुगेऽपि पुराणप्रभया प्रकाशः प्राप्यत एव। अत एव महर्षिणा योगिना याज्ञवल्क्येन चतुर्दशविद्यागणनायां पुराणस्य प्राथम्यमुक्तं याज्ञवल्क्यस्मृतौ—

पुराणं न्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥ २।'

भूगोलशिक्षार्थमपि पुराणानामनुशीलनमस्त्यावश्यकम्। भौगोलिकदृष्ट्या मिश्रदेशस्य प्रसिद्धाया नीलनद्याः तदेव स्थानमस्ति यद् भारते भागीरथ्या गङ्गाया वर्तते। एकदा तस्या उद्गमस्थानजिज्ञासया विलफोर्ड महोदयेन पुराणवर्णितस्य भूगोलस्याधारेणान्वेषणं समारब्धम्। तेन पुराणवर्णनानुसारं नीलनद्या उद्गमस्यैकं मानचित्रं प्रकाशितम्, किन्तु कनिंघमप्रभृतयो योरोपीया विद्वांसो भारतीयपुराणसाहित्यस्य तद्गौरवमसहमाना विलफोर्ड हसन्तः तन्निर्मितं नीलनदीमानचित्रं सर्वथाऽविश्वसनीयं भारतपक्षपातपूर्णञ्चोद्घोष्य खण्डितवन्तः। तदनन्तरं वास्तविकतापक्षपातिना लेफ्टीनेन्ट जी० एच्० स्पीकेन नीलनद्या उद्गमस्थानविषये परिश्रमः आरब्धः। तेन विचारजातमनुशील्य विलफोर्डमानचित्रं च गृहीत्वा मिश्रे भ्रमता तन्मानचित्राधारेणैव यात्रां कुर्वता नीलनद्या उद्गमस्थानं प्रत्यक्षीकृतम्। सर्वमेतद्वृत्तं 'डिस्कभरी आफ् दी सोर्स नील नदी' नामके पुस्तकेऽङ्कितमस्ति। अस्यैव विषयस्य विवरणम् 'एसियाटिकरिसर्चेज तृतीयभागेऽपि प्रकाशितमस्ति। एवंविधा अनेके सन्दर्भाः पुराणभौगोलिकविवरणानां प्रामाणिकतां साधयन्ति। पुराणेषु प्रधानतया भारतवर्षस्य गौडतया च अन्येषां देशानामपि किञ्चिद् विवरणं निर्दिष्टमस्ति, परमिदानीं दीर्घकालस्य व्यवधानात्, प्रकृतिपरिवर्तनात्, अनेकक्रान्तेः राजनीतिविप्लवाच्च आंशिकरूपेण पुराणनिर्दिष्टानां नदी-पर्वत-जनपदादीनां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथार्थतः परिचयोऽल्पत्वेऽपि कठिनो जातः, प्रसन्नताया विषयोऽस्ति यत् पुरातत्त्वानुशीलननिरतानां गवेषकाणां परिश्रमेण पुराणवर्णिता भौगोलिकविवरणसत्यता शनैः शनैः प्रमाणी भवति ।

पुराणानां धार्मिकदृष्ट्याऽधिकं महत्त्वं विद्यते । वेदविहितानां धर्माणां सरलसुबोधमावगम्य भाषया वर्णनायैव भगवता व्यासेन पुराणानि विरचितानि । वेदानामतिनिगूढतया तदुक्ता अर्था विषयाश्च सहसा लोकानां बुद्धौ नाधिरोढुं प्रवृत्ताः । अतो वेदोक्तार्थस्य सम्यग् ज्ञानाय पुराणानि रचितानि । अत एवोक्तं महाभारतस्यादिपर्वणि—

इतिहास पुराणाभ्यां वेदार्थमुपबृंहयेत् ।

विश्ववाङ्मये वेदानां स्थानमप्रतिमं विद्यते । लौकिकः पारलौकिको वा कश्चन विषय एवंविधो नास्ति यस्य विवेचनं वेदेषु येन केनापि प्रकारेण न कृतमस्ति । अतो वैदिकरहस्यस्य यथार्थज्ञाननिमित्तं तन्मूलकपुराणानां पर्यालोचनमत्यन्तमुपकारि वर्तते । वेदेषु अतिसंक्षिप्तरूपेण वर्णितानां विषयाणामेव पुराणेषु आख्यानोपाख्यान-कथानकादिषु विशदीकरणं वर्तते । प्राचीनतमस्य भारतस्यादर्शं भारतीयसंस्कृतेश्च वास्तविकं स्वरूपमवगन्तुं पुराणमेवेकं सरलं साधनमस्ति । अत एव पुराणं भारतीयवाङ्मयमन्दिरस्य सुवर्णमयः कलशः कथ्यते । पुराणेषु प्रसङ्गवशात् स्थलेस्थलेऽखिललोककल्याणकारिण्या भारतीयसंस्कृतेः मौलिकानानां सिद्धान्तानां स्पष्टमुल्लेखो विद्यते । वेदस्य च साङ्गोपाङ्गं विवेचनमुपलभ्यते । अतो भारतीयानां व्यक्तिगतां सामाजिकीं सांस्कृतिकीं च जीवनधारां सम्यगवगन्तुं पुराणसाहित्यं सर्वाधिकं सहायकमस्ति । वस्तुतो भारतीयसंस्कृते रूपरेखा पुराणेष्वेव सुरक्षिता वर्तते । पुराणेषु कर्म-भक्ति-ज्ञानोपासनादिद्वारा मानवजन्मनः प्रधानलक्ष्यभूताया भगवत्प्राप्तेः साधनं सदाचारः सृष्टेरादिकालतः पूर्वजानां विवरणं लोककल्याणनिरतानां मुनीनामृषीणाञ्च पवित्रतममाचरणं तथादर्शभूतानामुदारहृदयानां महापुरुषाणामुज्ज्वलं चरित्रं च चित्रितमस्ति । यदाधारेण सर्वोऽपि जनो नैजं जीवनं समुन्नतिशीलं विधातुं शक्नोति ।

एवं भारतीयजीवनस्य प्रतिबिम्बदर्शनात् पुराणेषु देशस्यास्य साहित्यसंस्कृत्योर्वास्तविकं स्वरूपमुपलभ्यते । पुराणानां समस्तं वृत्तान्तं भारतीयसंस्कृतेः प्रतिनिधित्वं करोति । व्यवहारिकजीवनेन सह सम्बद्धाया भारतीयसंस्कृतेरविकृतरूपोपस्थापनं पुराणानां परमं वैशिष्ट्यं वर्तते ।

पुराणेषु मानवीयजीवनस्य प्रतिबिम्बदर्शनं तथा राष्ट्रियसमुन्नतेरुदन्त उत्साहो निहितोऽस्ति । दैशिक-राष्ट्रिय-सामाजिक-सांस्कृतिकचेतनायाः समाजहितभावनया मनोरञ्जकरुच्या च प्रेरितो भगवान् वेदव्यासः पुराणानां प्रणयनं विधायास्माकमैहिक्याः पारलौकिक्याश्च समुन्नतेः साधनं सुगमं कृतवान् । पुराणानुसारं जीवननिर्वाहार्थं हिन्दुसमाजः सदा जागरूकः तिष्ठति । पुराणसाहित्यं भारतीय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सामाजिकजीवनस्यास्ति स्वच्छं दर्पणम् । सरल-सुबोध-प्रबुद्ध-प्राञ्जलशैलीद्वारा अतिप्राचीनं सदपि पुराणसाहित्यं नित्यनवीनतायाः स्फूर्तेरुत्पादने महदुपकारि साहित्यं वर्तते । स्वकीयैः विशुद्धैः सदुपदेशैः समाजं शुद्धं विधाय सत्यं शिवं सुन्दरं चादर्शमुपस्थापयति पुराणसाहित्यमिति निश्चप्रचम् ।

अत एव वेदानां मर्म विज्ञातुं पुराणानामनुशीलनेऽस्माकं पूर्वजैर्महद्बलं प्रदत्तं वर्तते । यावत् पुराणानामध्ययनं न क्रियते तावद् भारतीयमध्ययनं न्यूनतापूर्णमेवावतिष्ठते ।

वस्तुतः पुराणेषु धर्म-दर्शन-भक्ति-कला-इतिहास भूगोल-राजनीति-समाजव्यवस्थादि विभिन्नविषयिकाः साभग्रचः सङ्कलिताः सन्ति । येषां विवेचनं भारतीयेतिहासस्य नवनिर्माणेऽत्यन्तमुपादेयमस्ति । स्कन्दपुराणस्य रेवाखण्डे तु वेदविद्या, पुराणं, धर्मशास्त्रञ्चेति त्रयं सर्वशास्त्रविनिर्णये प्रमुखं स्वीकृतमस्ति पुराणञ्च पञ्चमो वेदोऽभिमतः ।

आत्मनो वेदविद्या च ईश्वरेण विनिर्मिता ।
शौनकीया च पौराणी धर्मशास्त्रात्मिका च या ।।
तिस्रो विद्या इमा मुख्याः सर्वशास्त्रार्थनिर्णये ।
पुराणं पञ्चमो वेद इति ब्रह्मानुशासनम ।। १।१७,१८

अतः पुराणसाहित्यं भारतीयजीवनस्याधारं सांस्कृतिकस्येतिहासस्य च शृङ्खलां मत्वा तदनुशीलनं नितान्तमावश्यकम् । पुराणवाङ्मयं भारतीयजीवनस्य साहित्यस्य च अस्ति, अमूल्यं रत्नं तथाऽतीतं वर्तमानेन सह संयोजयितुं स्वर्णमयी शृङ्खला । विश्वसाहित्यस्याक्षयभाण्डारेऽष्टादशमहापुराणनि अनुपमानि श्रेष्ठरत्नानि सन्ति । इमानि चास्माकं सामाजिक-सांस्कृतिक-राजनीतिक-धार्मिक-दार्शनिकजीवनं स्वच्छदर्पणवत् प्रतिबिम्बितं कुर्वन्ति । सहैव क्रमबद्धकथानकशैल्या निरन्तरं नवीनां स्फूर्तिं सञ्चारयन्ति । समाजस्य तात्कालिकस्वरूपबोधनाय पुराणानां महानुपयोगः । पुराणेषु प्राचीनभारतस्येतिहासो निहितोऽस्ति पौराणिकेतिवृत्तानां प्रामाणिकत्वमद्यत्वे शिलालेखादिभिरुत्खनने प्राप्तसामग्रीभिरपि कर्तुमारब्धम् । अतो विदेशीया अपि विद्वांसः पुराणसाहित्ये बद्धादरा दरीदृश्यन्तेतराम् ।

अष्टादशमहापुराणवदेवाष्टादशसंख्याकानि उपपुराणान्यपि सन्ति, येषां निर्माणं महापुराणानामाधारेण विभिन्नैर्मनोषिभिर्मुनिभिः कृतमस्ति । विस्तारभयात् क्वचिदुपपुराणेषु महापुराणानां कथाः सूक्ष्मीकृताः, कुत्रचित् परित्यक्ताः कुहचिच्च चमत्कारानयनाय विलक्षणानां कथानां समावेशः कृतोऽस्ति । एवंविधे वैशिष्ट्ये सत्यपि उपपुराणानि महापुराणवदेवादरणीयानि स्पृहणीयानि मान्यानि श्रद्धेयानि च सन्ति । तथाचोक्तं मत्स्यपुराणे—

अष्टादशभ्यस्तु पृथक् पुराणं यत् प्रदृश्यते ।
विजानीध्वं द्विजश्रेष्ठास्तथा तेभ्यो विनिर्गतम् ।। ५३।६३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णुपुराणस्य तृतीयेंऽशेऽपि—

महापुराणान्येतानि ह्यष्टादश महामुने !
तथाचोपपुराणानानि मुनिभिः कथितानि च ॥ ३।६।२४

अत उपपुराणानां स्रोतांसि महापुराणानीत्यत्र नास्ति काचित् संशीतिः। एवञ्च यथा अष्टादशमहापुराणानि तथैवाष्टदश उपपुराणान्यपीति निर्विवादम्। अतो ब्रह्मवैवर्तस्य श्रीकृष्णजन्मखण्डे उपपुराणानां गणनाप्रसङ्गे तान्यष्टादशसंख्याकान्येव प्रोक्तानि—

अष्टादश पुराणानामेवमेवं विदुर्बुधाः।
एवञ्चोपपुराणानामष्टादश प्रकीर्तिता ॥ १३१।२२

तेष्वन्यतमुपपुराणं कपिलपुराणमस्ति। अत्रैकविंत्यध्यायाः सन्ति। तत्र विधिधानां क्षेत्राणां माहात्म्यं, जगन्नाथपुरी-वाराणसी-महानदी-गङ्गा-मैत्रेयवन-आम्रकवनप्रभृतीनां महिमम्नि पौराणिकं कथानकञ्चाङ्कितमस्ति, येषां स्मरणमात्रेण पापानि दूरीभवन्ति—'येषां स्मरणमात्रेण कल्मषा यान्ति वै क्षयम्।'

अस्यैकमात्रं हस्तलेखः सरस्वतीभवने वर्तते, यस्य संख्या १६४०४ पृष्ठसंख्या च१-३६ वरीवर्ति। अत्र जम्बवतीपुत्रस्य साम्बस्य शरीरे कुष्टरोगस्योत्पत्तेर्हेतुः तन्निवृतये चोपायो निर्दिष्टो वरीवर्ति। पतिव्रतायाः सर्पिण्याः शापेन मान्धातुः राज्ञः शृगालयोनिप्राप्तिः तन्मार्जनस्य चोपाय आम्रकवने शिवस्य समाराधनं प्रदर्श्य ग्रन्थकारेण पतिव्रताया विलक्षणो महिमा प्रदर्शितो वर्तते। अत उपपुराणमिदं लोकोपकारि परमं धार्मिकं चास्ति। मया स्वस्वाध्यायवलेन बुद्धिवैभवेन च सम्यक् संशोध्य प्रकाश्य च पाठकानां पुरःप्रस्तूयते। मन्ये पाठकानां प्रमोदे मम प्रयासः सफलः स्यादिति शम्।

दीपावली
वै० सं० २०३७
दिनाङ्कः ७।११।८०

विद्वद्वशम्वदः
—श्रीकृष्णमणित्रिपाठी
भारतीय साहित्यशोधसंस्थानम्, वाराणसी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समर्पणम्

श्रीमत्परमहंसपरिव्राजकाचार्याणामनन्तश्रीविभूषितानां
विद्वच्छिरोमणीनां मानवमणीनां सर्वतन्त्रस्वतन्त्र
स्वामिवर्यविशुद्धानन्दसरस्वतीमहाराजानां
पुण्यस्मृतौ सङ्कलितमिदं कपिलपुरा-
णस्य समीक्षात्मकं संस्करणम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किञ्चित् प्रास्ताविकम्

कायेन मनसा वाचा भजे भक्त्या तमद्भुतम् ।
श्रीश्रीकृष्णं च राधेशं पुरणार्णववन्दितम् ।।

यथाऽद्यत्वे शास्त्रनाम्ना धर्मशास्त्र-व्याकरणशास्त्र-दर्शनशास्त्र-अर्थशास्त्राद्यनेकविषयाणां बोधो भवति तथैव वेदशब्दस्यापि प्रयोगः पुरा सामान्यतया सर्वेषां विषयाणां कृते क्रियतेस्म । यथा ब्राह्मणयुगीनं समस्तं सहित्यं सामान्यतया ब्राह्मणग्रन्थनाम्नाऽभिधीयतेस्म । एवं सूत्रयुगे श्रौत्रसूत्र-धर्मसूत्र-गृह्यसूत्र-व्याकरणसूत्र-दर्शनसूत्र-शैली प्रोच्यते । स्मृतियुगे सर्वा अपि कृतयः स्मृतिनाम्ना कथिताः तथा पौराणिकयुगेऽपि अनेकेषां ग्रन्थानां नाम पुराणमिति प्रसिद्धम् । एवं वैदिकयुगे वेदशब्दान्तर्गतं ब्राह्मणग्रन्थ-पर्यन्तं समाविष्टम् । मन्त्र-ब्राह्मणयो र्द्वयोर्भागयोर्नाम वेद इति जातम्[1] । एवं संहितात्मको मन्त्रभागो ब्राह्मणग्रन्थश्चोभयं वेदनाम्नाऽभिधीयते । तथा च नाट्यशास्त्रे नाट्यनामकस्य पञ्चमस्य वेदस्य निर्माणमुल्लिखितमस्ति । यद् ब्रह्मदेवेन स्वयम् ऋग्यजुः सामाथर्वणां चतुर्णां सारं संगृह्य रचितम्[2] ।

कालक्रमानुसारं तदनन्तरं वेदशब्दः केवलं चतुर्णां वेदानाम् ऋग्यजुःसामाथर्वणामेव सूचको जातः । ब्राह्मणारण्यकोपनिषदादीनां विषया वेदमर्यादान्तर्गता अपि मूलवेदतः सर्वथा पृथगेव जाताः । तथा चोक्तं तैत्तिरीयभाष्यभूमिकायाम्[3] । अतो वेदनाम्ना मन्त्रा एवाभिप्रेताः, न ब्राह्मणारण्यकोपनिपदादयः । संस्कृति-धर्म-दर्शन-साहित्यादयो यावन्तो विषयाः सन्ति । तेषामाधारो वेदेष्वेवावम्बितो वर्तते । अत एव मनुस्मृतौ भगवता मनुनापि वेदः सर्वज्ञानमयः प्रोक्तोऽस्ति[4] । मैक्समूलर-दयानन्द-सरस्वतीप्रभृतयोऽपि वेदज्ञानिनोविपश्चितो वेदस्य सर्वज्ञानमयं स्वरूपमेव स्वीर्वन्ति ।

अतिप्राचीनकालतोऽद्यत्वेऽपि हिन्दुजातिर्वेदेषु पूर्णं विश्वासं कुरुते । यतो हि स एव सर्वतः प्राचीनः पवित्रतमः धर्मग्रन्थः प्रसिद्धोऽस्ति । वेदशब्दो हि चतुर्भिर्धानुभि र्निष्पद्यते—विद्ज्ञाने, विद्सत्तायाम्, विद्लृलाभे,

---

१. मन्त्र-ब्राह्मणयोर्वेदनामध्येयम् । (आ.श्रौ.सू.) २. नाट्यशास्त्र अ० (११८-१८)
३. यद्यपि मन्त्रब्राह्मणात्मको वेदः तथापि ब्राह्मणस्य मन्त्रव्याख्यानरूपत्वात् मन्त्र एवादौ समाम्नातः । ४. 'सर्वज्ञनमयो हि सः' । (११७)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्‌विचारणे इति। तन्निर्वचनं यथा—विदन्ति जानन्ति, विद्यन्ते लभन्ते, विन्दन्ति, विदन्ते लभन्ते, विन्दन्ति विचारयन्ति सर्वे मनुष्याः सत्यां विद्यां यैर्येषु वा ते वेदाः। इत्थं वेदः समस्तस्य वाङ्मय स्य वाचकोऽस्ति।

वस्तुतो भारतीयमध्ययनं वेदत एवारभ्यते, यतो हि वेदोऽस्ति भारतीयसंस्कृतेर्मूलमाधारः। विश्ववाङ्मये वेदात् प्राक्तनं किमपि साहित्यं नोपलभ्यत इति सर्वैः पौर्वात्यैः पाश्चात्त्यैश्च विपश्चिद्भिर्मन्यते। अतः श्रद्धालवो हिन्दवः सर्वतोऽधिकं वेदप्रामाण्यमेवाभ्युपगच्छन्ति, तन्मूलक-स्मृतिपुराणानुसारमाचरन्ति, व्यावहरन्ति च निरन्तरम्। संस्कृतवाङ्मये पुराणानामस्ति विशिष्टं स्थानम्। वेदस्मृत्योरनन्तरं पुराणानामेवास्तिक जगति प्रामाण्यमङ्गीक्रियते। यतोऽत्र वेदार्थमेव स्पष्टीकर्त्तुं ज्ञानकर्मोपा-सनानां सिद्धान्ता अतिसरलया भावगम्यया प्राञ्जलया भाषया विविधा-भिर्भक्तशिरोमणीनां मानवमणीनां कथाभिः सम्यगवबोधिताः सन्ति, येषां मननद्वारा साधारणबुद्धयोऽपि जना व्यवहारिकीं स्थितिं सम्पादयन्तो वेदोपनिषत्प्रतिपाद्यं मानवानां प्रधानं लक्ष्यं परमात्मानं प्राप्य मुक्ता भवितु-मर्हन्ति। वेदानां यथार्थमर्थमवगन्तुं पुराणानामस्ति पूर्णः सहयोगः। अतो वेदार्थानां विस्ताराय पुराणानुशीलनस्यावश्यकता प्रदर्शिता महाभारतस्या-दिपर्वणि भगवता व्यासदेवेन—'इतिहासपुराणाभ्यां वेदार्थमुपबृंहयेत्'[1]। इति।

अतो भगवन्निःश्वासरूपापौरुषेयवेदवत् पुराणानामपि प्रामाण्यं सिध्यति। वस्तुतोऽनादिपरम्परातः प्रचलिताया भारतीयसंस्कृतेः, सदा-चारस्य, वर्णाश्रमधर्मस्य, समस्तस्य समाजस्य, सम्पूर्णस्य राष्ट्रस्य च मर्यादासंरक्षणं यथा वेदैर्विधीयते, तदनु स्मृतिभिः सम्पाद्यते, तथैव पुराणै-रपि क्रियत इति न संशयग्रस्तम्। वेदानां दुरूहतया तदीयतत्त्वानां साक्षात्कारो यादृक् काठिन्यमावहति, न तादृक् सरलातिसरलभाषानिबद्धानां पुराणाना-मस्ति काठिन्यम्।

साधारणेष्वपि जनेषु वेदरहस्यज्ञानस्यावश्यकत्वमनुभूय भगवान् कृष्णद्वैपायनो महर्षिर्व्यासदेवः पुराणानि रचितवान्, कृतवांश्च तत्र ज्ञान-कर्मोपासनापेक्षया ऋजुभिरुपायैर्मानवमात्रेणाचरणीयस्य भक्तिमार्गस्या-विष्कारम्। अतो निखिलानां जनानां कल्याणकारिभिरुपायैः परिपूर्णानां पुराणानामनुशीलनेन भवति मानवताया जागर्तिः, सम्यक् सञ्जायते धर्मस्य संरक्षणम्, मानवजन्मनः साफल्यं च सिध्यति। अत एव सङ्गच्छते वक्ष्यमाणं पद्यम्—

---

१. महाभारते—आदिपर्वणि—१।२६७।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विस्ताराय तु वेदानां स्वयं नारायणः प्रभुः ।
व्यासरूपेण कृतवान् पुराणानि महीतले[१] ॥

यथा दिवसे प्रकाशो भगवता भास्करेण भवति, रात्रौ प्रकाशश्चन्द्रमसा जायते, गृहान्धकारो दीपेनापनीयते, तथैव परमात्मस्वरूपप्रदर्शनार्थं ज्ञानं तु वेदमूलकैः पुराणवचनैरेव सम्भवितुमर्हति। विविधाभिर्वासनाभिर्भूयो भूयो भवाटव्यामस्यां बंभ्रम्यमाणानां जीवानां कृते पुराणमस्ति सरल आलोकमार्गः। अत एव लोकपितामहेन ब्रह्मणा सर्वासां विद्यानामादौ पुराणविद्यैव स्मृता, ततस्तन्मुखेभ्यो वेदा आविर्भूताः[२]।

सर्वशास्त्राणां ज्ञातृत्वेऽपि पुराणज्ञानाभावात् कस्यापि पुरुषस्य विचक्षणत्वं न सम्भवतीति विष्णुपुराणस्यास्ति डिण्डिमघोषः[३]।

पद्मपुराणे तु प्रोक्तमस्ति यद् यैर्वेदास्तदितराणि च शास्त्राणि सम्यगधीतानि, परन्तु तैर्यदि पुराणानामध्ययनं न कृतं चेत्, तर्हि तेषामुत्तमज्ञानप्राप्तिर्न जायते[४]। धार्मिकसन्देहानां निवृत्तये प्रवृत्तये चाध्यात्मिक-परलोक-मार्गे पुराणानामनुशीलनमस्ति नितान्तमावश्यकम्। इदं हि विरुद्धैर्हेतुभिः कदापि नं हातव्यम्। शास्त्रेषु अप्रत्यर्क्यपुराणमानवधर्मशास्त्रसाङ्गवेद-चिकित्सासु पुराणस्यैव प्रथमं स्थानं निर्दिष्टमस्ति महाभारते, यतो हीमानि भगवत आज्ञारूपाणि सन्ति[५]।

पुराणं मानवजातेर्हृदयान्धकारस्यापाकरणाय सर्वथा मणितुल्यं प्रकाशकमस्ति। परमतत्त्वदृष्ट्या पुराणं हि नूनमस्ति श्रद्धेयं शास्त्रम्। पुराणेषु विविधैर्भावैर्विभिन्नैर्नामभिर्विविधेभ्योऽधिकारिभ्यो विविधैः प्रकारैः परमं पुरुषार्थमवगन्तुमुपायाः प्रदर्शिताः सन्ति। अद्यत्वे पुराणानां सम्यगध्यनाभावादेव तत्र निर्मूला अनेके आक्षेपा भवन्ति। गभीरतया तदनुसन्धाने

---

१. पुराणार्णवम् १।२५।

२ पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम्।
अनन्तरं च वक्त्रेभ्यो वेदातस्य विनिर्गताः॥ (म० पु० ५३।३)

३. यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः।
न चेत् पुराणं संविद्यान्नैव स स्याद् विचक्षणः॥ (वि० पु० ३।२१)

४. बहुशास्त्रं समभ्यस्य बहून् वेदान् सविस्तरम्।
पुंसोऽश्रुतपुराणस्य न सम्यग् याति दर्शनम्॥

५. पुराणं मानवो धर्मःसाङ्गो वेदश्चिकित्सितम्।
आज्ञासिद्धानि चत्वारि न हातव्यानि हेतुभिः॥ (प० पु० ४।१०५।१३)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रियमाणे तेषामाक्षेपाणामनायासेन निराकरणं जायते । यदि पुराणान्याक्षेपपूर्णानि स्युः, तर्हि महादार्शनिकानां परमतत्त्वविचारकाणां कुमारिलभट्ट-श्रीशङ्कराचार्य-रामानुजाचार्य-वल्लभाचार्य-प्रभृतीनां महानुभावानां निर्भ्रान्तिप्रमाणानि पुराणानि कथङ्कारं स्वीकृतानि स्युः ?

पुराणानामन्तस्तलं प्रविश्य समीक्षायां स्फुटमवगम्यते, यत् पुराणेषु देशकालस्थित्यनुसारं सर्वानुकूलं कर्तव्यमुपदिष्टं वर्तते, येन मानवानां सर्वथा कल्याणमेव जायते । अतः पुराणपारायणशीलैर्विद्वद्भिर्भारतीयजनताया महत उपकाराय राष्ट्रसमुन्नतये च पुराणज्ञानराशिर्नूनं प्रसारणीयः प्रचारणीयश्च। अद्यत्वे भारतस्य स्वतन्त्रताया उषःकाले नित्यनवीनैरुत्साहैरभिनवचाक्यचिक्ययुगेऽपि पुराणानि महान्तमुपकारं कर्तुं प्रभवन्ति ।

भारतीयपथप्रदर्शनाय पुराणानि, महाभारतम्, रामायणञ्च सर्वतोऽधिकं साहाय्यं विधातुं शक्नुवन्ति, यतो हि पुराणादीनां भूमिः समस्तं भूमण्डलं वर्तते, न च केवलं भारतवर्षमात्रमेव । पुराणव्यवस्थायां सर्वसुखित्वं-सर्वेषां प्राणिनां विश्वबन्धुत्वस्यादर्शो निहितोऽस्ति, येनान्ताराष्ट्रियसमस्यायाः समाधानेऽपि पर्याप्तं साहाय्यं भवितुमर्हति ।

लौकिकविषयाणामिव पारलौकिकविषयाणामपि पुराणेषु पर्याप्तं विवेचनं कृतं विद्यते । यतो हि पुराणानां दृष्टिपथे न केवलं भारतवर्षस्यापितु तत्रोर्ध्वाधोभागे वर्तमानानां चतुर्दशभुवनानामपि पदार्थाः सम्यग् विवेचिताः सन्ति । एवं सार्वजनीनं हितमुपदेष्टुं प्रवृत्तानां पुराणानां समीक्षा कस्य सचेतसो मानवस्य न प्रियकरी कल्याणकरी च स्यात् ।

पुराणं हि हिन्दुजातेः सर्वस्वम्, भारतीयसंस्कृतेः पोषकम्, मानवसमाजस्य पथप्रदर्शकमार्यसाहित्यस्य चाधारस्तम्भो विद्यते, येन ततः सर्वविध धार्मिक-सांस्कृतिक-ऐतिहासिक-नैतिक-सामाजिकसद्व्यवहारादीनां सौविध्यमवाप्यते । भारतीयप्राचीनेतिहासस्यान्धकारे युगेऽपि पुराणप्रभया प्रकाशः प्राप्यते । अत एव महर्षिणा याज्ञवल्क्येन स्वकीय याज्ञवल्क्यस्मृतौ विद्यागणनायां पुराणस्य प्राथम्यमुपात्तम्[१] ।

यथा वेदा ईश्वरानुग्रहेण पूर्वं ब्रह्मणो हृदि आविर्भूताः, ततो विभिन्नानां महर्षीणां हृदाकाशे प्रकाशिताः, तदनन्तरं च मानवसमाजे विस्तृताः, तथैव सर्वप्रथमं पुराणविद्या ब्रह्मद्वारैव स्मृता, तदनु देवर्षिहृदयेषु प्रस्फुरिता, पश्चात् कथनोपकथनद्वारा मानवेषु प्रसरन्ती महर्षि कृष्णद्वैपायनव्यासद्वारा ब्रह्म-पद्म विष्णु–भागवताद्यष्टादशादिपुराणरूपेणोपनिबद्धा सती लोककल्याणं कुरुते ।

---

१. पुराणं न्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यनां धर्मस्य च चतुर्दश ।। (या० स्मृ० ३ ।)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत एवोभयमर्मज्ञो भगवान् व्यासो वेदविभाजयिता, पुराणसङ्कलयिता चोच्यते। भारतीयपरम्परानुसारं वेदमन्त्राणां गूढोऽर्थौ ब्राह्मणग्रन्थद्वाराऽवगम्यते, तस्य स्पष्टीकरणं च पुराणेतिहाभ्यां भवति। पुराणेषु येऽर्था उक्ताः सन्ति, ते वेदार्थस्य विस्तृतव्याख्यारूपा विद्यन्ते। भगवता व्यासेन पुराणातिरिक्तमेकं लक्षश्लोकात्मकं महाभारतमपि रचितम्, यत्र सर्वविद्यानां सङ्ग्रहो जातः। तदर्थं तेन प्रतिज्ञातं यत्—यदिहास्ति तदन्यत्राप्युपलभ्यते, यन्नेहास्ति, न तत् क्वचिदन्यत्र प्राप्यते। महाभारतमितिहासशैल्या लिखितमस्ति। अत एतदितिहासः प्रोच्यते[१]। अत एवोक्तमालोचकैः 'यन्न भारते तन्न भारते' पुराणेतिहासयोः यज्ञ-दान-तीर्थ-व्रतोत्सवादीनां वर्णनप्रसङ्गे प्राचीनस्य भारतीयसमाजस्य प्रत्यक्षं रूपं दृष्टिगतं भवति, यत्राद्यत्वे हिन्दुसंस्कृतिरवलम्बिताऽस्ति। एवं पुराणेतिहासाभ्यां नूनं प्राचीनभारतस्य ज्ञानराशिवैभवमवगम्यते।

आधुनिकभूगोलशिक्षार्थमपि पुराणानामनुशीलनं नितान्तमामावश्यकमस्ति। भौगोलिकदृष्ट्या मिश्रदेशस्य सुप्रसिद्धाया नीलनद्या तदेव स्थानमस्ति, यद् भारते भगवत्या भागीरथ्या गङ्गाया विद्यते। तस्या उद्‌गमस्थानजिज्ञाशया विल्फोर्डमहोदयेन पुराणवर्णितभूगोलाधारेणान्वेषणमारब्धम्। तेन पुराणवर्णनानुसारं नीलनद्या उद्‌गमस्थानस्यैकं मानचित्रं प्रकाशितम्, किन्तु कर्निधमप्रभृतयो योरोपीया विद्वांसो भारतीयपुराणसाहित्यस्य तद्‌गौरवमसहमाना विल्फोर्डमुपहसन्तस्तन्निर्मित्तं तन्नीलनदीमानचित्रं सर्वथाऽविश्वसनीयं भारतपक्षपांतपूर्णमित्युद्घोष्य खण्डितवन्तः। तदनन्तरं वास्तविकतापक्षपातिना लेफ्टिनेण्ट जे० एच्० स्पीकेन नीलनद्या उद्‌गमस्थानविषये परिश्रमः सारब्धः। तेन विचारजातमनुशील्य विल्फोर्डमानचित्रं गृहीत्वा मिश्रे भ्रमता तन्मानचित्राधारेणैव यात्रां कुर्वाणेन नीलनद्या उद्‌मस्थानमपि प्रत्यक्षीकृतम्। सर्वं तद्‌वृत्तम् 'डिस्कवरी आफ् दि सोर्स नील' नामके पुस्तकेऽङ्कितमस्ति। अस्यैव विषयस्य विवरणम् 'एसियाटिक रिसर्चेज' तृतीयभागेऽपि लिखितमस्ति। एवंविधा अनेके सन्दर्भाः पुराणभौगोलिकविवरणानां प्रामाणिकतां साधयन्ति। पुराणेषु प्रधानतया भारतवर्षस्य गौणतया चान्यदेशानामपि किञ्चिद् विवरणं निर्दिष्टमस्ति, परमिदानीं दीर्घकालव्यवधानात्, प्रकृतिपरितर्तनात्, राजनीतिविप्लवाच्चांशिकरूपेण पुराणनिर्दिष्टानां नद-नदी-जनपदादीनां यथार्थतः परिचयोऽद्यत्वेऽतिकठिनो जातः। परं प्रसन्नताया विषयोऽस्ति यत् पुरातत्त्वानु-

---

१. धर्मे चार्थे च कामे च मोक्षे च भरतर्षभः!
यदिहस्मि तदन्यत्र यन्नेहस्तिन तत् क्वचित्॥ स्व० प० ५।५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शीलननिरतानां गवेषकाणां परिश्रमेण पुराणभौगोलिकविवरणसत्यता शनैः शनैः प्रमाणीभवति। सिन्धुघाटीसभ्यता पुराणानां सविधे समागच्छति।

अथर्ववेदस्य पृथ्वीसूक्ते मातृभूमिं प्रति भारतीयभावनाया अत्यन्तमुदात्तं वर्णनं विद्यते। यथा माता स्वकीयं तनयं वात्सल्येन दुग्धं पाययति, तथैवास्माकं मातृभूमिरपि विभिन्नाभिः पयस्वतीभिर्भारतीयां जनतामाप्यायति। अत एवेयं विश्वम्भरा धात्री चोच्यते—'माता भूमिः पुत्रो अहं पृथिव्याः'[1] इति। अस्मिन् मन्त्रे मातृभूमेः स्वरूपस्य, तथा तया सह मानवहृदयस्य चैकताया यादृशमुत्कृष्टं रूपं वर्तते, तादृशमन्यत्रास्ति दुर्लभम्। भारतीयसंस्कृतेः सत्यस्य च यःप्रकाश उपलभ्यते, तस्योद्गमो मातृभूमिरेवास्ति[2]। वायुपुराणेनापि पृथिव्या अनन्तेति नाम निर्दिशता सा सर्वभूताश्रया जननी प्रोक्ताऽस्ति—

जननी सर्वभूतानां सर्वभूतधरा धरा।
नानाजनपदाकीर्णा नानाधिष्ठानपत्तना॥
नानानदनदीशैला नैकजातिसमाकुला।
अनन्ता गीयते देवी पृथ्वी बहुविस्तरा॥
तस्मिन् स्वायम्भुवाद्यास्तु मनवः स्युश्चतुर्दश।
अतीतावर्तमानाश्च भविष्या ये च वै पुनः॥
तैरियं पृथिवी सर्वा सप्तद्वीपा सपत्तना।
पूर्णं युगसहस्रं बु परिपाल्या नरेश्वरैः॥

(प्र० पा० ५।५०-५१)

पृथ्वीसूक्ते राष्ट्रं त्रिविधं निर्दिष्टमस्ति—निकृष्टम्, मध्यमम्, उत्तमं च। तत्र निकृष्टकोटिके राष्ट्रे भौतिकसम्पत्तेः पूर्णतया विकासो दृश्यते। मध्यमे राष्ट्रे जनताया बुद्धौ सर्वदा चाञ्चल्यमवतिष्ठते। उत्तमस्य राष्ट्रस्य वैशिष्ट्यं तत्रत्या संस्कृतिर्भवति। अतो वेदमन्त्रद्वारा उत्तमराष्ट्रे मानसिकस्य तेजसः, शारीरिकबलप्राप्तेश्च प्रार्थना कृता विद्यते। पृथ्वी हि राष्ट्रस्य शरीरम्, जनता प्राणः, संस्कृतिश्चास्ति मनः। एषां त्रयाणां सम्मेलनेनैव राष्ट्रस्यात्मनो भवति निर्माणम्। अतो यस्मिन् कस्मिन्नपि राष्ट्रे समुत्पद्य तत्रत्यायाः संस्कृतेः समुन्नतिकरणं तत्रत्यायाः प्रत्येकव्यक्तेर्भवति परमं कर्तव्यम्। वस्तुतः

---

१. अथर्ववेदः—(१२।१।१२) २. यस्य हृदयं परमे व्योमन् सत्येनावृतममृतं पृथिव्याः। सा नो भूमिस्त्विषिं राष्ट्रे दधातूत्तमे। (१।२३, २।४४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वसंस्कृतेः समुन्नतिद्वारैव मानवो राष्ट्रे जन्मग्रहणस्य ऋणान्मुक्तो भवितुमर्हति। यथा प्रत्येकव्यक्तिः स्वकीयं नैजं वैशिष्ट्यं बिभर्ति, तथैव प्रत्येकराष्ट्रस्य नैजी विशेषता भवति, यथा तद्राष्ट्रमपरराष्ट्रापेक्षया समुन्नतम्। अतस्तेन तत्रभारतस्य वैशिष्ट्यमस्माभिर्वेदपुराणद्वारैवावगन्तुं शक्यते। अन्यराष्ट्रापेक्षया भारतस्य वैशिष्ट्यमत्रैवास्ते, यत्तत्राध्यात्मिके ज्ञाने, स्वधर्मपालने, परोपकारकरणे, संयमे, राष्ट्रस्योद्धारे, सर्वसमुन्नतौ च बलं दत्तमस्ति।

यदि वेदो भारतीयसंस्कृतेः सर्वोच्चमुद्गमं स्थानमस्ति, तर्हि पुराणानि सन्ति भारतीयसंस्कृतेः शाश्वतानि स्रोतांसि। हिन्दुजातिसंस्कृतिसम्बन्धिनः कदाचिदेव केचन एवंविधा विषयाः सम्भवेयुः, येषु प्रकाशः पुराणैर्न दत्तः स्यात्। वेदानन्तरं भारतीयसंस्कृतेर्वास्तविकं स्वरूपमस्माभिः पुराणैरेवावगन्तुं शक्यते। पुराणानुसारं पुराणानि हि धार्मिक-सामाजिक-सांस्कृतिक-राजनीतिक-आर्थिकादिषु क्षेत्रेषु लोकवर्गस्य विचाराणां कार्याणां च यथार्थ चित्रमुपस्थापयन्ति। पुराणानामनुशीलनेनास्माभिः स्वजीवनोद्देश्यपूर्तये आदर्शमयः सदुपदेशो लभ्यते। यतो हि पुराणेष्वेकत्रैवैहिकामुष्मिकहितसिद्धये उदाहरण-प्रत्युदाहरण-विविध कथानकोपकथानकद्वारा शुभकर्मणि प्रवृत्तयेऽशुभकर्मभ्यश्च निवृत्तये उपदेशः दत्तोऽस्ति 'रामादिवत् वर्तितव्यं न रावणादिवत्' इत्यादि।

पुराणानुसारमस्माकं देशस्य नामास्ति भारतवर्षम्। तथात्र निवासिन्याः प्रजाया नामास्ति भारती। पुराणेषु भारतवर्षस्य भौगोलिको विस्तारः समुद्रादुत्तरे हिमालयाच्च दक्षिणे प्रोक्तोऽस्ति[1], तथा कन्याकुमारीतो हिमालये गङ्गाया उद्गमस्थानपर्यन्तं विस्तृतो भूभागो भारते सम्मिलितोऽभिमतोऽस्ति[2]। निरुक्तशास्त्रदृष्ट्या वायु-मत्स्यपुराणयोर्भारतवर्षस्य निर्वचनं कृतमस्ति यन्मनोः प्रजानां भरण-पोषणकारणादेका संज्ञा भरत इत्यस्ति[3]। एतन्निरुक्तेराधारेणायं देशो भारतमित्युच्यते।

इदमस्य रहस्यम्—भरणपोषणात्मकेन गुणेन मनुर्भरतः प्रोक्तोऽस्ति, तथा तत्पद्धत्यनुसारं तत्सन्ततयो यत्र निवसन्ति, तन्नाम भारतमिति जातम्। यद्वा राज्ञः ऋषभदेवतनयस्य भरतस्य नाम्नाऽयं देशो भारतमित्युच्यते तथा चोक्तं

---

१. उत्तरं यत् समुद्रस्य हिमवद्दक्षिणं च यत्।
वर्षं तद् भारतं नाम यत्रेयं भारती प्रजा॥ (वा० पु० ४५।७५)

२. आयतो ह्याकुमारिक्यादागङ्गाप्रभवाच्च वै।
तिर्यगुत्तरविस्तीर्णः सहस्राणि नवैव तु॥ (वा० पु० ४५।८१)

३. भरणाच्च प्रजानां वै मनुर्भरत उच्यते।
निरुक्तवचनाच्चैव वर्षं तद्भारतं स्मृतम्॥ (म० पु० ४५।७६)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीमद्भागवते—'अजनामं नामैतद्वर्षं भारतमिति यत आरभ्य व्यपदिशन्ति' (५।७।३) मार्कण्डेयपुराणे स्वायम्भुवमनुवंशवर्णनप्रसङ्गे प्रोक्तमस्ति यद् नाभिपुत्रेण ऋषभदेवेन स्वकीयेषु शतपुत्रेषु ज्येष्ठं सर्वगुणश्रेष्ठं भरतं स्वराज्येऽभिषिच्य तपस्तप्तुं पुलहाश्रमगमनसमये हिमवर्षनामकं निजं राज्यं भरताय प्रदत्तम्। तस्मात् समयात्तत् हिमवर्षं भारतवर्षमिति नाम्ना प्रख्यातं जातम्[१]। वायुपुराणे तु प्रोक्तमस्ति यद् दौष्यन्ते र्भरतस्य (सर्वदमनस्य) नाम्नाऽस्माकं देशो भारतमिति निगद्यते—

चक्रवर्ती ततो जज्ञे दौष्यन्तिर्नृपसत्तमः।
शकुन्तलायां भरतो यस्य नाम्ना तु भारतम् ॥९९।१६३॥

एवं तत्तत् पुराणेषु भारतस्य नामकरणविषये क्रमशः त्रीणि मतान्युपलभ्यन्ते।

पुराणेतिहासयोर्या भारतवर्षस्य वन्दना विद्यते, तासु महाभारतस्य भीष्मपर्वणि भारतवन्दना भावदृष्ट्याऽत्यन्तमुत्कृष्टाऽस्ति[२]। तेषु पद्येषु येषां चक्रवर्तिनां राज्ञां नामानि गणितानि सन्ति, तेषां धार्मिको भावः, प्रजावात्सल्यम्, सत्यपालनम्, परोपकारमयं जीवनम्, निरन्तरं लोककल्याणकामना तैः स्थापिता, आदर्शमयी व्यवस्था च भारतीयगौरवस्यास्ति विषयः। ये महापुरुषाः स्वदेशस्य स्वकालस्य च प्रतिनिधयो भवन्ति, तेषामेव वृत्तान्तोपस्थापनं पुराणेतिहासयोरनिवार्यं जायते। एतदनुसारमेव तत्र तेषां चरित्रचित्रणं कृतमस्ति। पुराणेषु भारतवर्षं स्वर्गादप्युत्कृष्टं वर्णितमस्ति। तत्र सिद्धान्तितं वर्तते यद् देवाः स्वर्गे गीतं गायन्ति यत्ते मानवाः सन्ति धन्यतमाः, ये भारते जन्म गृह्णन्ति। भारतवसुन्धरा हि स्वर्गादपि उत्कृष्टास्ति, यतो हि तत्रत्या जनाः स्वर्गं मोक्षं चोभयं लब्धुं शक्नुवन्ति। ये स्वर्गे भुक्तदेवत्वभोगास्ते मोक्षाय भूयो भारते जन्म गृह्णन्ति। सुरत्वं प्राप्तानामस्माकमपेक्ष्याधिकं सुकृतिनस्ते। अतोभारतवर्षे जन्मग्रहणं नास्ति साधारणस्य पुण्यस्य फलम्[३]।

---

१. हिमाह्वयं दक्षिणं वर्षं भरताय ददौ पिता।
तस्मात्तु भारतं वर्षं तस्य नाम्ना विदुर्बुधाः ॥ ५।४१।

२. प्रियमिन्द्रस्य देवस्य मनो वैवस्वतस्य वा।
पृथोस्तु राजन्! वैन्यस्य तथेक्ष्वाकोर्महात्मनः॥
अन्येषां च महाराज! क्षत्रियाणां बलीयसाम्।
सर्वेषामेव राजेन्द्र! प्रियं भारत! भारतम्॥ (म० भा० भी० प० ९।५।९)

३. गायन्ति देवाः किल गीतकानि धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदहेतुभूते भवन्ति भूयः पुरुषाः सुरत्वात्॥
(ग० पु० २।३।२४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपि च जम्बूद्वीपे वर्तमानेभ्योऽन्यर्षैवभ्यो भारतवर्षं सर्वश्रेष्ठं ज्येष्ठं चाभिमतम्, यतो हि अन्यानि वर्षाणि केवलं भोगस्थानानि सन्ति, किन्तु भारतं कर्मभूमिः प्रोक्तमस्ति। अत्र सत्कर्मानुष्ठानद्वारा मानवो भोगं मोक्षं चोभयमपि लब्धुं शक्नुयात्। तथाहि विष्णुपुराणे[1]। इदमस्य रहस्यम्—भारतभूरेव सदसत्कर्मानुष्ठानयोग्या भूमिः। भारतादन्या भूमयो हि सुखदुःखसाक्षात्काररूपस्य भोगस्य स्थानानि। अत्रैवानुष्ठितेन विहितसत्कर्मणा धर्मः, निषिद्धेन च कर्मणाऽधर्मो जायते, ताभ्यां च यथाक्रमं सुखदुःखे तद्भोगाश्च जायन्ते, न त्वन्यत्र समनुष्ठितेन कर्मणा तथेति भावः।

यदा काचिज्जातिः परस्परविद्वेषवशात् स्वकीयमादर्शमयं चरित्रं विस्मृत्यात्मनः स्वरूपं परित्यजति, अन्याधीना च भवति तदा विश्वस्य इतरजातयः तस्या उपेक्षणं कर्तुं प्रारभन्ते। तद्धार्मिका ग्रन्थाः पोषकल्पना, तत्पूर्वजा असभ्याः, तद्भाषा अव्यवहार्या, तद्देशवेशभूषादिकं लज्जाजनकम्, तदाचार-विचार-व्यवहारादिकं बालानां क्रीडनकम्, तद्भोजनं च वलहीनमित्याद्युक्त्वा तां जातिं सर्वथाऽयोग्यामुद्घोष्टुं चेष्टन्ते। एतन्नैसर्गिकनियमानुसारं विविधा जातयोऽन्येषां कुचक्रे समागत्य स्वकीयं स्वरूपं परिहरन्ति। तासामस्तित्वं केवलमितिहासपृष्ठेष्वेवाङ्कितमवतिष्ठते।

विश्वस्येतिहासोऽस्ति साक्षी यद् हिन्दुजातिर्विश्वस्मिन् सर्वतः वर्तते प्राचीनतमा। अस्याः पवित्रतममुद्देश्यं विद्यते, स्वधर्माचरणम्, परोपकारकरणम्, स्वार्थत्यागः, ईश्वरं प्रति अनन्यप्रेमप्रतिष्ठापनम्, समस्तं विश्वं विष्णुमयं मत्वा तत्र श्रद्धाचरणं च। अतस्तत्र विश्वबन्धुत्वभावनया 'वसुधैव कुटुम्बकम्' इति पुनीतो भावः सर्वदा तिष्ठति। या हिन्दुजातिः प्रारम्भतोऽन्यासु जातिषु शासनं करोति स्म, सैव दैववशाद् अन्याधीना भूत्वा शासिता शोषिता चाभवत्। सर्वप्रथमं हिन्दुजातौ बौद्धानां शासनमजायत, ततो यवनानामाक्रमणमभूत्। अनयोः शासनाधीनयाऽपि हिन्दुजात्या शिक्षापद्धतिः स्वाधीनैव रक्षिता। एतत्परिणामस्वरूपेण कुमारिलभट्ट-स्वामिशङ्कराचार्यसदृशा अद्भुतप्रतिभाशालिनो मनीषिणोऽस्यां जातावुत्पद्य बौद्धसाम्राज्यं समूलमुन्मूल्य बौद्धान् भारताद् बहिः कृतवन्तः।

---

१. तत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने !
यतो हि कर्मभूरेषा ततोऽन्या भोगभूमयः ॥
इतः सम्प्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति वै ।
तिर्यक्त्वं नरकं चापि यान्त्यतः पुरुषा मुने ॥ (२।३।४।२२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यवनशासनकालेऽपि शिक्षापद्धतिर्हिन्दूनामधीनैव सुरक्षिताऽवर्तत, येनानेके धर्मवीरा हिन्दवः स्वजातेर्धर्मस्य च संरक्षणे कृतसङ्कल्पा आसन्। महाराणाप्रताप-छत्रपतिशिवाजी-गुरुगोविन्दसिंह-हकीकतरायप्रभृतिभिर्महापुरुषैश्छिन्ना भिन्ना वा हिन्दुजातिः प्रणाशात् संरक्षिता, राजस्थानीयाभिः पद्मिनीप्रभृतिभिः सतीनारीभिश्च जौहरव्रतं स्वीकृत्य प्रज्वलितेऽग्नौ स्वानि शरीराणि भस्मसात्कृत्वा भारतीयकुलयोषितामादर्शभूतः पातिव्रत्यधर्मः परिरक्षितः। परिणामस्वरूपं यवनसाम्राज्यस्य सत्ता शिथिला जाता। अस्मिन्नेवासरे योरपनिवासिन्या आंग्लजातेर्भारतवर्षे प्रवेशोऽभवत्। शनैः शनैः शासनस्याधिकारस्तस्या हस्तगतो जातः। तत्प्रमुखेन शासकेन मार्डमेकालेमहोदयेन यदा दृष्टं यद् भारतीयाः पाश्चात्यानुपेक्षन्ते घृणादृष्ट्या च तान् पश्यन्ति, तदा तेन शिक्षापद्धतिं स्वाधिकारे कृत्वा एवंविधानि पाठ्यपुस्तकानि निर्मापितानि, यान्यधीत्य हिन्दुजातिः स्वं वास्तविकमितिहासं विस्मृत्यांग्लजात्या सह सम्मिलिता स्याद्। तेषु पुस्तकेषु स्थले स्थलेऽङ्कितमासीद् यदार्या न सन्ति, भारतस्यादिनिवासिनः, किन्तु मध्य एशियातस्तत्रत्यानां दलद्वयं प्रचलितम्। तत्रैकदलं यूरोपाभिमुखं प्रस्थितम्, द्वितीयं च भारते आगत्य न्यवसत्। अतो योरपवासिनी आंग्लजातिस्तथा भारतनिवासिनी हिन्दुजातिश्च द्वे अपि एकस्य पितुः स्तः सन्तत्यावुभयत्र भेदभावोऽनुचितः। प्रथमं ये आर्या भारते आगतास्ते विद्याविहीना गुणहीना असभ्या आरण्यका इव महामूर्खाः कृषकाश्चासन्। ते कृषिं कर्तुं जानन्तिस्म, पशून् पालयन्ति स्म, गोचारणसमये यानि गीतानि गायन्ति स्म, तानि एकत्र सङ्गृह्य वेदनाम्ना व्यवहर्तुं प्रारभन्।

अतो न वेदः कस्यचन महत्त्वस्य पुस्तकमस्ति, आर्याणां संस्कृतभाषा मृतभाषाऽस्ति। हिन्दी चाल्पसङ्ख्यकानां भाषा वर्तते, हिन्दूनां वेषभूषादिकं घृणास्पदं तथा तेषां भोजनं बलहीनं विद्यते, एषां व्यवहारो लोकविरुद्ध आचार-विचाराश्चासभ्यानां चिह्नानि सन्ति। इत्यादि

पाश्चात्यैरनुभवः कृतो यद् भारतवर्षे यावद् विधिवद् वेदपाठो भविष्यति, तथा पुराणानां प्रवचनं प्रचलिष्यति, तावद् हिन्दुधर्मस्य, हिन्दुजातेः, हिन्दुसंस्कृतेश्च न काऽपि क्षतिर्भविष्यति। एनमनुभवं लक्ष्यीकृत्य तैर्लेखनी गृहीता, अनेकानि पुस्तकानि च रचितानि, येषु पुराणानामसत्यताम्, तत्कथासु परस्परं विरुद्धताम्, असम्भवताम्, अदूरदर्शितामश्लीलतां मूर्खतां च साधयितुं महती कुचेष्टा जाता। तानि पुस्तकानि पठित्वाऽभिनवशिक्षितवर्गः साधारणजनता च व्यामोहिता सती पुराणान्युपेक्षितवती। एवंविधाया दूषितशिक्षापद्धतिदृष्टेः परिणामोऽभवद् यद् आंग्लशिक्षितसमुदायस्य मानसिकः स्तर एव परिवर्तितः। आंग्लशिक्षादीक्षिताः स्वान् भारतीयान् कथयितुं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सङ्कोचं तथा आंग्लानामनुकरणे गौरवं चानुभवन्। एवंविधां शिक्षामनुभूय लार्डमेकालेमहोदय आत्मानं कृतकृत्यं मत्वा महत्या प्रसन्नतया स्वपितुः पार्श्वे एवमांशयकमेकं पत्रं व्यलिखत्—'तात ! ये हिन्दव आंग्लशिक्षां प्राप्नुवन्ति, ते स्वधर्मान्न सहानुभूतिं कुर्वन्ति। कियन्तस्तु नास्तिका भवन्ति, केचन च ख्रीष्टधर्मं मन्तुं प्रवर्तन्ते। अनया शिक्षया अहमेकं वर्गमेवंविधं निर्मातुमिच्छामि, योऽस्माकं तेषां च मध्येऽनुवादककार्यं कर्तुं शक्नुयात्। वर्गोऽयं रक्त-रङ्गयोर्भारतीयो भविष्यति, परन्तु विचारेषु नूनमांग्लवद् भविष्यति[1]' इति।

अनया लार्डमेकालेविषाक्तशिक्षया शिक्षितसमुदायो हिन्दुधर्म-हिन्दुसंस्कृति-हिन्दुजातीनां प्रबलः शत्रुरभवत्, तथा स्वमतीतं गौरवं विस्मृत्या-वतारवाद-वर्णाश्रमव्यवस्था-मूर्तिपूजन-मृतश्राद्धादीन् वैदिकपौराणिकविषयान् खण्डयितुं प्रवृत्तः। अस्या अभिनवशिक्षाया भारतीयेषु विद्यार्थिषु महान् कुप्रभावो जातः। अवरङ्गजेबप्रभृतिभिर्यवनैर्यावती हानिर्नाजायत, तावती हानिरनया शिक्षया शिक्षितहिन्दूनामधारिभिर्जाता।

कस्या अपि जातेरुत्थानं पतनं च तज्जातीयसाहित्येऽवलम्बितं भवति। यस्या जातेः स्वधार्मिकसाहित्यतो घृणा जायते, तस्याः पतनमनिवार्यतया भवति। इयमेव दशाऽद्यत्वे हिन्दुजातेरुपस्थिताऽस्ति। साम्प्रतमस्या जातेर्विश्वासो निजधार्मिकग्रन्थेभ्यो विच्छिद्यते। आंग्लानां यवनानां च स्वधार्मिकग्रन्थेषु यावान् विश्वासो वर्द्धते, तावदेव हिन्दुजातिः स्वधार्मिक-ग्रन्थानामध्ययनाद् विमुखा भवति। एतस्य मुख्यं कारणमस्ति धार्मिकशिक्षायाः प्रचारप्रसारयोरभाव एव।

यस्यां शिक्षायां धर्मस्य न भवति स्पर्शः, तया शिक्षया युवकेषु युवतीषु च सद्गुणानां प्रादुर्भावस्य स्वप्नदर्शनमुपहासास्पदातिरिक्तं किमपि न सम्भवति। सुशिक्षाद्वारैव विवेकशीलाया बुद्धेर्विकासो भवति, ज्ञानस्य वृद्धिर्जायते, कर्तव्यपालनस्य रुचिरुत्पद्यते, ईश्वरीयालौकिकशक्तिषु विश्वासः सम्भवति, महत्सु सम्मानभावो जागर्ति सद्गुणार्जने उत्साहो वर्द्धते, स्वधर्म-

---

1. **Macauley's Letters to his father.**
No Hindu who has received education ever remains sincerly-attached to his religion. Some continue to profess it as a matter of policy, but others profess themselves pure atheist and some embrace christianity. We desire to form a class who may be interpretors between us and the millions we govern, a class of persons Indinn in blood and colour, but English in taste, it. opinion, in morals and in intellect. (Purana*varma*).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पालने प्रवृत्तिर्भवति, मानवः सत्कर्मसु सदा प्रवर्तते तथा दुष्कर्मणो निवर्तते, स्वदेशगौरवरक्षणे च मनो लगति।

विश्वस्मिन् प्रत्येकदेशस्य कृते स्वसाहित्यस्यावश्यकता भवति, यतो हि साहित्यमेव सभ्यता-संस्कृत्योः परिचायकं भवति। यस्य देशस्य सभ्यता-संस्कृत्यौ यावत्यौ समुन्नतिशिखरारूढे भवतः, तस्य साहित्यं तावदेव समुन्नतिशीलं भवति। हिन्दूनां संस्कृतसाहित्येन समं समृद्धं विकासशीलं च साहित्यं नास्ति विश्वस्य कस्या अपि जातेः सविधे। यदि भाषा-भाव-दर्शन-आचार-विचार-रीति-नीति-शिल्प-कला-पुरावृत्त-विविधज्ञान-विज्ञानादीनि एकत्र द्रष्टुं समीहा स्यात्तर्हि संस्कृतसाहित्यस्य वेद-स्मृति-पुराणानि द्रष्टव्यानि, यतो हि सन्त्येतानि एषामागाररूपाणि। समेषु तेषु चतुर्णां वर्णानामाश्रमाणाञ्च रीति-नीति-आचार-विचारादीनां विस्तृतस्तर्कपूर्णश्चोल्लेखो विद्यते। पुराणद्वारा प्राचीनेतिवृत्त-सृष्टि-प्रलय-वंश-वंशावली-युग मन्वन्तर-कल्पादीनां सम्यग् ज्ञानमुपजायते, तथा पुराणानामाख्यानगाथाभिर्वेदानां वास्तविकोऽर्थोऽवगन्तुं शक्यते। पुराणैः स्वपूर्वजानां निर्मलो विचारो ज्ञायते, तथा पुराणानामनुशीलनेनैव विभिन्नजातीनामुत्पत्तिः, समस्तस्य विश्वस्य विभिन्नभागानां भिन्न-भिन्ननियमाश्च ज्ञायन्ते।

पुराणज्ञानं विना संस्कारोऽन्धकारमयो भवति। उपासनाया भाण्डारम्, मुक्तेर्द्वारम्, ज्ञानस्याकारः, भक्तेः साधनम्, कर्मणां प्रतीपश्च पुराणमेवास्ति। भगवदवतारवैशिष्ट्यं वर्णयन्त्यः पुराणानां गाथा जीवमीश्वरशरणे समुपस्थापयितुमत्यन्तमुपयोगिन्यः सन्ति। किमधिकं वक्तव्यम्, ये ये विषया अन्वेष्टुमिष्टाः स्युस्ते सर्वेऽपि पुराणेषु प्राप्तुं शक्यन्ते। महाभारतसम्बन्धे भगवता व्यासेन तु स्पष्टमुद्घोषितमस्ति, यद् ये हि विषया महाभारते वर्णिताः सन्ति, त एव सर्वत्र विवेचिता विद्यन्ते, यश्चात्र विषयो न विवेचितोऽस्ति स कुत्राप्यन्यत्र न दृश्यते। तदनुसारं राजवंशानां गणतान्त्रिक-प्रणालीतः सांविधानिक-सुव्यवस्थितसमुदार-कल्याणकारिशासन-व्यवस्थायाः सङ्केतोऽपि मिलति।

ईशापूर्वं षष्ठशताब्दीतः प्रागपि भारते राजनीतिकविचारधारा प्राप्यते। बुद्धसमये गणतान्त्रिक साम्राज्यवादिन्यौ राजनीतिप्रवृती समानान्तरे प्रचलिते आस्ताम्। राजसंस्थायाः सम्बन्धे महाभारतस्य शान्तिपर्वणि प्रोक्तमस्ति यत् समस्तस्य जीवलोकस्याधारो राजधर्मोऽस्ति, यतो योग-क्षेम-सुवृष्टिव्याधि-मरण-भयानि राजन्येवावलम्बितानि भवन्ति[1]।

---

१. राजमूला महाभाग ! योग-क्षेम-सुवृष्टयः।
प्रजासु व्याधयश्चैव मरणं च भयानि च॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रैव पुनरुद्योगपर्वणि शान्तिप्रयासाय दूतभूतश्रीकृष्णद्वारा युधिष्ठिरं सन्दिशन्त्या देव्या कुन्त्या वचनं यथा—वत्स ! कालो राज्ञः कारणं भवति, आहोस्विद् राजा कालस्य कारणं जायते; इत्यत्र त्वया सन्देहो न विधेयः, वस्तुतो राजैव कालस्य कारणमस्ति[१]।

राजा हि सत्ययुग-त्रेता-द्वापर-कलियुगानां स्रष्टाऽस्ति, तस्मात् सत्कर्मद्वारा त्वया सत्ययुगमुपस्थाय स्वर्गप्राप्तिर्विधेयेति मम निश्चिता मतिरस्ति। अपिच 'सूच्यग्रं न च दास्यामि विना युद्धेन केशव !' इति दुराग्रहिणो दुर्योधनस्य निश्चयं निशम्य सा स्वपुत्रान् प्रति सगर्वं समयोचितमेव सन्दिदेश—

एवं धनञ्जयो वाच्य एवं वाच्यो वृकोदरः ।
यदर्थं क्षत्रिया सूते तस्य कालोऽयमागतः ॥

ततस्तदनुसारमेव स्वकीयं कर्तव्यं कृत्वा ते पाण्डवा निजमनोरथानुकूलं स्वं राज्यं प्राप्तवन्तः ।

महान्तोऽपि वैज्ञानिका भूगर्भविद्याविशारदा विद्वांसः परिश्रमेण सहासङ्ख्यं द्रव्यराशिं व्ययीकृत्वाऽपि यदन्वेषणं कर्तुं न पारयन्ति, तानि पुराणानि अनायासेनोपदिशन्ति । पुराणानां विभिन्नेषु प्रसङ्गेषु यानि वन-वर्वत तीर्थ-पीठ-क्षेत्र-नद-नदी-सरोवरादीनां विवरणानि प्रदत्तानि सन्ति, तैरनुसन्धानकर्तॄणां महत् साहाय्यमवाप्यते ।

न केवलं कविकुलकलाधरकालिदास-भास-माघ-भारवि-भवभूति-श्रीहर्ष-प्रभृतिभिर्भारतीयैरमरमहाकविभिरेव विभिन्नानि पुराणानि स्वस्वमहाकाव्यानामाधरीकृतानि, प्रत्युत टालस्टाय-होमर-मिल्टन-शेक्शपीयरप्रभृतीनां पाश्चात्यलेखकानां ग्रन्थावलोकनेन स्पष्टं प्रतीयते यत्तैरपि यत्र तत्र पौराणिकैराख्यानकैः स्वग्रन्थानां सज्जीकरणे न सङ्कोचः कृतोऽस्ति। एवं निःशंसयं वक्तुं शक्यते यद् विश्ववाङ्मये पुराणानामप्रतिमं स्थानमस्ति। कालक्रमेणाद्यत्वे संस्कृतवाङ्मयस्य पठन-पाठनयोर्ह्रासात् पुराणानुशीलन-श्रवण-मनन प्रचार-प्रसाराणामुत्तरोत्तरं ह्रासो जायते ।

यत्र 'विद्यावतां भागवते परीक्षा' इत्यनुसारं पुराणं विद्वत्ताया निकषा अभिमताऽऽसीत्, तत्र तदेव संस्कृतज्ञानशून्यानामल्पज्ञानामुपहासपात्रं जायते । अद्यत्वे विविधाभिः कुतर्कपूर्णाभिर्व्यर्थशङ्काभिः पुराणानि व्यर्थीक्रियन्ते, परं पुराणं हि एका विशिष्टा विद्या वर्तते। पुराणविद्या हि गुरुमन्तरा सम्यक् नावगन्तुं शक्या। सद्गुरुद्वारा एषां शङ्कायाः समाधानं कर्तुं शक्यते तथा तेषां वास्तविकोऽर्थस्तद्रहस्यं चावगन्तुं शक्यते, नान्यथा ।

---

१. कालो वा कारणं राज्ञो राजा वा कालकारणम् ।
इति ते संशयो मा भूद्राजा कालस्य कारणम् ॥ (१२।१७)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतवाङ्मये पुराणानामेकं विशिष्टं स्थानमस्ति, तथा तेषां महन्-महत्त्वमपि विद्यते। सर्वसाधारणजनेषु सभ्यता-संस्कृत्योः प्रचारः प्रसारश्च पुराणानां प्रधानं कार्यमस्ति। पाश्चात्त्या इतिहासवेत्तारोऽपि पुराणानि भारतीयानाममूल्यं निधिं मन्यन्ते। यद्यपि भारतीयसाहित्ये पुराणैः सहेतिहासस्यापि नाम समागच्छति, तथापीतिहासे तासामेव घटनानां वर्णनं विद्यते, या भूतकाले व्यतीता, किन्तु पुराणानि भविष्यद्घटनानामपि सङ्केतं कुर्वन्ति। अतः पुराणानां विषय इतिहासादप्यधिको व्यापको विस्तृतश्च विद्यते। वास्तविक इतिहासो हि यथार्थं चित्रमुपस्थापयति। कस्या अपि मानवजातेरितिहासस्तदैव पूर्णो भवितुमर्हति, यदा तस्य कथानकं सृष्टेरारम्भतः क्रमबद्धरूपेण लिखितं स्यात्। इदं हि रूपं पुराणेषु पूर्णतया प्राप्यते। आधुनिकैरितिहासकारैरस्याः शैल्या उपेक्षा कृता, परन्तु इङ्लैण्डस्य प्रसिद्धेन विचारशीलविदुषा एच्० जी० विल्सनेन स्वकीयायामितिहासस्य रूपरेखायां पौराणिकप्रणाल्या एवानुकरणं कृतमस्ति। तेन तत्र मानवसमाजस्येतिहासलेखनात् पूर्वं जीवः किं किं रूपं धत्ते, तथा तस्य क्रमिको विकासः कथं जायते, इत्यादेरपि मनोरमं विवेचनं कृतमस्ति।

प्राचीनभारतस्यैतिह्यं पुराणेष्वेव निहितं सुरक्षितं चास्ते। सौभाग्येनास्माकमधुनातना अपि केचनैतिह्यविदो भारतस्येतिहासनिर्माणे साम्प्रतं पाश्चात्त्यानां मुखापेक्षितां विहाय पुराणसाहाय्यं गृह्णन्ति। पुराणेषु विविधानां विषयाणां साकल्येनैकत्र समवायात्—'श्रुतिस्मृत्युदिते नेत्रे पुराणं हृदयं स्मृतम्' इत्यनुसारं पुराणं हृदयं निगद्यते। एवं नेत्रं विना मानवो जीवितुं शक्नोति, परं हृदयं विना न कोऽपि जीवितुं पारयति। अतः 'आत्मा पुराणं वेदानाम्' इति स्कन्दपुराणीयं वचनं सङ्गच्छते।

हिन्दुशास्त्रेषु वस्तुकथनस्य त्रयः प्रकारा विस्तरत उक्ताः सन्ति—

यथा १—तथ्यकथनम्। २—रूपकथनम्। ३—अतिशयोक्तिकथनं च।

तत्र यद् वस्तु यादृशं स्यात्तस्य तादृगेव वर्णनं तथ्यकथनमस्ति। प्रकारोऽयं वैज्ञानिकानां कृते उपयोगी वर्तते। यत्र रूपकालङ्कारमाश्रित्य किञ्चिदुच्यते तद् रूपककथनं विद्यते। प्रणालीयं प्रायो वेदेषूपलभ्यते। यथा सूर्यकिरणे उपलभ्यमानानि सप्तरङ्गानि अनुक्त्वाश्वानां रूपकं प्रदत्तमस्ति। पुराणेषु वस्तुवर्णनार्थमतिशयोक्त्यलङ्कारस्याश्रयो गृहीतोऽस्ति। यथा इन्द्रवृत्रासुरयुद्धे इन्द्रवृत्रासुरौ राजरूपेणाङ्कितौ स्तः। एवं वर्षावर्णनं त्रिषु साहित्येषु विशेषदृष्ट्या कृतमस्ति। ज्यौतिषविज्ञानं हि कस्मिन् नक्षत्रे कीदृग्वायुर्वहति, कथं मेघ उत्पद्यते, कियती वृष्टिर्भविष्यति, वृष्टेरवरोधकः कोऽस्ति, कथं च भवति तस्य विनाश इति तथ्येन विचारयति। वेदो वृत्रं वृष्टिनिरोधकं तत्त्वमिद्रं च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृष्टिकारकं मन्वानोऽनयोः तत्त्वयोरुत्पन्नं सङ्घर्षमिन्द्रवृत्रयुद्धद्वारा निरूपयति। पुराणसाहित्यं चातिशयोक्त्या इन्द्रं देवानां राजानं वृत्रं चासुराणामधिपतिमुक्त्वा देवासुरसङ्ग्रामं वर्णयति। अतः पौराणिककथानां सम्बन्धे तदीयप्रणाल्यां ध्यानं दत्त्वैव तदध्ययनं विधेयम्।

मनावानां कल्याणार्थं स्वयं नारायणेन व्यासात्मना पृथिव्यामवतीर्य पुराणानि रचितानि। वेदविज्ञानस्य मनोरञ्जकोपाख्यानरूपेणोपस्थापनं पुराणानामस्ति अद्भुता विशेषता। पुराणानां पपित्रे प्राङ्गणे एकतो भक्ते र्भागीरथी प्रवहति, तर्हि अपरत्र विज्ञानस्य स्रोतो निःसरद् दृश्यते। वेदेषु यासामाभासमात्रमस्ति पुराणेषु ता एव कथा मनोरञ्जकरूपेण विस्तृताः सत्यः एकं नवीनं रूपं धृतवत्यः। यथा 'इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्' इतीदमृग्वेदीयं वामनोपाख्यानं वामनादिपुराणेषु त्रिविक्रमनामकस्य वामनावातारस्य प्रसङ्गे विस्तृतरूपेण वर्णितमस्ति।

वस्तुतस्तु पुराणं विना वेदार्थोपबृंहणमेव न सम्भवति, यतो हि वेदेषु निर्दिष्टानामाख्यानानां व्याख्या पुराणेष्वेवोपलभ्यते यथा—'अहल्यायै जारः' इत्यस्य वेदप्रतीकस्य तात्पर्यं पुराणवर्णितमिन्द्रकृतमहल्याघर्षणं विना न स्फुटतां प्रयाति। अत एव वाल्मीकिरामायणेऽग्निप्रभृतीन् देवान् प्रति स्वयमिन्द्रेणाभिहितम्—

कुर्वता तपसो विघ्नं गौतमस्य महात्मनः।
क्रोधमुत्पाद्य तु मया सुरकार्यमिदं कृतम्॥

वेदा न सन्त्युपाख्यानमूलका ग्रन्थाः। तत्र तु स्थलविशेषे उदाहरणरूपेणोपाख्यानानि वर्णितानि सन्ति, परं पुराणेषूपाख्यानानामेकत्र समावेशोऽस्ति। अतः तत्रोपाख्यानबाहुल्यं विस्तारश्च दृश्यते। कस्याप्युपाख्यानस्य विस्तरतो वर्णनं वेदस्य नोद्देश्यम्, किन्तु तत्रत्यात्यन्तसंक्षिप्ताः केनचिद् विशेषेणोद्देश्येन वर्णिता याः कथाः सन्ति, ता एव पुराणेष्वाख्यायिकारूपं धृतवत्यः, यतो हि साधारणेषु मनुष्येषु कौतूहलपूर्वकं भगवद्भक्त्युत्पादनमाख्यायिकानामस्ति मुख्यमुद्देश्यम्। वेदपुराणयोरिदमेवास्ति विशेषतोऽन्तरं यद् वेदस्यातिसंक्षिप्ताः प्रसङ्गा पुराणेषु स्वतन्त्रतया समुपबृंहिताः सन्ति। अत एव वेदवत् पुराणनामपि प्रामाण्यमभिमतमस्ति, तथा तानि असामान्यदृष्ट्या दृश्यन्ते, श्रूयन्ते च। एतदतिरिक्तस्य वेदानुकूलस्य ज्ञानस्य कर्मणःउपासनायाश्च विवेचनमपि पुराणेषु स्पष्टतयोपलभ्यते, येन समेषां भवति महानुपकारः, तथा तेभ्यः पुराणेभ्योधर्मसम्बन्धिनो विविधा उपदेशा अपि प्राप्यन्ते।

अत्र नास्ति कश्चन सन्देहलेशो यद् भूयो भूय आक्रमणेन, राज्यविप्लवैः, अनेकविधपरिवर्तनेन च पुराणानां वास्तविकस्थितावद्यत्वे महदन्तरमुपस्थित-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मस्ति, न कियन्त्यपि पुराणानि पूर्णानि मिलन्ति। कतिपयानि स्वसङ्ख्यायाऽधिकानि रूपाणि अधारयन्, प्रक्षिप्तै रंशैः कियतां कलेवरमपि परिवर्तितम्। एकस्य पुराणस्य विषयाः क्वचनान्यपुराणेषु प्रविष्टाः। विदुषामनुमानमस्ति यत् सम्प्रदायवादिनां पारस्परिकेण सङ्घर्षेण स्वसम्प्रदायेतरान् हीनान् बोधयितुं पश्चाद् यत्र कुत्रचित् पुराणेषु प्रक्षिप्ता अंशा मेलिताः।

अस्तु—यदि केनचित् कारणेन पुराणेषु कुत्रचित् प्रक्षिप्ता अंशाः समगतास्तर्हि पुराणमात्रमप्रामाणिकं मन्तुं न युक्तमस्ति। यदि बहुमूल्येषु रत्नेषु कश्चन काचं मेलयेत्तर्हि किं तानि हेयानि जायन्ते? न हि कथमपि न सम्भवति, तेषां रत्नानां हेयता, किन्तु नीरक्षीरविवेकिनो हंसा इव विचारशीला विद्वांसः सदसती विचार्य हेयस्यांशस्य त्यागः, उपादेयस्यांशस्य च ग्रहणमेव बुद्धिमत्तां मन्यन्ते। यदि विवेकपूर्वकं मनोयोगेन पुराणानि पठ्येरन्, तर्हि प्रक्षिप्ता अंशा अवश्यं परिज्ञातुं शक्यन्ते। यत्र कुत्रापि भस्म-रुद्राक्ष-तिलक-तुलसी-मालादीनां निन्दा, तथा देवतानां परस्परविरोधमूलकानि वचनानि स्युस्तर्हि तानि सम्प्रदायवादिनां दुराग्रहिणां कुपुरुषाणां बुद्धेः परिणामस्वरूपाणि ज्ञेयानि। एतादृशा अंशा समन्वयवादिनो महर्षेर्व्यासस्य लेखनीतो न प्रसूता भवितुमर्हन्ति। तेंऽशास्तु सम्प्रदायवादस्य तरङ्गैः समुद्गता अवगन्तव्याः। भगवान् व्यासदेवस्तु समेषामैक्यप्रतिपादयितास्ति। पुराणेषु विभिन्ना कथा भिन्नभिन्नदेवतानामुपासका दृश्यन्ते, यतो हि हिन्दुशास्त्राणां विभिन्ना देवता एकस्यैव परब्रह्मणो रूपान्तराणि सन्ति। येषां केषामप्युपादाने स्वेष्टसिद्धिर्भवत्येवेति गीतायामपि भगवता श्रीकृष्णेन स्पष्टमुद्घोषितमस्ति[1]।

प्रायो लोके दृश्यते यद् यो मनुष्यो येन साकं प्रेम प्रकुरुते, स वाञ्छति, यद् मत्समः सर्वेऽपि अनेन सह प्रेम कुर्वन्तु नाम। एवं यो ऋर्षिर्यस्या देवताया आराधनेनात्मनोऽभीष्टसिद्धिमकामयत, तेन तस्या देवताया विशिष्टा भक्तिः कृता। तदनुगामिना शिष्यवर्गेणापि तस्या एव देवताया उपासनाप्रचारो विहितः। तदनुसारमेव तद्देवतोपासनाया फलप्रतिपादकानामुपाख्यानानामेकस्मिन्नेव पुराणे सङ्कलनं कर्तुं चेष्टाऽजायत। एवं यो मानवो यस्या देवताया भक्तोऽस्ति, स स्वेष्टदेवतामाहात्म्यप्रकाशकमेव पुराणमाद्रियते। एतेनैव कारणेन प्राचीनान्युपाख्यानानि नैकरूपाणि प्राप्यन्ते।

वेदमन्त्रेषु देवतानां स्तुतिमात्रं विद्यते। ब्राह्मणग्रन्थेषु यज्ञादीनां प्रसङ्गे यत्र तत्र कथानामपि संक्षेपत उल्लेखो विद्यते, किन्तु विस्तरत एकत्र कथाख्यानोपाख्यानानां सङ्ग्रह आवश्यक आसीत्। एतत्पूर्तये

---

१. यो यो यां यां तनुं भक्तःश्रद्धयाऽर्चितुमिच्छति।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्॥ (७।२१)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एव महर्षिणा व्यासेन पुराणानि प्रणीतानि। संस्कृतवाङ्मयसिद्धान्तानुसारं मानवजीवनस्यास्ति प्रधानं लक्ष्यमाध्यात्मिकजीवनसमुन्नतिद्वारा मोक्ष-प्राप्तिः। ज्ञानकर्मोपासनां माध्यमेन मानवमात्रस्य सुमार्गे नयनपूर्वकं मोक्षाधिकारित्वसम्पादनं पुराणानां रचनाया मुख्यमुद्देश्यमस्ति। विभिन्नेषु पुराणेषु भिन्नभिन्नकल्पानां कथाः सन्ति। पौराणिककथासु कुत्रचिदस्ति साम्यम्, क्वचन च वैषम्यमपि। तत्परिहारे विद्वांसः कल्पभेदमेवाश्रयन्ति[1]।

पुराण-रामायण-महाभारत-तन्त्रशास्त्राणि विश्वकोशकार्यं कुर्वन्ति। अद्यत्वेऽस्माकमुत्तरोत्तरमवनतेः कारणं सुशिक्षाया अभावोऽस्ति। भारते हि शिक्षाया उद्देश्यं न केवलमुदरपूर्तिरेव मन्यते। अतोऽस्माकं धार्मिक-आर्थिक-सामाजिक-नैतिक-शारीरिक-मानसिक-वाचनिकाध्यात्मिको ह्रासः शनैः शनैर्वर्द्धते। कस्यापि देशस्य धर्मस्य जातेश्चोन्नतिमूलकारणं तत्रत्या शिक्षैवास्ते। अत आलोचकानां मतमस्ति, यत् कस्यापि देशस्य जातेश्च धार्मिक-सामाजिक-आर्थिकसमुन्नतिर्द्रष्टुमिष्टा स्यात्तर्हि तदीयशिक्षाप्रणल्या निरीक्षणं कर्तव्यम्। बालका एव देशस्य धर्मस्य जातेश्च सन्ति विभूतयः। तेषां यादृशं चरित्रं सञ्चितं भविष्यति, तादृशमेव देशस्य धर्मस्य जातेश्च भविष्यमपि सञ्चितं भविष्यति। अतो बालकानां चरित्रसञ्चये विशेषतो ध्यानं प्रदाय तेभ्यो धार्मिकशिक्षाप्रदानस्य महत्यावश्यकतास्ति।

यवनख्रीष्टीयबालकानां कृते तु तत्संस्थास्थापितेषु शिक्षालयेषु प्रवर्तते तदीयधार्मिकशिक्षाप्रदानस्य व्यवस्था, किन्तु हिन्दुबालकानां कृपे धर्मनिरपेक्षसर्वकारद्वारा सञ्चालितेषु शिक्षालयेषु धार्मिकशिक्षा-प्रदानस्य वार्ता तु दूरे तिष्ठतु, धार्मिकग्रन्थानां नामापि न बालकैर्ज्ञायते। परिणामेऽस्माकं बालका ध्रुव-प्रह्लाद-लव-कुश-भरत-अभिमन्युप्रभृतीनां वीरबालकानां स्वप्नमपि न पश्यन्ति। इदं हिन्दूजातेर्ह्रासस्य न कारणं तर्हि किं सम्भवेत्? भारतीयशिक्षाया उद्देश्यं न केवलं धनोपार्जनमात्रमेवास्ति, प्रत्युत धर्मार्थमाकानां समानतया सेवनमनिवार्यं विद्यते। अर्थात्—त्रयाणां धर्मार्थकमानां समानरूपेण समादरो विधेयः। यो हि त्रिष्वेतेषु कस्मिंश्चिदे-कस्मिन् व्यासज्जते, स निकृष्टकोटिकः पुरुषो निगद्यते। यो द्वयोर्निरतो भवति, सोऽस्ति मध्यमकोटिको नरः। यश्च त्रिषु समानरूपेण प्रवर्तते, स उत्तमकोटिको मानवो गण्यते[2]।

---

१. क्वचित् क्वचित् पुराणेषु विरोधो यदि दृश्यते।
कल्पभेदादिभिस्तत्र व्यवस्था सद्भिरिष्यते॥

२. धर्मार्थकामाः सममेव सेव्या यो ह्येकसेव्यः स नरो जघन्यः।
द्वयोस्तु दाक्ष्यं प्रवदन्ति मध्यं स उत्तमो यो तिरतस्त्रिवर्गे॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीराम-कृष्ण-धर्मराज-युधिष्ठिर-नल-दधीचि-हरिश्चन्द्रादयो महापुरुषा सीताऽनसूया-सती-सावित्री प्रभृतयः सतीदेव्यश्चास्माकं राष्ट्रस्य चरित्रनायका आसन्। तेषां कथा भारतस्य सर्वासु भाषासु प्राप्यन्ते। संस्कृतस्य माध्यमेन सर्वभाषासाहित्येषु तच्चरित्रं निवद्धमस्ति यत्सर्वस्य लोकस्य निरन्तरमुपकारं करोति। एवं भारतस्य सर्वासां भाषाणां समुन्नतये संस्कृतस्य संरक्षणमस्ति अत्यावश्यकम्। सर्वासां भाषाणां समुन्नतिः संस्कृतसमुन्नतावेवालम्बितमस्ति। संस्कृतभाषाया सर्वासु भाषासु ऋणमस्ति। संस्कृतेन हि अतीतवद् वर्तमाने भाविनि युगे च सर्वोत्कृष्टां प्रतिष्ठां प्राप्तुं शक्यते। अतो बालक-बालिकानां कृते संस्कृतस्य शिक्षा आरम्भिकस्याध्ययनस्य कृते महत्त्वपूर्णाऽस्ति। अस्माकं चरित्राचारविचाराणां शुद्धता तदैव स्थिरा स्थास्यति यदाऽऽचारविचारचरित्राणामुद्बोधिकं संस्कृतं स्वयं पठितं स्यात्तथा स्वस्वगृहेषु च संस्कृतिः संरक्षणीया भवेत्। इत्थं सुशिक्षया प्रभावितं जीवनं भारतस्य मौलिकप्रतिभया सह स्थिरं स्थास्यति।

एवं भारतीया धर्मदर्शनाभ्यां सहैव जीवनस्य भौतिकेष्वङ्गेष्वपि पूर्वं पर्याप्तां रुचिं दधतेस्म। अस्माकं पुरुषार्थेषु धर्म-मोक्षातिरिक्तावर्थकामावप्यास्ताम्, याभ्यां जीवनस्य प्रवृत्तिमार्गे उचितं स्थानं प्राप्तमासीत्। या हि धर्मप्राणा हिन्दुजातिरन्यजातिषु शिरोमणिः, मानवमणिः, आदिगुरुः, शिक्षिका, पथप्रदर्शिका चासीत्, अद्यत्वे तस्या एव बालका धर्महीना अन्यानुकरणकुशला विस्मृतपूर्वजपुरुषार्था उच्छृङ्खलाचाराश्च भवन्ति निरन्तरमित्यहो दौर्भाग्यम्। यदि हिन्दुभिर्निजबालकेभ्यः पूर्ववर्तिनां स्वनिर्भीक बीरबालकानां कथानकमुपदिष्टं स्यात्तर्हि नैवं दशा सम्भवेत्।

अद्यत्वे धार्मिकशिक्षाया अभावस्य परिणामो जायते, यदाधुनिकानां बालकानां हृदयपटलेषु हिन्दुसंस्कृते रूपरेखा न विकसिता भवति, येन ते स्वपूर्वजानां गौरवमनुकरणादिकमादर्शं च सर्वथा विस्मृत्यानेकानर्थकरणे प्रवृत्ता भवन्ति, प्राचीनस्य भारतस्य नेषदपि अभिमानं तेषु भवति। न ते जानन्ति यदस्माकं धर्म-साहित्यपूर्वपुरुषाणां वास्तविकं स्वरूपं कीदृगासीत्, किञ्चास्ति कर्तव्यमस्माकम्।

तात्पर्यमिदमस्ति यद् बाल्यावस्थायां धार्मिकशिक्षाया अभावादद्यतनीया अस्माकं बालका हिन्दूधर्म-साहित्य-सभ्यता-संस्कृति-सामाजिकविषयाणां किमपि न जानन्ति, किन्तु पाश्चात्त्यधर्मरीति-नीति व्यवहारादिविषयेऽत्यधिकाः प्रवीणा जायन्ते। यस्य परिणामोऽस्माकं वैदिकधर्मसदाचार-भारतीय-नीति-रीति-विचार-व्यवहारादयो बालकानां हृदयेभ्य उत्तरोत्तरं निःसरन्ति,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रविशन्ति च वैदेशिका आचार-विचार-व्यवहारदयः। अद्यत्वेऽस्माकं बालकाः स्वकीयस्वरूप-भाषा-भावादिग्रहणे सङ्कुचन्ति, किन्तु विदेशीय-भावना-भाषा-आचार-विचार-व्यवहारादीनामनुकरणे स्वकीयं गौरवमनुभवन्ति। यत्रास्माकं शिक्षाया आदर्शः—'महाजनो येन गतः स पन्थाः' इत्यासीत्, तत्राद्यतनीया बालकाः स्वपूर्वजान् आरण्यकानसभ्यान् सङ्कीर्णविचाराननुदारांश्च मन्यन्ते।

इतिहासनाम्नाऽस्माकं बालका यत् शिक्ष्यन्ते, किं तदेवास्ति वास्तविक इतिहासः? अद्यतनीये इतिहासे तु बालकाः शिक्ष्यन्ते यद् हिन्दुसभ्यता साहित्यं चार्वाचीने स्तः। हिन्दुपूर्वजा मध्य एशियातो भारतमाक्रम्यात्रत्यानामादिनिवासिनामार्याणां सर्वस्वं लुण्ठितवन्तस्तथा तांश्च दूरे दक्षिणेऽपसारयन्। हिन्दवो भारतस्यादिनिवासिनो न सन्ति, किन्तु तेऽपि आंग्लजातिवद् बाह्यप्रदेशादागताः। किं सर्वविधज्ञानभाण्डाराणां भारतीयेतिहासस्रोतसां वेदानां पुराणानामस्मत्पूर्वजानां च विषये निर्मूलभ्रमोत्पादकचर्चैवास्तीतिहासः? नहि,कदापि नैतत् सम्भवति।

कथनस्येदमस्ति तात्पर्यं यद् या जातिः स्वान् धर्मग्रन्थान् आत्मनः पूर्वजांश्च विस्मरति, तान् प्रति दोषदृष्टिं वा कुरुते, सा न स्थायिनीं समुन्नतिं कर्तुं प्रभवति। अद्यतनशिक्षायाः प्रभावेण भारतीयानामियमेवास्ति दशा। पाश्चात्त्येन विचारकेण विदुषा मैक्समूलरेण सत्यमुक्तमस्ति—'या जातिः स्वकीयेन प्राचीनगौरवेण, इतिहासेन, साहित्येन च नात्मानं गौरवान्वितं मनुते, सा स्वजातीयजीवनस्य प्रधानमाश्रयं समुन्मूलयति।

एवं संस्कृतस्य महत्ता न केवलं तदगाधवाङ्मयस्य कारणेनास्ति, प्रत्युत भारतस्य वैदेशिकनीतयेऽपि तदध्ययनमत्यावश्यकम्। भारतस्य प्राचीनसत्यतायाः सार एव संस्कृतसाहित्यमस्ति तथात्रैव हिन्दुधर्मस्य सारतत्त्वं प्रतिष्ठितमस्ति। अतः संस्कृतशिक्षायाः स्तरः प्रोन्नेयः तत्पठनपाठकानां च प्रोत्साहनं प्रदेयम्।

वस्तुतोऽद्यत्वे शिक्षापद्धतावनेके दोषाः समागताः सन्ति—अनुशासनहीनता दैनन्दिनं वर्द्धते। गुरुशिष्यसद्भावो दूरतरं गच्छति, कक्षाबहिष्कारोऽहरहः क्रियते, कलहाग्निर्देदीप्यते, सङ्घर्षस्फुलिङ्गाः सर्वतः प्रसरन्ति, अभिभावकानां गुरूणामन्तेवसतां चैकमात्रं ध्येयमुपस्थितमस्ति यद् बालकाःपरीक्षासु येन केनापि प्रकारेणावश्यमुत्तीर्णाः स्युः। परीक्षाकेन्द्रेषु अवैधाश्रमणं परीक्षकाणां भर्त्सनम्, अनुचितेन विधिनाऽङ्कप्राप्तिप्रयाशः समेषां लक्ष्यं जातमस्ति। प्रश्नकाठिन्ये कोलाहलकरणम्, परीक्षाभवनत्यागः कर्तव्यत्वेनोपस्थितः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केन्द्रव्यवस्थापकानां हत्याया निरीक्षकेष्वाघातस्य च कुचेष्टाः क्रियन्ते, कुलपतेर्विश्वविद्यालये प्रवेशः कठिनो जातः, कार्यालयस्य कार्यस्थगितीकरणमारब्धम् । तत्राग्निप्रज्वालनं वस्तूनां त्रोटनं भेदनञ्च प्रायः सर्वत्रैव बोभवीति । यत्रेदृशः शिक्षायाः कुपरिणामो दृश्यते, तत्र का सदाशा क्रियेत । अतो वर्तमानशिक्षापद्धतावामूलं परिवर्तनमनिवार्यतया नितान्तमावश्यकं प्रतीयते । भारतहितेच्छुभिः समस्तैः शिक्षाविद्भिः सम्भूय भाविन्याः सन्ततेर्वास्तविकविकासशीलप्रवृत्तये सुशिक्षायाः प्रयासोऽवश्यं विधेयः ।

'यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत्'—इति हितोपदेशवचनानुसारं बाल्ये या शिक्षा दीयते, तस्या एव शिक्षायाः संस्कारो वालकेषु वालिकासु च दृढतरो जायते, जीवनपर्यन्तं च तया शिक्षया लाभो भवति । अतो हि सुकोमलमतिभ्यो बालकेभ्यः किञ्चित् तदुपयोगिनीं भारतीयां पौराणिकीं शिक्षामवश्यं प्रदातुं प्रयतनीयम् । यथा सुशिक्षया ते धर्मदेशजातीनां समुन्नतये प्रयत्नशीलाः सन्तः सुखमयं-जीवनं निर्मातुं शक्नुयुः । अतस्तैः स्वप्राचीनेतिहासस्य परम्पराया वा ज्ञानमवश्यं कर्तव्यम्, येन भारतीयसभ्यतायाः संस्कृतेश्च पुनर्ज्ञानवन्तोऽस्माकं बालका समाजस्य पथप्रदर्शकाः सन्त स्वदेश-धर्म-जातीनां सत्सेवका राष्ट्रहितेच्छवो वा भवेयुः, तथा स्वतन्त्रस्य भारतस्य गौरवरक्षणेन सह सोत्साहं स्वं भविष्यं नूनं समुज्ज्वलमादर्शमयं च विदध्युः ।

वस्तुतः पुराणेतिहासयोर्माध्यमेन प्राचीनभारतीयसांस्कृतिक-सामाजिक-राजनीतिकजीवनस्य प्रत्यक्षं चित्रमुपतिष्ठते । महर्षिणा वेदव्यासेन तत्र मानवजीवनस्य समस्तानां व्यवहाराणामादर्शमयं चित्रमुपस्थापितमस्ति, येनैतिहासिक-सांस्कृतिक-सामजिक-नैतिकतथ्यानामनुशीलने महत्साहाय्यमवाप्यते गवेषकैः । अतो भारतीयसंस्कृतेः पूर्णज्ञानाय पुराणानामनुशीलनं नितान्तमावश्यकमस्ति । पौराणिकसामग्री तथैव प्रामाणिकी ज्ञेया, यथा वेद-स्मृति-शिलालेख-मुद्रा- ताम्रपत्रादीनि प्रामाणिकानि मन्यन्ते । म० म० मिराशी महोदयद्वारा पठितमुद्रालेखैः पुराणवर्तिनां कियतामार्यचरितानां सत्यता प्रमाणिता । एवं भूगर्भविद्याविशारदैः पुरातत्त्वविद्भिः मोहनजोदड़ोहरप्पा-प्रभृतिषूत्खननेषु समुपलब्धमूर्ति-मृत्पा त्रादिद्वारा प्राचीनतया पुराणकालिक-भारतीयसभ्यतां साधयितुं निरन्तरं प्रयत्यते ।

प्राचीनकालिकभारतीयजीवनस्य प्रतिविम्बं पुराणेषु पर्याप्तरूपेण परिलक्ष्यते । अत ऐतिहासिक-सांस्कृतिक-साहित्यिकदृष्टिभिः पुराणानि महत्त्व पूर्णानि लोकोपयोगीनि च सन्ति । अतएव सदाचारसम्यतानां लोकप्राख्यातानामादर्शचारित्राणां महापुरुषाणां जीवनवृत्तातस्य धार्मिककार्यस्य चोल्लेखः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वेषु पुराणेषु प्रसङ्गत:स्थले स्थले महर्षिणा कृष्णद्वैपायनव्यासेन कृतो विद्यते, तेन महर्षिणा पौराणिके इतिहासे साधारणतया तेषामेवादर्शचरित्राणां पुरुष-पुङ्गवानां वृत्तान्तस्य चित्रणमुपस्थापितमस्ति ये मंर्हानुभावैः स्वधर्मस्य भारतीयसंस्कृते र्देशस्य च कृते सर्वतोभावेन कल्याणं कृतं विद्यते।

यथा सांप्रतमितिहासद्वारा कस्यचित् समाजस्य समुन्नतिकारिणीनाम-वनतिविधायिनीनां च वास्तविकघटनानां दिग्दर्शनेन लोकोपयोगिन्यः शिक्षाः प्रदीयन्ते तथैव पुराणेतिहासयोरध्ययनेनापि मानवानां वास्तविकसमुन्नति-कारिणीं शिक्षां दातुं सदुपदेशद्वारा च वास्तविकीं राष्ट्रोन्नतिं विधातुं शक्यते। कस्यचित् प्राचीनस्य सम्राजः सांम्राराज्यस्य च शामनप्रणाली सर्वाङ्गीणं व्यवहारं च द्रष्टुं पौराणिक इतिहासो दर्पणभिव प्रातिनिध्यं कुरुते।

अद्यत्वे लघुविद्यालयत आरम्य विश्वविद्यालयपर्यन्तं स्वसंस्कृतेः स्वदेशस्य च यादृश इतिहासः पाठ्यते, तेषु प्राचीनभारतस्य राजनीतिक सामाजिक-धार्मिकार्थिक-शैक्षणिकसमुत्कर्षस्यास्माकं पूर्वजानां च सदाचार-विचार-व्यवहार-सत्कार्याणां च तादृश उल्लेखो नास्ति। यत् किमपि वर्तते तदपि विकृतं कृत्वा प्रदर्शितमस्ति, किन्तुपौराणिके इतिहासे। यद् वृत्तं यादृशं जातमस्ति तत्तद्रूपमेवाङ्कितमस्ति। तत्र लेखकपक्षतो न किमपि मिश्रितं, परं वास्तविकं तथ्यमेव प्रदर्शित मस्ति। अतस्तस्य वास्तविकता सुदीर्घकालत एव पुराणेषु सुरक्षिता विद्यते।

वस्तुत इतिहासस्य द्वे एव भवतः प्रमुखे लक्ष्ये-एकं महापुरुषाणां पूर्णः परिचयोः, द्वियीयश्च भूगोलस्य च वास्तविकं ज्ञानम्। दृष्ट्याऽनया पौराणिक इतिहासो महतो महत्त्वस्यास्ति विषयः। संस्कृतसाहित्यस्येतिहासो महा-भारतं देशस्यास्य सर्वाङ्गीणया समुन्नत्या सह भूगोलस्य भारतीयराजनीतेः विख्यातवीराणां च लोककल्याणकारि चारु चरित्रं चित्रयति। रामायणं च तात्कालिकस्य गार्हस्थ्यज वनस्यैकमादर्शमुपस्थापयति। उत्तरभारताद्दक्षिण भारतपर्यन्तं भूगोलस्य सम्यक् परिचयं प्रददाति तथा पुराणानि समस्तस्य भूमण्ड-लस्य द्वीपोपद्वीप समुद्र वन पर्वत नदनदीसरोवरादीनां भौगोलिकेन ज्ञानेन साकं स्वकीथकथाद्वारा समाजस्योन्नतेरवनतेश्चोदाहरणमुपस्थाय मानवजन्मनो वास्तविकलक्षस्य भगवत्प्राप्तैः प्रेरणां प्रददाति। यतोहि पौराणिकस्येतिहासस्य प्रमुखं लक्ष्यमस्ति, आध्यात्मिकं ज्ञानमेव। तथाहि श्रीमद्भागवते—

अविस्मृतिः कृष्णपदारविन्दयोः
क्षिणोत्यभद्राणि शर्मं तनोति च।
सत्त्वस्य शुद्धिं परमात्मभक्तिं
ज्ञानं च विज्ञानविरागयुक्तम्॥ १२।१८।४७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सङ्कीर्त्यमानो भगवाननन्तः
श्रुतानुभावो व्यसनं हि पुंसाम् ।
प्रविश्य चित्तं विधुनोत्यशेषं
यथातमोऽर्कोऽभ्रमिवातिवातः ॥ १२।१८।१४ ॥

संसारसिन्धुमस्तिदुस्तरमुत्तितीर्षो-
र्नान्यः प्लवो भगवतः पुरुषोत्तमस्य ।
लीलाकथारसनिषेवणमन्तरेण
पुंसां भवेद्विविधदुःखदवार्दितस्य ॥ १२।४।४० ॥

पौराणिके युगे राजानो महाराजाश्चक्रवर्तिनो सम्राजः, सदाचारनिष्ठानां पूतान्तःकरणानां तपस्विनामृषीणां महर्षिणां सत्पुरुषाणां ब्राह्मणादीनां च सत्परामर्शैरेव सर्वं कार्यं कुर्वन्तिस्म । तेषां सभा उच्चतमा गोष्ठयश्च प्रायः आध्यात्मिकविषयाणां निश्चयार्थमेव भवन्तिस्म । पुराणेतिहासद्वारा यदाऽस्माकं केषाञ्चिद् महापुरुषाणां दयालुता-धार्मिकता-उदारता-वीरता-दानशीलता-लोकोपकारिता-अपूर्वनिष्ठया साहसपूर्णकार्याणां वर्णनमस्माकं कर्णकुहरे उपतिष्ठते तदास्माकं हृदयेषु—

चमत्कारिकपूर्णः कश्चन आह्लाद उत्पद्यते, येन वयं तदनुकरणे सहसा बाध्या भवामः । अतः स्वकीयगौरवप्राप्तिनिमित्तं पुराणानामैतिहासिकानुशीलनमत्यावश्यकमस्ति ।

महत्याः प्रसन्नताया विषयोऽस्ति यत् साम्प्रतं पुराणानामनुशीलनं प्रति वर्तमाननामितिहासकाराणां ध्यानमाकृष्टं बोभूयते । अनेकैरितिहासमर्मज्ञैर्विपश्चिद्भिः पौराणिकीनामनुश्रुतीनां परीक्षां कृत्वा परिणाम उद्घोषितो विद्यते यत्ताः पौराणिक्योऽनुश्रुतयो वस्तुतः सन्ति सत्यरूपाः तासां प्रामाण्यमपलपितुं न शक्यते कैश्चित् ।

वेदेषु या ऐतिहासिक्यः सामग्र्य उपलभ्यन्ते पुराणैस्तासां वास्तविकं रहस्यं स्पष्टीकृतमस्ति । वैदिकचमत्कारिकवर्णनं पौराणिकै राजभिः घटनाभिश्च सामञ्जस्यं विधाय पुराणैर्महत् स्तुत्यं कार्यं कृतमस्ति । श्रीमद्भागवते लिखितमस्ति यत् कर्मसु संसक्तचेतसां पुंसां कल्याणाय महामुनिना भगवता व्यासेन कृपया महाभारतनामक इतिहासो विरचितोऽस्ति[1] । इतिहास-

---

१. (क) कर्मश्रेयसि मूढानां श्रेयः एवं भवेदिह ।
इति भारतमाख्यानां कृपया मुनिनां कृतम् ॥ १।४।२५ ॥
(ख) भारतव्यपदेशेन ह्याम्नायार्थश्च दर्शितः ।
दृश्यते यत्र धर्मादि स्त्री शूद्रादिभिरप्युत ॥ १।४।२९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लेखनव्यासेन महाभारते वेदस्य रहस्यं व्यक्तीकृतमास्ते, यत्र स्त्रीशूद्रादिभिः सर्वैरपि धर्मादि कार्यं कृतं दृष्टिगोचरी भवति।

एतत्तथ्यस्वीकारादेव प्रोक्तमस्ति यदितिहासेन महाभारतेन पुराणैश्च वेदानां वास्तविकं रहस्यं सम्यगवगन्तुं तद्विस्तारं च विधातुं शक्यते—

इतिहासपुराणानां वेदं समुपवृंहयेत्।

देवीभागवते त्वष्टादशानां पुराणानां क्रमः श्लोकसंख्या चैवं प्रदर्शितमस्ति—

चतुर्दशसहस्रं च मात्स्यमाद्यं प्रकीर्तितम्।
तथा ग्रहसहस्रं तु मार्कण्डेयं महाद्भुतम्॥
चतुर्दशसहस्राणि तथा पञ्चशतानि च।
भविष्यं परिसंख्यातं मुनिभिस्तत्त्वदर्शिभिः॥
अष्टादशसहस्रं वै पुण्यं भागवतं किल।
तथा चायुतसंख्याकं पुराणं ब्राह्मसंज्ञकम्॥
द्वादशैव सहस्राणि ब्रह्माण्डं च शताधिकम्।
तथाष्टादशसाहस्रं ब्रह्मवैवर्तमेव च॥
अयुतं वामनाख्यं च वायव्यं षट्शतानि च।
चतुर्विंशतिसंख्यातं सहस्राणि तु शौनक!॥
त्रयोविंशतिसाहस्रं वैष्णवं परमाद्भुतम्।
चतुर्विंशतिसाहस्रं वाराहं परमाद्भुतम्॥
षोडशैव सहस्राणि पुराणं चाग्निसंज्ञकम्।
पञ्चविंशतिसाहस्रं नारदं परमं मतम्॥
पञ्च पञ्चाशत्साहस्रं पद्माख्यं विपुलं मतम्।
एकादशसहस्राणि लिङ्गाख्यं चातिविस्तृतम्॥
एकोनविंशसाहस्रं गारुडं हरिभाषितम्।
सप्तदशसहस्रं च पुराणं कूर्मभाषितम्॥
एकादशीतिसहस्राणि स्कन्दाख्यं परमाद्भुतम्।
पुराणाख्या च संख्योक्ता विस्तरेण मयाऽनघाः!॥

(दे० भा० १।३।३-१२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं ब्रह्म-पद्म-विष्णु-भागवताद्यष्टादशभेदैर्विभक्तेषु पुराणेषु योगवलेन त्रिकालदर्शिना महर्षिणा भगवता देदव्यासेन आदर्शमनवचरित्रचित्रणं, सर्वधर्मरहस्यकीर्तनं, वर्णाश्रमव्यवस्थाप्रतिपादनं, सर्वदर्शनरहस्यसमर्थनं, कर्त्तव्यपथप्रदर्शनं, असत्पथनिवृत्तिमार्गसूचनं, ज्ञानस्य, भक्तेः, कर्मणश्च निरूपणं, अवतारस्य विवेचनं च महता कौशलेन कृतमस्ति। किं बहुना पुराणेषु सर्वोपयोगिनो ज्ञातव्या विषया तथास्थानं निवेशिताः सन्ति। अत एव पुराणानि भारतीयसंस्कृतेः हृदयेमेवेति कथने नास्ति कश्चिदपि अतिशयोक्तिलेशः। अतो हिन्दूजातेः प्राणवत्प्रियस्थ सर्वाभ्यर्हितस्य, वेदवदारणीयस्य, मानवजीवनलक्ष्यभूतभगवत्प्राप्त्युपायप्रदर्शकस्य सर्वैः धार्मिकशिरोमणिभिः मानवमर्णिभिः सर्वथा समादृतस्य सम्प्रदायाविरोधेन सर्वदर्शनसिद्धान्तसर्वोपासनारहस्यसमर्थनशीलस्यालौकिकभावगुम्फितस्य भगवत आज्ञस्वरूपस्य पुराणसमूहस्याध्ययनानुशीलनादिकमवश्यं कर्तव्यमेव हिन्दुभिः। अतः एवौक्तं महाभारतस्यानुशासनपर्वणि—

पुराणं मानवो धर्मः साङ्गोपाङ्गश्चिकित्सकः।
आज्ञासिद्धानि सर्वाणि न हन्तव्यानि हेतुभिः॥

उपपुराणादीनां पर्यालोचनम्

अष्टादशमहापुरणवद् अष्टादशसंख्याकानि उपपुराणानि औपपुराणानि च विद्यन्ते, येषां निर्माणं महापुराणानामाधारेण जातमस्ति। प्राचीनकालिकैः विभिन्नैर्मुनिभिः अष्टादशानां महापुराणानां छायामाश्रित्यैव उपपुराणानामौपपुराणानञ्च रचना कृताऽस्ति। विस्तारभिया उपपुराणेषु औपपुराणेषु च क्वचन महापुराणानां कथाः सूक्ष्मीकृताः, कुत्रचित् परित्यक्ताः, कुहचिच्च चमत्कारानयनाय विलक्षणानां कथानां समावेशः कृतोऽस्ति, क्वचन चाभिनतानिवेशाय कथासु किञ्चित् परिवर्तनमपि कृतं वर्तते। एवं वैशिष्ट्ये जातेऽपि उपपुराणानि महापुणवदेवादरणीयानि स्पृहणीयानि मान्यानि श्रद्धेयानि च सन्ति। यतस्तानि तत्तन्महापुराणेभ्य एव भावं संगृह्य तत्तन्मुनिभिः प्रणीतानि सन्ति, यस्य सङ्केतो विभिन्नेषु पुराणेषूपलभ्यते—

आष्टादशभ्यस्तु पृथक् पुराणं यत् प्रदृश्यते।
विजानीध्वं द्विजश्रेष्ठास्तथा तेभ्यो विनिर्गतम्॥
(मत्स्यपुराणे ५३।६३)

एवं महापुराणानां परिचयप्रसङ्गे विष्णुपुराणे उल्लिखितं विद्यते यद् अष्टादशभ्यो महापुराणभ्योऽतिरिक्तानि यानि पुराणानि समुपलभ्यन्ते, तानि विभिन्नैः मुनिभिः कृतानि ज्ञेयानि—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महापुराणान्येतानि ह्यष्टादश महामुने !
तथाचोपपुराणानि मुनिभिः कथितानि च ॥
(विष्णुपुराणे ३।६।२४)

गरुड़पुराणेऽपि अष्टादश महापुराणानि कथयित्वा तत्तन्मुनिभिः कृतानामुपपुराणानामुल्लेखो । वर्तते—

अन्यान्युपपुराणानि मुनिभिः कथितानि तु ।
(ग० पु० ११५।१६)

इत्थं महापुराणेभ्यः पृथक् यानि पुराणानि प्राप्यन्ते, तानि तेभ्य एव निर्गतानि मन्तव्यानि। अत उपपुराणानां स्रोतांसि महापुराणानि सन्तीत्यत्र न काचिदस्ति संशीतिः। तत एव च तुल्यन्यायेन महापुराणानामिवोपपुराणानामपि प्रामाण्यमङ्गीक्रियते विपश्चिद्भिः—

अन्याश्च संहिताः सर्वा मरीचिकपिलादयः ।
सर्वत्र धर्मकथने तुल्यसामर्थ्यमुच्यते ॥

स्कन्दपुराणानुसारं तूपपुराणानि साक्षाद् ब्रह्मणैव प्रोक्तानि सन्ति—

तथैवोपपुराणानि यानि चोक्तानि वेधसा ।
(स्क० पु० रेवाखण्डे १।४५)

उपपुराणसंख्याविमर्शः

कियन्तो विपश्चितो निश्चिन्वति यद् यथा महापुराणानां संख्या अष्टादश नियताः सन्ति तथोपपुराणानां संख्या निश्चिता नास्ति। यतो हि अष्टादशभ्य उपपुराणेभ्येऽपि अतिरिक्तानि पुराणानि समुपलभ्यन्ते। अत उपपुराणानां संख्या अस्ति असंख्याता, किन्तु मतमेतन्नास्ति सुसङ्गतम्, यतो हि महापुराणानामिव उपपुराणानामपि संख्या नियता एव सन्ति, अष्टादश। अतोऽष्टादशमहापुरणवदष्टादशानि उपपुराणानि अपि निभाल्यन्ते पुराणेषु। एवञ्च यथा अष्टादशानि महापुराणानि विद्यन्ते तथैवाष्टादशसंख्याकानि उपपुराणान्यपीति निर्विवादम्। तथाचोक्तं ब्रह्मवैवर्ते महापुराणे—

अष्टादशपुराणानामेवमेवं विदुर्बुधाः ।
एवञ्चोपपुराणानामष्टादश प्रकीर्तिताः ॥
(ब्र० वै० श्रीकृष्णजन्मखण्डे १३१।२२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्कन्दपुराणेऽपि उपपुराणानां गणनाप्रसङ्गे तानि अष्टादशसंख्याकान्येव प्रोक्तानि सन्ति—

पराशरं भागवतं कौर्मश्चाष्टादशं क्रमात् ।

(स्क० पु० रेवाखण्डे १।५८)

प्रतिमहापुराणमेकैकमुपपुराणं प्रादुर्भूतं विद्यते। अत एव महापुराणवदुपपुराणान्यपि अष्टादशैव सन्ति। यथा महापुराणानि हिन्दुजातेर्जीवनस्यास्ति प्रमुख आधारः तथैवोपपुराणान्यपि प्राचीनभारतीयगौरवचिन्तनस्य विकाशे, सर्वोपकारिण्या अनन्यसाधारणाया भारतीयसंस्कृतेः प्रचारे, ऐतिहासिकतत्त्वस्य प्रकाशे, धार्मिकव्यवस्थायाः प्रसारे, वर्णाश्रमव्यवस्थायाः संक्षरणे च महान्ति उपकारकाणि विद्यन्ते। अतस्तान्यपि महापुराणवत् प्राचीनानि पामाणिकानि श्रद्धेयास्पदानि चाभिमतानि सन्ति। मत्स्यपुराणानुसारमुपपुराणानि महापुराणानां सन्ति उपभेदाः, न तानि सन्ति स्वतन्त्रग्रन्थरूपाणि। तथा हि—

उपभेदान् प्रवक्ष्यामि लोके ये सम्प्रतिष्ठिताः ॥

(मात्स्यपुराणे ५३।५९)

परन्तु अनेके गवेषका विद्वांसो महापुराणवदुपपुराणान्यपि स्वतन्त्रग्रन्थरूपाणि मन्यन्ते। अतएव धर्मशास्त्रनिवन्धकारैः तानि स्वतन्त्रग्रन्थान् मत्वा स्वस्वनिवन्धग्रन्थेषु महता समादरेण तेषां वचनानि समृद्धतानि सन्ति। उपपुराणानां वर्णनपद्धतौ चमत्काराय महान् प्रयासो विहितो विद्यते, येनाभासो भवति यदिमानि नातिप्राचीनानि सन्ति। अपि च महापुराणेषु अनुक्ता अपि वहवो विषया उपपुराणैषु महत्या रोचकशैल्या उल्लिखिताः सन्ति, येषामनुशीलनेन तदध्ययने उत्तरोत्तरमुत्कण्ठा वर्द्धते। एवं सत्यपि आस्तिकजगति लोकप्रियताद्दष्ट्या महापुराणानां याद्दगस्ति समादरो न ताद्दगुपपुराणानाम्। किञ्च यथा पुराणशब्दश्रवणसमकालमेव महापुराणानामेव सहसा स्मरणमुपजायते, न तथोपपुराणानां स्मृति र्जायते। तथापि तानि महापुराणवन्मान्यानि गण्यानि च सन्त्येव, यतो हि उपपुराणानामपि उद्देश्यं तदेवास्ति यन्महापुराणानामस्ति लक्ष्यभूतम् भक्त्या भगवत्समासादनादिकमिति।

उपपुराणनामानि यथा—

(१) आदिपुराणम् (२) नरसिंहपुराणम् (३) स्कन्दपुराणम् (४) शिवधर्मपुराणम् (५) दुर्वासःपुराणम् (६) नारदीयपुराणम् (७) कपिलपुराणम् (८) वामनपुराणम् (९) औशनसपुराणम् (१०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्माण्डपुराणम् (११) वरुणपुराणम् (१२) कालिकापुराणम् (१३) माहेश्वरपुराणम् (१४) शाम्बपुराणम् (१५) सौरपुराणम् (१६) पाराशरपुराणम् (१७) मारीचपुराणम् (१८) भास्करपुराणञ्च । इतीमानि सन्ति अष्टादशोपपुराणानि । तथाहि—

आद्यं सनत्कुमारोक्तं नारसिंहमथापरम् ।
तृतीयं स्कान्दमुद्दिष्टं कुमारेण च भाषितम् ॥
चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम् ।
दुर्वाससोक्तमाश्चर्यं नारदीयमतः परम् ॥
कपिलं वामनं चैव तथैवोशनसेरितम् ।
ब्रह्माण्डं वारुणं चाथ कालिकाह्वयमेव च ॥
माहेश्वरं तथा शाम्बं सौरं सर्वार्थसञ्चयम् ।
पराशरोक्तमपरं मारीचं भास्कराह्वयम् ॥

(कूर्मपुराणस्य पूर्वार्द्धे १।१७-२०)

एवमेव किञ्चिच्छब्दान्तरेण नामान्तरेण च देवीभागवते (३।१।१६) स्कन्दपुराणस्य रेवाखण्डे (१।४८-५२) मत्स्यपुराणे (५३।५७-६२) गरुड़पुराणे च (२१५।१७-२०) उपपुराणानां स्पष्टमुल्लेखो विद्यते ।

यथा वायुपुराण-शिवपुराण—श्रीमद्भागवत-देवीभागवतारिक्तानां महापुराणानां नामविषये समेषां पुराणानामैक्यमतमस्ति, न तथोपपुराणानां नामसन्बन्धे पुराणानां मतैक्यमुपलभ्यते। तत्तत्पुराणेषूपपुराणानां नामानि भिन्नानि भिन्नानि समवाप्यन्ते। केवलं हि द्वादशनामादिपुराण-नरसिंहपुराण - दुर्वासःपुराण - नारदीयपुराण - कपिलपुराण - औशनसपुराण-वरुणपुराम्-कालिकापुराण - माहेश्वरपुराण - शाम्बपुराण - सौरपुराण - पराशरोपुराणानां नामानि कूर्म-स्कन्द-गरुड-देवीभागवतपुराणेषु समानानि मिलन्ति, किन्तु शिष्टानां षण्णामुपपुराणानां नामानि तु विभिन्नानि उपलभ्यन्ते। अपि च मत्स्यपुराणे चतुर्णां नरसिंहपुराण-नन्दीपुराण-शाम्ब-पुराण-आदित्यपुराणानामेव नामान्युपलभ्यन्ते तथाहि—

पाद्मे पुराणे तत्रोक्तं नारसिंहोपवर्णनम् ।
तच्चाष्टादशसाहस्रं नरसिंहमिहोच्यते ॥
नन्दाया यत्र माहात्म्यं कार्तिकेयेन वर्ण्यते ।
नन्दीपुराणं तल्लोकैराख्यातमिति कीर्त्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्र शाम्बं पुरस्कृत्य भविष्येऽपि कथानकम् ।
प्रोच्यते तत्पुनर्लोके शाम्बमेतन्मुनिव्रताः ॥
एवमादित्यसंज्ञा च तत्रैव परिगीयते ।

(मत्स्यपुराणे ५१।५९-६२)

औपपुराणनि

यथाष्टादश महापुराणानि, अष्टादशोपपुराणानि च सन्ति तथैवाष्टादशौपपुराणान्यपि विद्यन्ते। तथाहि (१) सनत्कुमारपुराणम् (२) वृहन्नारदीयपुराणम् (३) आदित्यपुराणम् (४) सूर्यपुराणम् (५) नन्दिकेश्वरपुराणम् (६) कौर्मपुराणम् (७) भागवतपुराणम् (८) वसिष्ठपुराणम् (९) भार्गवपुराणम् (१०) मुग्दलपुराणम् (११) कल्किपुराणम् (१२) देवीपुराणम् (१३) महाभागवतपुराणम् (१४) वृहद्धर्मपुराणम् (१५) परानन्दपुराणम् (१६) वह्निपुराणम् (१७) हरिवंशपुराणञ्च—

अद्यं समत्कुमारं च नारदीयं वृहच्च यत् ।
आदित्यं मानवं प्रोक्तं नन्दिकेश्वरमेव च ॥
कौर्मं भागवतं ज्ञेयं वसिष्ठं भार्गवं तथा ।
मुद्गलं कल्किदेव्यौ च महाभागवतं ततः ॥
वृहद्धर्मं परमानन्दं वह्निं पशुपतिं तथा ।
हरिवंशं ततो ज्ञेयमिदमौपपुराणकम् ॥

[वृहद्विवेके ३]

एवं श्रीस्वामिना ज्ञानानन्दसरस्वतीमहोदयेन स्वकीये धर्मकल्पद्रुमे अष्टादशानामुपोपपुराणानामपि सङ्केतः कृतोऽस्ति। तन्मतेन पञ्चप्रकारकाणि पुराणानि सन्ति—(१) पुराणानि (महापुराणानि) (२) उपपुराणानि (३) औपपुराणानि (४) उपोपपुराणानि (५) उपौपपुराणानि च तथाचैवंविधं भेदमजानानाः केचन महापुराणेतराणां सर्वेषामुपुराणत्वेन गणनं विधाय सर्वाणि उपपुराणेष्वेवान्तर्भावयन्ति। तेषां मते असंख्यातानि सन्ति उपपुराणानिति सुधीभिर्विभाव्यमत्रत्यं स्वारस्यम् ।

सौर-शैव-शाक्तादिभेदाः

यथा महापुराणेषु सौर-शैव-शाक्त-वैष्णवादिभेदा वर्तन्ते तथैवोपपुराणेष्वपि सौर-शैव-शाक्त-वैष्णव-गाणपत्यादिभेदा अपि विद्यन्ते। यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूर्यपुराणम्, शाम्वपुराणाम् भास्करपुराणम्, आदित्यपुराणम्, वह्निपुराणम्, सौरपुराणं सौरधर्मोत्तरपुराणञ्च सौरोपपुराणेषु परिगण्यन्ते। शाक्तोपपुराणेषु कालिकापुराणम्, देवीपुराणम्, महाभागवतम्, नन्दीपुराणम्, वृहन्नन्दिकेश्वरपुराणम्, शारदापुराणञ्च वर्तन्ते। शिवधर्मपुराणम्, माहेश्वरपुराणम् पशुपतिपुराणम्, स्कन्दपुराणञ्च शैवोपपुराणेषु। विष्णुधर्मोत्तरपुराणम्, विष्णुधर्मपुराणम्, नरसिंहपुराणम्, वृहन्नारदीयपुराणम्, नारदीयपुराणम्, आदिपुराणम्, कल्किपुराणम्, पराशरपुराणम्, परानन्दपुराणम्, सनत्कुमारपुराणम्, वसिष्ठपुराणम्; मरीचिपुराणम्, वरुणपुराणम्, दुर्वासःपुराणम्, औशनसपुराणम्, हरिवंशपुराणञ्च वैष्णवपुराणेषु विद्यन्ते। गाणपत्योपपुराणे तु द्वयोरेव मुद्गल-गणेशपुराणयोर्गणना भवति।

उपपुराणानां कालनिर्णयः

उपपुराणानां रचनाकालस्य विषये विपश्चितां महानस्ति मतभेदः। वहूनां विदुषां विश्वासो विद्यते यदुपपुराणानि न सन्ति, प्राचीनानि, किन्तु निर्विवादमुपपुराणानि अतिप्राचीनकालत एव महापुराणेभ्यः तत्तन्मुनिभिः सङ्गृहीतानि सन्ति। वेदानां मर्मज्ञेन मनीषिणा षड्गुरुशिष्येण स्वकीये ग्रन्थे वेदार्थनिर्णये नरसिंहोपपुराणस्य कियन्तः श्लोका उद्धृताः सन्ति। ऐतिहासिकनिर्णयानुसारं षड्गुरुशिष्यस्य प्रादुर्भाव एकादश शताब्द्यां जात आसीत्। इतोऽपि पूर्वं १०३० ईशवीये वर्षे भारतभ्रमणार्थमागत्याल्वेरुणिः, अत्रत्यानां विदुषां साहाय्येन विशेषं ज्ञानं सम्प्राप्य भारतभ्रमणविषयमेकं ग्रन्थं लिखितवान्। तस्य द्वादशे परिच्छेदे तेन पुराणानां विवरणं प्रस्तुवता सोम-शाम्व-नन्दा-आदित्य-नरसिंहादिपुराणानां नामोल्लेखः कृतो वर्तते। एतेन स्पष्टं प्रतीयते यत्तस्मिन् समये एषामुपपुराणानामपि विद्वद्वर्गे विशिष्टः समादरो जात आसीत्। अतोऽस्मन्मतेन दशमशताब्दीपर्यन्तमुपपुराणनां निर्माणे न काप्यनुपपत्तिः सम्भवति। इतः परमुपपुराणानां कालनिर्णय प्रयासोऽसङ्गत एव प्रतिभाति।

विन्टरनित्समतानुसारं तूपपुराणानां रचनाकालः षष्ठशाताब्दीतो दशमशाताब्दीं यावदेव भवितुमर्हति।[1] डा० वयुलारमतेन पञ्चमशताब्द्या उत्तरकाल एवोपपुराणानां निर्माणकालः समुचितः प्रतिभाति।[2] किन्तु डा० आर० सी० हाजरामहोदयः उपपुराणानां प्रणयनकालम् ई० पू० ५०० वर्षेभ्यः पूर्वमेव मनुते।[3] एवमुपपुराणानां रचनाकालसम्बन्धे विभिन्नानां

१. हिस्ट्री आफ इण्डियन लिट्लेचर पृ० ८०

२. इण्डियन इण्टिक्वेरी वा० १९ पृ० ४०८

३. स्टडीज् इन् दि उपपुराणाज् वा० १ पृ० २१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विदुषां भिन्नानि मतानि विद्यन्ते। तत्र युक्तायुक्तत्वं समालोचकै र्मनीषिभिः स्वयमेव समूहनीयम्।

उपपुराणानां वैशिष्ट्यम्

उपपुराणेषु प्रायः एकैकं कमपि देवविशेषमुद्दिश्य तन्माहात्म्यं विशदतया विवृतं विद्यते। यद्यपि महापुराणेष्वपीयं प्रक्रिया प्राप्यते यथा शैवपुराणेषु भगवतः शिवस्य, वैष्णवपुराणेषु भगवतो विष्णोः, शाक्तपुराणेषु च भगवत्याः शक्तेरेव माहात्म्यातिशयः सूचितो वर्तते, तथापि उपपुराणेषु इयं सरणिर्विशेषतोऽनुसृताऽस्ति।

स्थावरजङ्गमात्मकस्य जगतो यद् मूलभूतमेकं परं ब्रह्मैव मुख्यतया उपास्यं विवक्षितं तन्न स्वरूपतः सम्भवति, यतो हि तस्य 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह, यन्मनसा न मनुते' इत्यादिभिः श्रुतिभिः वाङ्मनसोरविषयतायाः स्पष्टमुद्घोषितत्वात्। अतः तस्मिन् मनोनिवेशः तदुपासनमितिनियमात् मनोवाग्विषयावगाहनस्यासंभवे, तत्र न मनोनिवेशः कर्तुं शक्यः, नापि तस्य वचसा स्तुतिः सम्भवति। अस्माद्धेतोः सगुण-साकाररूपाणि आधारीकृत्य तस्मिन् मनोनिवेश्यमिति साधीयानस्ति मार्गः। तानि च सगुण-साकाररूपाणि अधिकारिभेदात् पञ्चविधानि तत्तच्छास्त्रेषु निरूपितानि सन्ति। यथा सर्वलोकपालको भगवान् विष्णुः, सकलसंहारको भगवान् शिवः, जगज्जननी आद्या शक्तिः, विश्वस्यात्मा भगवान् भास्करः, विघ्नविघातको गणपतिश्च। एषु विशिष्टेषु पञ्चसु देवेषु कस्मिंश्चिदेकस्मिन् देवे स्वकीयरुच्यनुसारं ब्रह्मबुद्धिर्विधेया उपासकेन। येनोपासकेन यो देवः परब्रह्मतया भाव्यते, स एव तद्दृष्टौ सर्वतः प्रधानम्, अन्ये च देवाः तदनुगमिनो भवन्ति। अनेकेषु देवेषु परब्रह्मतया भासितेषु सम्यगुपासना न भवितुमर्हति। यतो हि मनस एकाग्रतैवास्ति उपासनाया वास्तविकं फलम्। अनेकत्र च निवेशितं मन एकाग्रं भवितुं नार्हति। तस्माद्बहुत्र मनसः स्थैर्याभावाद् ब्रह्मबुद्धिरेकस्मिन्नेव कस्मिन् देवे कर्तव्या, परमितरेषु च देवेषु विद्वेषो न विधेयः।

परब्रह्मतया भावितो देव एव सर्वतो मुख्य इत्येव पुराणेषूपपुराणेषु च प्रख्यापितम्। अत एवोक्तं भगवता पतञ्जलिनाऽपि स्वकीये योगदर्शने—यथाभिमतध्यानाद्वा (२।२४) यस्याधिकारिणः स्वभावद् यत्र देवे अभिरुचिः, स एव देवः तेन ध्यातव्य इति तदर्थः।

तदित्थं विभिन्नतया मनोनिवेशार्थं स्वीकृतेषु अनेकेषु देवेषु वैष्णवपुराणेषु भगवान् विष्णुरेव सर्वश्रेष्ठो मन्यते। तदाज्ञयैवान्ये देवाः स्वस्वकर्मसु प्रवर्तन्ते। शैवपुराणेषु भगवानाशुतोष एव कर्तुमकर्तुमन्यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तुं सर्वथा समर्थो वर्ण्यते। शाक्तपुराणेषु जगदधिष्ठात्री आद्या शक्तिरेव सर्वं विधातुं समर्था, तदनुकम्पयैव ब्रह्म-विष्णु-महेश्वरा अपि सृष्टिस्थित्युत्पत्तिव्यवहारेषु प्रभवा भवन्ति। सौरेषु पुराणेषु भगवान् भास्कर एव समस्तस्यास्य विश्वस्यात्मत्वेनाख्यातो जगज्जालं सञ्चालयति। गाणपत्योपपुराणेषु च भगवान् गणपतिरेव परब्रह्मतया ध्यातुमिष्टः।

तत्र मुद्गलपुराणे ऋद्धिः सिद्धिश्चेतीमे द्वे गणपतेः भार्यात्वेन व्याख्याते स्तः। यदा गजः स्वीयं शुण्डादण्डं स्वमुखे निवेश्य निमिलितनेत्रो भवति तदा मण्डलाकारं तन्मुखमेकरूपं दृश्यते, नच तस्यावयवभेदः प्रतीयते इति निर्विकल्पकसमाधिसाम्यमभिहितम्। केवलं वेद्यविषयाकाराकारैव वृत्तिर्भवतीत्येकदन्तरूपेण तदेव सूचितम्। तद्विग्रहे विभिन्नावयवप्रतीत्या तस्य संसाररूपता प्रस्फुटैव। चतुर्भिर्भुजैश्चतुर्दिग्व्याप्तिः सूच्यते। गणपतेश्चतुर्षु करेषु चत्वारि पाशाङ्कुशमोदककमलानि चिह्नानि चतुर्विधानां धर्मार्थकाममोक्षाणां सूचकानि सन्ति। तत्राङ्कुशो धर्मरूपः नियन्त्रित्वेन धर्मस्याङ्कुशसाजात्येन प्रवृतिदर्शनात्। पाशोऽर्थरूपः, अर्थरूपेण पाशेनैव जीवानां विशेषतो बन्धनदर्शनात्। मोदकं कामरूपम्, तात्कालिकसुखरूपमोदहेतुत्वात्। कमलं जले वर्तमानमपि न मनाग्जलेन लिप्यते इति मोक्षरूपं तद् भगवतो गणपते र्हस्ते स्थितम्। एवं यथाधिकारमुपासकैः सेवमानो भगवान् गणपतिश्चतुरोऽपि पुरुषार्थान् भक्तेभ्यो नूनं प्रददातीति सर्वसिद्धिकरत्वं तस्य स्पष्टतरमेव। यथा मूषकः पृथिव्यां विलेषु प्रच्छन्न एव निवसति, प्रच्छन्न एव च वन्धनानि छनत्ति तथैव ब्रह्मरूपो गणपतिरपि समेषां प्राणिनामन्तर्निगूढो निवसति, प्रच्छन्नः सन्नेव भक्तानां विघ्नव्यूहान् च छिनत्तीति भगवतो गेणपते र्मूषकवाहनस्यास्ति रहस्यम्। गणपतेः शरीरं संसाररूपम् संसारिणां चोदरं दुष्पूरं भवति। बहुतरे भोगेऽपि तत्र शान्तेरभावदर्शनात्। अत एव तस्योदरं वहुविस्तृतं दृश्यते। अतएवोक्तं भगवतो गणपतेः स्तुतौ—'लम्बोदरं परमसुन्दरमेकं दन्तम्' इत्यादि। ब्रह्मरूपो गणपतिः संसारिणामुदरं प्रविश्य भुक्तमन्नपानादिकं सर्वं सम्यक् पाचयति—

अहं वैश्वानरो भूत्वा प्राणिनां देहमास्थितः।
प्राणापानसमायुक्तो पचाम्यन्नं चतुर्विधम्॥

इति श्रीमद्भगवद्गीतायां गणपत्यभिन्नत्वेन भगवता श्रीकृष्णनेनाभिधानात्। तस्मात् परेषामुदरं प्रविश्य भोगकरणात्तस्य महदुदरत्वं ख्याप्यते। एवं भगवतो गणपतेः स्वरूपं तत्र मुद्गलपुराणे स्थाने स्थाने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरूपितो वर्तते, यत्र तत्र विचित्राभिः कथाभिश्च गणपतेरेव पञ्चसु देवेषु प्राधान्यं प्रख्यापितमस्ति।

अथैकदा विश्वस्यात्मानं सवितारं ध्याननिरतं विलोक्य तद्रथेन सहैव भ्रमद्भिः वालखिल्यैः—भवान् कमभिध्यायतीति साश्चर्यं पृष्टः सः—गणपतिरस्माकं सर्वेषामधिष्ठाता, स एव परं ब्रह्म तदाज्ञयैव सर्वे वयं तत्तत्कर्मसु प्रवर्तामहे। तमेवाहमभिध्यायामीति भगवतः सूर्यस्योक्त्या गणपतेः परब्रह्मत्वं संसाधितम्।

एवं गाणपत्योपपुराणेषु गणपत्युपासनया विविधं फलं प्रदर्श्य रामकृष्ण-युधिष्ठिरादीनामपि गणपत्युपासनं निर्दिष्टमस्ति। अतो महिम्नः स्तोत्रे—

रुचीनां वैचित्र्यादृजु-कुटिल-नानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव।

इति पुष्पदन्ताचार्यभणतिनिर्देशात् पुराणोपपुराणौपपुराणो-पोपपुराणानि आश्रित्य स्वरूच्यनुसारं यस्मिन् कस्मिन्नप्येकस्मिन् स्वेष्ट देवे परब्रह्मबुद्धिं विधाय तदुपासनया साधकैरात्मकल्याणं कार्यमिति पौराणि-कानां विपश्चितां पारमार्थिकोऽस्ति पन्थाः।

कपिलपुराणम्

कपिलपुराणं हि उपपुराणगणनायां कूर्मपुराणस्य पूर्वार्द्धे सप्तममुपपुराण-मुक्तमस्ति। इदमुपपुराणमेकविंशत्यध्यायेषु विभक्तमस्ति। अत्र विविधानां पुण्यक्षेत्राणां माहात्म्यमवगन्तुमिच्छया राज्ञा शल्यजिता सादरं संपृष्टो महामुनिः कपिलः पुरातनेतिहासवर्णनव्याजेन पुण्यतमे पुष्करक्षेत्रे तपस्तप्तुं निवसतामृषीणां प्रश्ने भरद्वाजमुनिमुखेनानेकेषामुत्कल-नीलाचल-जगन्नाथपुरी-वाराणसी-महानदी-गङ्गा-मैत्रेयवन-आम्रवन-प्रभृतीनां पवित्रक्षेत्राणां विशेषं महिमानं तदुपयोगि पौराणिकं कथानकञ्च वर्णयामास। कथयामास तेषां रहस्यं येषां स्मरणमात्रेण मानवानामनेके कल्मषा विलयं व्रजन्ति। तथाहि कपिल उवाच—

कथयामि रहस्यं त्वां शृणुष्वैकमना नृप!
येषां स्मरणमात्रेण कल्मषा यान्ति वै क्षयम्॥
वर्षाणां भारतं श्रेष्ठं देशानामुत्कलः स्मृतः।
उत्कलेन समो देशो देशो नास्ति महीतले॥
अत्रैवोदा हरन्तीममितिहासं पुरातनम्।
ऋषीणां चैव सम्वादं भरद्वाजेन धीमता॥

अत उपपुराणमिदं कपिलपुराणमिति नाम्ना प्रख्यातमस्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकमेव हस्तलिखितं पुराणमिदं सम्पूर्णानन्द संस्कृत विश्वविद्यालयस्य पुस्तकालये सरस्वतीभवने वर्तते, यस्य संख्या १६४०४ पृष्ठसंख्या च १-५६ वरीवर्ति। एष हस्तलेखो महान् भ्रमोत्पादको विद्यते, परं मया स्वकीयाध्ययनाध्यापन-बुद्धिवैभवबलेन यथाशक्ति सम्यक् संशोध्य, सम्पाद्य, प्रकाश्य च पाठकानां पुरतः प्रस्तूयते।' मन्ये नूनमनेन पाठकानां प्रमोदो भविष्यति।

उपपुराणमिदं व्याकरणबन्धनमक्षरशो नानुकरोति। स्थले स्थले सन्धेर्विषमता, लिङ्गव्यत्ययश्च दरीदृश्यन्ते। अतोऽत्र बहवोऽपाणिनीया प्रयोगाः मिलन्ति। ते आर्षा इति कथयित्वा समाधानं क्रियते बुधैः। यद्वा 'बहुलं छन्दसि, 'व्यत्ययो बहुलम्, इत्यादिर्वैदिकसूत्राणामाधारेण वैदिकप्रक्रियया ते आर्षाः प्रयोगा साधव एव मन्यन्ते। प्रायः सर्वेषु पुराणेषु ये अपाणिनीयाः प्रयोगा उपलभ्यन्ते, ते छन्दोभङ्गभिया एव तद्रूपेऽङ्गी क्रियन्ते। वस्तुतो व्यावहारिक-प्रयोगकर्तुरस्य पुराणस्य कृते तेषामपाणिनीयप्रयोगाणां सत्ता भूषणमेवास्ति, न तु दूषणम्। अत एवोक्तमभियुक्तैः—

व्यावहारिकशब्दौघान् पुराणानि प्रयुञ्जते।

अपाणिनीयप्रयोगस्तु भूषणं न तु दूषणम्॥

अत्रोपपुराणेऽनेके व्याकरणविरुद्धा अपि केचन प्रयोगा दरी दृश्यन्ते।

क्वचन सन्धेरभावो यथा—

इच्छन्ति अन्येषाम् (१।१५)	हृष्टमना भवत् (४।२१)
मन्त्रेण अस्तुवन् (४।२४)	येन अन्नाद्यम् (६।२४)
ये च अमृताश्च (६।६२)	च आदिलोकम् (६।६६)
अत्र इति प्रोक्तम् (९।५)	तत्र अनन्तेन (११।१७)
तिष्ठति ईश्वरेच्छया (११।३९)	परित्यज्य अन्यक्षेत्राणि (११।४८)
अत्र अग्रेसरं (१४।५५)	केदारे उदकम् (१६।१०)
तत्र एको गतश्चाम्रः (१३।५३)	लोकसाक्षी अन्धक (१६।४३)
न मे आस्ते (१६।४०)	भूत्वा इमं मन्त्रम् (१८।३६)
स्थित्वा इमं मन्त्रम् (१८।४२)	अनाद्यन्त अशरीर (१८।५०)
स्थित्वा इमं (१८।४२)	मूर्ध्नि एवं (१८।४६)
करिष्ममि अनन्यस्तु (१९।१२)	भाद्रपदे आश्विने (१९।८०)

क्वचिल्लिङ्गस्वरव्यत्ययो यथा—

ब्रह्महत्यात् प्रमुच्यते (८।४७)	दक्षिणे दिशि (१४।६५)
आश्रमाणि च रम्याणि (१४।६५)	परममाश्रमम् (१५।१)
नाम्ना शान्ता शिवो लिङ्गः (१६।७८)	सप्तविंशतिपूरुषैः (२०।९)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसर्गं विनापि क्त्वः ल्यब् यथा—

तीर्थेश्वरं पूज्य (१२।१८), पितॄन् तर्प्य (१४।६०), एनं पूज्य (१६।७८)

क्कुत्रचन विभक्तिव्यत्ययो यथा—

आश्विने मास्यमावस्याम् (१४।५०) तमहं नात्र संशय (२१।४)

अथापि पुराणस्यास्य कथानकमतिमनोरमं, शैली हृदयग्राहिणी, भाषाऽतिसरला, सुबोधा, भावगम्या, प्राञ्जला चास्ति। पद्यानां पठनमात्रेणार्थः सहसाऽभिव्यक्तो भवति। राज्ञां सत्यजित्-इन्द्रद्युम्न-सौदास मान्धातॄणां चरितं चारु चित्रितमस्ति। मनोहरैः कदलीदलखण्डैः विविधप्रकारकैराम्र-जम्बू-नीम-कदम्ब-शिरीष-जम्बीर-खदिर-कपित्थ-पिचमिन्दु-विल्व-कर्कन्धु नारङ्ग-खर्जुर-तमाल-ताल-साल-पनस-बटाश्वत्थदिवृक्षैः परिपूर्णं, दाडिम-बकुलाशोक-पुन्नाग-नारिकेलैः-सुशोभितं, करवीर-कर्णिकार-कुन्द-चम्पक-यूथिका-मल्लिका-मालती,जातिभी रमणीयं,खञ्जन-कोकिल-चटक-चातक-चकोर-कुक्कुट-कारण्डव-पारावत-शुक-राजहंस-तित्तिर-मयूर-कलरवविराजितंसिद्धगन्धर्वकिन्नराप्सरोभि गीयमानगौरवं,गज-व्याघ्र-खड्ग-भल्लूक-मृग-वराहैश्चतुष्पाद्भिः:सुशोभितं-विविध, वनमश्रमादीन् दर्शं दर्शं चेतश्चमत्कृतं भवति, पूततमजलानां महानदीगङ्गादीनां महिमाऽतिरमणीयम्, कैलास-नीलाचलादीनां वर्णनं हृदयाकर्षकम्, विविधानां पुण्यवतां क्षेत्राणां तीर्थानामघौघनाशिनीनां नदीनां रमणीयवनानां चातिमनोहरं विवरणं दर्शं दर्शं प्रसीदन्तितमां समेषां सहृदयहृदयाणां पुंसां चेतांसि।

अत्र प्रसङ्गतः पादहरा-विन्दुसर-सिद्धेश्वर-एकाम्रकपदानां व्युत्पत्तिरपि सरलतया प्रदर्शितास्ति। यथा

(क) अत्र चैव द्विजश्रेष्ठा देवी पादहरा श्रुता।
पादे देव्या हरा यस्मात् तस्मात् पादहरा स्मृता॥ (१२।१५)

(ख) तस्मिन् क्षणे च भो विप्राः स्रवन्ति जलविन्दवः।
तस्माद् बिन्दुसरो नाम चक्रे देवगणैः सह॥ (१२।३)
सर्वे तत्र स्रवन्तिस्म जलबिन्दूनहर्निशम्।
तस्माद्वेदे पुराणे च नाम्ना बिन्दुसरोवरः॥ (१२।५)

(ग) चतुर्दशसु लोकेषु यः सिद्धो भगवान् शिवः।
शिव एकत्वमायाति तस्मात् सिद्धेश्वरः स्मृतः॥ (१५।१८)

(घ) एकाम्रवृक्षस्तत्रासीत् पुराकल्पे तु मुक्तिदः।
तत्र एको गत आम्र स्तस्मादेकाम्रकं वनम्॥ (१३।५३)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ कपिलपुराणस्य कथासारसंङ्ग्रहः

प्रथमेऽध्याये—

समाप्तिकामो मङ्गलमाचरेदितिशिष्टाचारानुमितश्रुत्यनुसारं ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते च मङ्गलमारणीयमिति व्यवहाराच्च ग्रन्थारम्भे ग्रन्थकारेण त्रैलोक्य मण्डपस्तम्भरूप हरिबाहुवस्तुनिर्देशपूर्वकं मङ्गलमारितम्—

पान्तु वो जलदश्यामाः शार्ङ्गज्याघातकर्कशाः ।
त्रैलोक्यमण्डपस्तम्भा श्चत्वारो हरिबाहवः ॥

ततो राज्ञः सत्यजितो महामुनिना कपिलेन सह सम्बादे उत्कलदेशस्य मध्ये पुण्यक्षेत्र-तीर्थ-देवता-विषयके प्रश्ने उत्कलदेशस्य[1] श्रेष्ठत्वकथनपूर्वकम् ऋषि-भरद्वाजयोः पुरातनेतिहासवर्णनव्याजेन पुष्करक्षेत्रस्य[2] वैशिष्ट्यम् ओड्रदेशस्य च महत्त्वं प्रतिपादितमस्ति । अत्र विषये पुष्करतीर्थे निवासिभ्यः ऋषिभ्यः पुष्करस्य माहात्म्यवर्णनपुरःसरमोड्रदेशस्य[3] महत्त्वं माहात्म्यं च विस्तरशो निर्दिष्टमस्ति । तथाहि—अत्र ये वीतरागा गतकल्मषाश्च स्थातु-

---

१. वर्षाणां भारतं श्रेष्ठ देशानामुत्कलः स्मृतः ।
उत्कलेन समो देशो देशो नास्ति महीतले ॥ ७ ॥

२. पुष्करे च वने पुण्ये तिष्ठन्तो मुनिपुङ्गवाः ।
भरद्वाजमिदं प्रोचुस्ते सर्वे च हतांहसः ॥ ९ ॥
अस्मिन् पुण्यवने विप्रा ये वसन्ति नरोत्तमाः ।
तेषां भाग्यं महज्जन्म सफलं गीयते द्विजाः ॥ २१ ॥
पुष्करेऽस्मिन् वने विप्रा येऽपश्यन्ति जनार्दनम् ।
सर्व-पाप-क्षयं कृत्वा हरेः पदमवाप्नुयुः ॥ २ ॥
अणुमात्रमय चात्र भवेद्धै पवतोत्तमम् ।
अत्र प्रतिग्रहं घोरं हालाहलविषोपमम् ॥ २३ ॥

३. देशानां प्रवरो ह्येष ओड्र देशोऽतिविश्रुतः ।
पुण्यायन्ते च पापानि तत्र देशे परन्तपाः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिच्छन्ति, तेषां भाग्यवतां मातापित्रो र्जन्म सफलं श्रूयते। ये चात्र द्विजातिभ्यो भक्त्या दानं ददति, तेऽन्ते स्वर्गंप्राप्य च्पुता न भवन्ति। अत्र स्वल्पं पुण्यं बहुतरं भवति। अतोऽत्र देवता अपि स्थातुं वाञ्छन्ति तर्हि अन्येषां का कथा ? येऽत्र पुष्करे स्थित्वा जनार्दनं प्रणमन्ति महेश्वरं च यजन्ति, ते प्राणपरित्यागानन्तरं स्वर्ग गच्छन्ति। अतो देवताभिः समायुष्टे वकुल-दाडिमाशोक-पुन्नाग-पाटल-पूग-नागकेशर-नारिकेल-ताल-तमाल-साल-वटाश्वत्थ नागंसुगन्धिते तलसीदलयुक्ते पवित्रं पापनाशने पुष्करे महर्षयः तपस्तप्तुं समीत्हन्ते। मोहसंगता ये नरा अत्र पापं कुर्वन्ति तेषामत्र भारतोत्तमे जन्म न जायते। अत्र कृतमीषत् पापं मेरुतुल्यं भवति। तस्मात् परमगतिलाभाय सर्व विहाय पुष्करः प्रयत्नेन सेवनीयः।[1]

द्वितीयेऽध्याये—

अथ ऋषिभिः पुन र्विस्तारपूर्वकमोड्रदेशस्य महात्म्यवर्णनप्रस्तावे भरद्वाजेन मुनिना दैवैः कल्पितस्य ओड्रदेशस्य वैशिष्ठ्यवर्णनपुरसरं सर्वपापापनोदिन्याः प्रसिद्धाया महानघा माहात्म्यकथनपूर्वकं महेन्द्रपर्वते वर्तमानस्य सर्वशास्त्रविज्ञस्य पुत्रहपुत्रस्य सुकान्तिनामकस्य ब्राह्मणस्य पितरं प्रति तपस्तप्तुं महारण्यगमनविचारे तेन निर्जनं विविधपक्षिणां कलरवेण सुखावहम्, अनेकैः मृगैः समाकीर्णं सिद्ध-गन्धर्व-किन्नरसेवितं, विद्वद्भिः परिकीर्तितम्, बिन्ध्यपर्वते वर्तमानं नानाफलाढ्यम् एकं सुरम्यं तपसो महत् स्थलं निर्दिष्टम्। ततः प्रसन्नमना स सुकान्तिनामा ब्राह्मणः पित्रा निर्दिष्टं सर्वथा उपयुक्तं सुमनोहरं तत् स्थानं सहसा जगाम।

स सर्वपुण्यानां फलदं तपसो निधानं निर्जनं च तत् स्थानं समवेक्ष्य इहैव तपः तप्स्यामीति मनसि विचारयामास। तदनन्तरं स तत्र जलाभावं वीक्ष्य प्राक्सलिलार्थं भगवतीं भागीरथीं प्रार्थयन् मन्त्रमिमं जजाप—

आयाहि निम्नगे देवि ! सरिच्छ्रेष्ठेऽम्बुधिप्रिये !
तपोऽत्राहं करिष्यति मयि गङ्गे ! कृपां कुरु ॥ (१२)

---

१. अल्पपुण्यं बहुतरं भवेत्तत्र न संशयः।
तस्मात् क्षेत्रमिदं विप्राः सेवनीयं प्रयत्नतः॥ ३१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमं पवित्रं फलदमिमं मन्त्रं जप्त्वा स ब्राह्मणो गङ्गाप्रसन्नतारूपं फलमवाप। अस्य मन्त्रस्य प्रभावेण तपसस्तीव्रतया च अखिलाघहारिणी भगवती गङ्गा तत्रावततार, उवाच च—साधु वत्स ! त्वयाऽत्र महत्तपस्तप्तं तेनाहं परमं प्रसन्ना त्वदर्थमत्र नगोत्तमे विन्ध्यपर्वते आगतवती[1]। अतःपरं त्वं स्वेच्छया तपो विधेहि, यावत्कालं ते तपसः फलं न भविष्यति तावदहमत्रैव तिष्ठामि[2]। तदनन्तरमेवाहं विन्ध्यपर्वतादस्मात् पूर्णसागरं गमिष्यामि। वत्स ! साम्प्रतं तव तपस्यार्थमेव देवानामपि दुर्लबाहं तव पितुः पुलहस्य महतस्तपसः प्रभावैणात्रागतास्मि[3]।

इदं गङ्गाया वचनं निशम्य पुलहपुत्रः सुकान्ति नितरां प्रसन्नो मेघगम्भीरया गिरा भगवतीं जाह्नवीमुवाच—

भगवति ! भगवतो भूतमावनस्य आदिदेवस्य श्रीमत आशुतोषस्य, शार्ङ्गपाणिनः भगवतो विष्णोः, जगद्विधातुर्ब्रह्मणश्च प्रिया सर्वेषां च प्राणिनां दुर्लभदर्शनाऽस्मि। त्वं हि पुरा ब्रह्मलोकाद् महेश्वरस्य मूर्ध्नि समागता। ततः प्राणिनां हितकाम्यया मेदिन्यामजस्रं प्रवहसि, उद्धरसि च लोकं पुनाना अनेकशोऽधिनो जनान्। इत्येवं भगवतीं भागोरथीं तद्गुणप्रभावमहात्म्यावर्णनपुरःसरं स तां स्तुतवान्।

ततो महाप्रभावा पुण्या भगवती भागीरथी तस्य द्विजस्य दिव्यां स्तुतिमाकर्ण्य भक्तिं चावलोक्य प्रसन्नतया तं बाहुभ्यामुत्तोलयामास।[4] मुखं चुचुम्ब, धूलिधूसरं शरीरं मार्जयित्वा च नीजे क्रोडे निवेशमामास। मधुरं

---

१. साधु पुत्र ! महाभाग ! तपस्तप्तं त्वया महत्।
त्वदर्थमाजगामाहं विन्ध्यं शैलं नगोत्तमम्॥ १५॥

२. इदानीं स्वेच्छया विप्र ! त्वं कुरुष्व तपो महत्।
तावदत्र तु तिष्ठामि यावत्ते तपसः फलम्॥ १६॥

३. देवानां दुर्लभा चाहं मनुष्याणां च का कथा।
प्राप्ताहं च त्वया ब्रह्मन् ! पुलहस्य प्रभावतः॥ १८॥

४. अथ गङ्गा महापुण्या दृष्ट्वा भक्तिं द्विजस्य च।
विप्रमुत्तोलयामास बाहुभ्यां पतितं भुवि॥ २७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वचश्चोवाच[1]—वत्स ! त्वं मे धर्मतः पुत्रोऽसि इतः परमहं ते माता संज्ञाता । हे, सुव्रत ! मनसेप्सितं वरं याचय[2]। ततो हे मातः ! स्वेष्टं पूर्णसागरंगच्छ मम कीर्तिश्चसततं प्रसस्तु मम पूर्णतपसः फलं प्रजायताम् । ततो गङ्गा एवमस्त्वित्युक्त्वा प्रावोचत-वत्स ! ते तपो विभवार्जितं भविष्यति । अहं महानदीतिनाम्ना विख्यातिं यास्यामि, तव च कीर्ति महीतले स्थास्यति । इत्थं त्रिलोकपावनी गङ्गा तस्मै वरं दत्वाऽम्बुविग्रहं धृत्वा महानदीति नाम्ना पूर्णसागरं ववाह। द्वितीयं च विग्रहं धृत्वा गङ्गा उत्कलं समासाद्य चित्रोत्पलेतिनाम्ना ख्याता । यो नरो महानद्यां स्नाति, पार्वतीपतिं भगवन्तं सदाशिवं च समर्चति, स सर्वपापविनिर्मुक्तो गङ्गास्नानफलं लभते । तथाहि—

महानद्यां नरःस्नात्वा दृष्ट्वा वै पार्वतीहरम् ।
सर्वपापविनिर्मुक्तो गङ्गास्नानफलं लभेत् ॥ ३८ ॥

तृतीयेऽध्याये —

ऋषीणां प्रश्ने भरद्वाजमुनिद्वारा नीलाचलक्षेत्रस्य माहात्म्यवर्णनप्रसङ्गे प्रोक्तं यत् तत्र पुण्यक्षेत्रे शरीरं त्यजन् मनुष्यो वैकुण्ठं व्रजति । महापुण्यं दशयोजनविस्तीर्णं योजनार्द्धं चोच्छ्रितं नानामुनिगणाकीर्णं विहङ्गैरूपशोभितं सफलैः पादपै र्युक्तं विविधैः पुष्पैश्च सुशोभितं तत् पुरुषोत्तमं क्षेत्रं साक्षाद्वैकुण्ठरूपं वरीवर्ति । समस्तक्षेत्राणामपि श्रेष्ठे क्षेत्रे सर्वतीर्थानामपि सर्वोत्तमे तीर्थे परमानन्ददायके तस्मिन् पुरुषोत्तमे क्षेत्रे नीलाचलपरे महोदधौ स्नात्वा जगन्नाथं पश्यन्ति तेषां ब्रह्महत्यादिदोषा दूरी भवन्ति । पुरा स नीलाचले भगवान् जगन्नाथो नीलाश्वरूपधृग् आसीत्, साप्रतं तु नीलदारुरूपः प्रतिभातीति वर्णितवान्[3]।

---

१. मुखेतु चुम्बनं दत्वा मार्जयित्वा तनो रजः ।
क्रोडे निवेशयामास उवाच मधुरं वचः ॥ २८ ॥

२. पुत्रस्त्वं मे महाभाग ! धर्मतो नात्र संशयः ।
तवाद्यापि चमाताऽहं वरं वरय सुव्रतः ॥ ३० ॥

३. नीलाचलवरे विप्रा पुरा नीलाश्मरूपधृक् ।
इदानीं तु जगन्नाथो भाति दारवनीलया ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनः ऋषयः पप्रच्छुः—पुरा देवदेवो जगत्पतिर्भगवान् विष्णु र्नीलाद्रौ कथं नीलाश्मतनु र्जातः, कथं च सांप्रतं स तद्भिन्नो जात इति। तदुत्तरे पुनराह भरद्वाजः—ऋर्षिवर्याः ! तां सनातनीं कथां कथयामि यां श्रुत्वा मानवा न पुनर्मोहं गच्छन्ति। तद्यथा—सत्ययुगे इन्द्रद्युम्नो नाम महिपतिः भगवतो जगन्नाथस्य दृढ़तरो भक्त आसीत्। स च साक्षाद् ब्रह्मणः पञ्चमतनु र्भक्तः। यदा भगवान् सदाशिवो गिरिजां पार्वतीं समुद्वहत् तदा स ब्रह्मणः पञ्चमं शिर जघान। तत्कालादेव ब्रह्मा चतुर्भुखोऽभवत्। तच्छिरश्च इन्द्रद्युम्ननाम्ना विश्रुतो जातः। स च राजर्षिः यज्वा, तपस्वी, दान्तः, शान्तः, अतिथिपूजकः सत्यसम्पन्नः जितक्रोधो जितेन्द्रियो वैष्णवश्चाभवत्। स एकदा चेतसि चिन्तयामास यत् कथं लोचनाभ्यां चतुर्वाहुं भगवन्तं विष्णुं द्रक्ष्यामिति। इत्थं निरन्तरं चिन्तयतः तस्य राज्ञः भगवान् विष्णुः स्वप्ने दर्शनं दत्वा प्रावोचात्[1]—राजन्। ममेदं वचनं निशामय यच्छ्रुत्वा पुनरेवं मोहं न यास्यसि। लवणोदधेः तीरे बालुकाभिः समावृते मुक्तिदं नीलाचलं ब्रह्मादीनामपि दुर्लभं रहस्यमयं दिव्यं मम स्थानमस्ति, यद् वीतरागाः तपस्विनो योगिनोऽपि न जानन्ति। गोप्यं पुण्यं मत्पूज्यं पुरुषोत्तमं तत्स्थलं प्रलयेऽपि न नश्यति। तत्राहं वटपत्रपुटमध्ये वर्तमानः तिष्ठामि। तत्र त्वं गत्वा तपस्तत्प्वा मां हि नीलतनुं द्रक्ष्यसि। तत्र मत्पार्श्वे हिरण्याख्यं महत्तीर्थं वर्तते। तत्र भक्त्या स्नात्वा मम देहे विलीयते। एवमुक्त्वा प्रस्थिते केशवे इन्द्रद्युम्नस्य निद्राभङ्गोऽभवत्। तदा स कृष्ण ! कृष्णेति कीर्तयन् भृशं दुःखार्तो रुदन् बहु विललाप। किं मया दुष्कर्म कृतं यत्परिणामतया भगवतो दर्शनं न जायते इत्येवं विलपतस्तस्य राज्ञः पौरा मन्त्रिणः पुरोधसश्च समागताः। ते सर्वे तादृशं रुदन्तं विलपन्तं च इन्द्रद्युम्नं भूपतिं विलोक्य भृशं दुःखिताः सन्तः तं पप्रच्छुः—राजन् ! किमर्थं भवता रोरुद्यते, विललाप्यते च बहुविधम् ? अस्मान् कथय वयं यथार्थं साधयामोऽत्र नास्ति काचित् संशीतिः।

तन्निशम्य स भूपतिरवोचत्—आर्याः ! मया स्वप्ने शङ्ख-चन्द्र-पद्म-गदाधरो वनमाली घनश्यामो हृषीकेशः पीताम्बरधारी भगवान् विष्णु र्दृष्टो

---

१. इत्थं चिन्तयतस्तस्य महीपालस्य भो द्विजाः।
स्वप्ने तु दर्शनं दत्वा विष्णुरेवं वचोऽब्रवीत्॥ १८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मामुपादिशत् यत् त्वं नीलपर्वते पुनः तपस्तप्त्वा मामवश्यं द्रक्ष्यसे। अतोह मिदानी निर्मलं नीलाद्रिं गमिष्यामि, यूयं मम योग्यं संभारं कुरुध्वम्। तं निशम्य ते पौरा मन्त्रिणः पुरोधसश्च तत्स्वीकृत्य स्वं स्वं पुरमगच्छन् राजा च नीलाद्रिं प्रविश्य दुस्तरं तपश्चचार।

तदनन्तरं रविनन्दनो यमो दुःखितः सन् वेपमानशरीरो वासुदेवस्याग्रे उपस्थाय तं स्तुवन्नवोचत्[1]—दीनार्तनाशन! भगवन्! किमहं करोमि। तत उचाव भगवान् रविनन्दन! किं ते दुःखमुपस्थितं ब्रूहि, तमहमपहरिष्यामि। ततो यम उचाव–भगवन्! इन्द्रद्युम्नो नृपति र्वलान्वित आगच्छति, तत्प्रभावात्सर्वे मुक्ति यास्यान्ति। अतस्त्वं इन्द्रनीलं परिहाय रोहिणाख्यं तत्तीर्थ पातालं यातु, नो चेत् स्नात्वा काकादयोऽपि मोक्षं गमिष्यन्ति, का कथा अन्येषां नराणाम्।[2] ततो भगवान् विष्णुरेवं भवत्वित्युक्त्वा तं तोषयामास। ततोयमो जगन्नाथस्याज्ञामवाप्य स्वस्थानं ययौ, भगवांश्च देवदेवो तस्मिन् नीलाचलेऽतिष्ठत्।

आज्ञां प्राप्य जगन्नाथात् स्व गृहं भस्करि र्ययौ।
देवदेवोऽपि भगवानास्ते नीलाचले शुभे॥ ५८॥

चतुर्थेऽध्याये—

मन्त्रि-पुरोहित-पुरजन-वारणैः सह इन्द्रद्युम्नो महीपतिः नीलशैलं गच्छन् मध्येमार्गं शिखरमवलोक्य तं नमस्कृत्य च तत्समीपमुपजगाम। स्वर्णकूटात् परं विराजमाने नीलशैले शङ्खचक्रपद्मगदाधरं श्रीहरिं समीक्ष्य स भूपतिः तत्समीपमुपेत्य वद्धाञ्जलिः सन् देवर्षिं नारदं परिपप्रच्छ—भगवन्! भवान् हि त्रिकालज्ञः, मम दक्षिणं चक्षुः परिस्फुरति, वाममङ्गं च प्रकम्पते कृपयैतत्कारणं कथय। इत्येवं पृष्टो देवर्षिः प्रावोचत्—राजन्! अद्य इन्द्र-

---

१. दुःखितो यमुना भ्राता वेपमानः पुनः पुनः।
स्थित्वाग्रे वासुदेवस्य वाक्यमेतदुवाच ह॥ ४९॥

२. यस्मिन् स्नात्वा महाबाहो! काको मुक्तिमवाप ह।
यद्रूपं च समालोक्य शवोऽपि चाजरामरः॥ ५६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नीलतनुः हरिः पाताले रोहिणाख्यं नगं गतवान् । ततो भूपतिः तद् वज्र-पातसमं वचनं निशम्य गिरेः शृङ्गमिव सहसा भूमौ निपपात । तदवलोक्य मन्त्रिपुरोहितादयो जना दुःखिताः सन्तः कथञ्चिद् भूपतिंस्तमवबोधयामासुः ।[१]

एतस्मिन्नेवावसरे मुनिपुङ्गवो देवर्षि र्नारद इदं रम्यं वच उचाव— भूपते ! साम्प्रतं भगवान् जगन्नाथो जले तरिष्यति । तदाकर्ण्य जनाः कोलाहलं चक्रु र्यत् शङ्खचक्राङ्कितो दारुर्जले उत्प्लवते । तत् जनानाममृतोपमं वचनं निशम्य हर्षमानसो नृपतिः इन्द्रद्युम्नो देवर्षि करे कृत्वा कृताञ्जलिपुटः सन्नुवाच–ब्रह्मपुत्राय ते नमः । ततस्तेषां मध्ये आगत्यावलोक्य च जनैः साकं सहर्षः तं प्लवमानं दारु वहि र्निःससार । तदनन्तरमेव देवानां शिल्पिप्रवरो विश्वकर्मा समागत्य वलभद्र-जगन्नाथ-सुभद्राणां प्रतिमात्रयं सुदर्शनं च निर्मितवान् । तत्र तेन पीतवासो वनमाली शङ्खचक्रधरः, बलभद्रः हलधरोगदापाणिरुन्नतशिरस्कः, सुभद्रा पद्महस्ता, सुदर्शनं च स्तम्भरूपं विनिर्मितम् । एताः प्रतिमा निर्माय माण्डपे निहिताः । तदनन्तरं तत्प्रतिष्ठापनार्थं ब्रह्मसदनं नृपतिरिन्द्रद्युम्न उपस्थाय तं कुशहस्तं ब्रह्माणमवलोक्य नमस्कृत्य च स्तुतिं कुर्वाणः स्वमनोरथ पूर्तये प्रार्थयत् । तदाकर्ण्य प्रसन्नो विधाता तं राजानं प्रशस्य तदर्थं चक्रपाणिनः प्रतिष्ठायै शीघ्रं भूतले गन्तुं स्वीचकार[२] ।

ततो हृष्टमना भूपति र्ब्रह्मलोकात् परावृत्य तत्रागतः । भगवान् ब्रह्मा च तत्काले तत्रोपस्थाय 'जितं ते' इति मन्त्रेण प्रतिष्टां कारयामास । तत्राविर्भूतं भगवन्तं, शङ्खचक्रधरं जगन्नाथं देवतादयोऽस्तुवन् । ततो हरिरिन्द्रद्युम्नं प्रावोचत्— राजन् ! अन्यानि पुण्यक्षेत्राणि परिहाय अहं सर्वतोभावेन परार्द्धकालपर्यन्तं नूनमत्र स्यास्यामि । महीपते ! इदं मम हितकरं वचनं निशम्य प्रतिवत्सरं

---

१. तं दृष्ट्वा दुःखिताः सर्वे मन्त्रिणश्च पुरोहिताः ।
शीघ्रमुन्नामयामासु र्नृपतिं पतितं भुवि ॥ ८ ॥

२. महोदधौ नरः स्नात्वा दृष्ट्वा श्रीपुरुषोत्तमम् ।
ब्रह्महत्यादिपापानि क्षयित्वा मोक्षमाप्नुयात् ॥ २ ॥
गङ्गायाश्च सरस्वत्या गोदावर्याश्च भो द्विजाः ।
यत्तत् फलमवाप्नोति अचलाम्बुधिदर्शनात् ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रथेऽस्मान् स्थापयित्वा गुडिचाख्यो महोत्सवः प्रकर्तव्यः। ये मानवा श्रद्धया मुदान्विताः समुद्रमध्ये स्नात्वा मां रथे स्थापितं द्रक्ष्यन्ति, ते सर्वपापविनिर्मुक्ताः सन्तो मत्स्थानं यास्यन्ति। इत्येवमुक्त्वा जनार्दनः तुष्णीमास, ब्रह्मापि ब्रह्मलोकं गतः। इन्द्रद्युम्नो भूपतिश्च देवदेवं जगत्पतिं प्रयत्नेन पूजयित्वा निर्मलां मुक्तिमवाप। एवं पुरा जगन्नाथः इन्द्रनीलस्वरूपधृक् दारुब्रह्मस्वरूपेणावतस्थे—

इन्द्रद्युम्नो हि राजर्षि र्देवदेवं जगत्पतिम् ।
पूजयित्वा प्रयत्नेन ततो मुक्तिमवाप सः ॥ २९ ॥
एवं पुरा जगन्नाथ इन्द्रनीलस्वरूपधृक् ।
दारुब्रह्मस्वरूपेण भातीदानीं जगत्पतिः ॥ ३० ॥

पञ्चमेऽध्याये—

तत्र पुरुषोत्तमे क्षेत्रे ये वसन्ति, ते नरा सुतेजसा भासमाना भगवतो विष्णोः समीपमुपगच्छति। महोदधौ स्नात्वा पुरुषोत्तमं च दृष्ट्वा नरा ब्रह्महत्यादिजन्यं पापं क्षयित्वा पुरुषोत्तमं प्राप्तुवन्ति[1]। गङ्गा-सरस्वती-गोदावरी-यात्रया यत्फलं प्राप्यते, तदेव फलमचलाम्बुधिदर्शनात् लभ्यते। तत्रैव त्रैलोक्य-पावनं मार्कण्डेयतीर्थं वर्तते, यत्र स्नात्वा देवा पुरा स्वं स्वं पदमवापुः। तत्रैव महर्षिणः मार्कण्डेयस्य च हितार्थं भगवता श्रीकृष्णेन निर्मितं मार्कण्डेयवटं वर्तते। तत्र स्नात्वा नरः पार्वतीपतिं च दृष्ट्वा कोटिजन्मकृतं पापमपोहति। तस्मिन्नेव नीलाचले देवराजस्य दक्षिणे यमसंयमनतत्परो यमेश्वरो विद्यते, तं समालोक्य भक्त्या अर्चयित्वा च यमदण्डरहितो जीवः शिवत्वमवाप्नोति। तत्पश्चिमदिग्भागे अलाव्वीश्वरसंज्ञकं लिङ्गं वर्तते तत् संसेव्य नरः स्वं मनोरथं लभते। अपुत्रोऽपि पुत्रं लभते, व्यङ्गश्च कन्दर्पसमसुन्दरो जायते। तत्सन्निधावेव कपालमोचनं नाम लिङ्गं वरीवर्ति तद् भक्तितो विधिवदर्चयित्वा स्तुत्वा च मानवो ब्रह्महत्यादिपापतोऽपि विमुच्यते।

१. साधु पुत्र ! महाबाहो ! वैष्णवस्त्वादृशो भुवि ।
नातीतो वर्तमानश्च न भविष्यति मे मतिः ।
अधुनाऽहं गमिष्यामि तवार्थं चक्रपाणिनः ।
प्रतिष्ठां च करिष्यामि गच्छ शीघ्रं महीपते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्माद् आत्मनो मुक्तये सर्वप्रयत्ननेन पुरुषोत्तमो गन्तव्यो द्रष्टव्योऽर्चनीयो वन्दनीयश्च[१]। तत्र वटमूले वटेश्वरं लिङ्गं विद्यते। तस्य दर्शनमात्रेण सर्वाणि पापानि प्रणश्यन्ति। वारणस्या समं पुरुषोत्तमाख्यमेकं क्षेत्रमस्ति, यत्समं त्रैलोक्येऽपि किमपि क्षेत्रं नास्ति। तत् क्षेत्रं सर्वेषां देवानां च प्रधानमस्ति। किमधिककथनेन वर्षशतैरपि पुरुषोत्तममहात्म्यं वक्तुमशक्यम्, तत्समानं किमप्यन्यत् क्षेत्रं न वर्तते।

पुन र्मुनिभिः पृष्टो भरद्वाजो यमेश्वरमाहात्म्यमुक्त्वा तत्र तपस्तप्तुं प्रशस्तस्थानमुक्तं तत्, यतो हि तपसो मुक्तेश्च सिद्धिदायकं तत् स्थानमस्ति। तत्रेषदपि कृतं मेरुतुल्यं बहु प्रजायते, देवानामपि दुर्लभं सर्वसिद्धिप्रदायकं तत् स्थानं केन बहु वर्णयितुं शक्यम्--

इन्द्रादिदेवताः सर्वे तत्र सन्ति तपस्विनः।
ईषत् पुण्यं भवेत्तत्र मेरुतुल्यं न संशयः ॥ २० ॥
कुरुध्वं तत्र भो विप्रास्तपोमुक्तिप्रदायकम्।
ये भजन्ति नरास्तत्र शान्तास्ते पूतमानसाः ॥२१॥

षष्ठेऽध्याये—

अथ भगवतो भास्करस्य महात्म्यं श्रोतुकामनया ऋषयो भगवन्तं भरद्वाजं पुनः प्रार्थयन्। तदुत्तरे तेन एकं पावनं क्षेत्रं प्रोक्तं, यत्र गत्वा जाम्वतीपुत्रः शाम्बः कुष्ठरोगादमुच्यत। ततः पुनः पप्रच्छुः ऋषयो यत् शाम्बः कुत्र गत्वा कं देवमाराध्य कुष्ठाद्विमुक्तः, किमर्थं च तस्य देहे कुष्ठं वभूवेति। तदनु भरद्वाजोऽकथयत्--सावधानतया शृणुत तत् स्थानं यथाज्ञानं निर्दिशामि-द्वापरे युगे कृष्णवने श्वेतगङ्गेतिनाम्ना विश्रुता[२] पावनी नदी आसीत्, यत्र भगवान् हरिः माधवरूपेण विराजतेस्म। तत्रैव च मत्स्यमाधवो विराजमानो वर्तते। उभयोः दृष्टियोगेन कीटोऽपि मुक्तिं गच्छतिस्म, किमु [वक्तव्यं

---

१. तस्मात् सर्वप्रयत्नेन गन्तव्यः पुरुषोत्तमः।
द्रष्टव्यश्च जगन्नाथ आत्मनो मुक्तिकारणात् ॥ १२ ॥

२. दुष्टानां निग्रहार्थाय शिष्टानां पालनाय च।
द्वापरे कृष्णवने विप्राः श्वेतगङ्गेति विश्रुता ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानवानाम् । तत्र ब्रह्मघाती सुरापी गोघ्नो नरघातको नरो मुक्तिं लभते । श्वेत-गङ्गायां नराः श्वेत-मत्स्यकयोर्दर्शनं कृत्वा पापानि परित्यज्य नूनं श्वेतद्वीपं व्रजन्ति । तत्रैव इन्द्रतुल्यो बन्दनीयः इन्द्रद्युम्नाभिधः सरवरो विद्यते । तत्र स्नात्वा नारा इन्द्रेण साकं मोदन्ते । तत्रैव वर्तमानं नीलकन्धरं नरसिंहं पूजयित्वा नरा ज्योतिर्लिङ्गं गच्छन्ति । यो हि मानवो हरि-शङ्करायोर्मध्ये पितॄन् उद्दिश्य पिण्डदानं कुरुते, स तानुद्धृत्य रविलोकं व्रजति । तत्र दारुवन-समीपे पुण्यतमं कल्पवटं विद्यते, तस्य छायां समाश्रित्य मानवो ब्रह्महत्यादोषाद् विमुक्तो जायते । यश्च तस्य वटस्य प्रदक्षिणां कृत्वा तं वटं पूजयति, तस्य हरिः शतजन्मभिः कृतमपि पापं क्षमते । तत्र मङ्गलावटमूले मङ्गलदायिनी देवी विराजते, यस्या दर्शनं पूजनं च विधाय प्राणी मोहबन्धाद् विमुच्यते । वटस्य तस्य पश्चिमे भागे विमलप्रदायिनी विमला देवी विद्यते । तस्य दर्शनमात्रेण नरो विद्वान् भवति । तदग्रे कोटिसूर्यसमप्रभा नरसिंहमूर्ति विराजते, या हि दर्शनमात्रेण मुक्तिं प्रदत्ते ।

तस्याग्रे शङ्खचक्राङ्कितो वनमालाविभूषितःक्षीरशायी जगन्नाथोऽस्ति । तस्य पादतले लक्ष्मीः, कर्णमूले सरस्वती, नाभिपद्मे वेदवेदाङ्गपारगः कमण्ड-लुधरः चतुर्मुखो ब्रह्मा, शेषदेहे पार्वतीपति र्भगवान् शङ्करोऽभिन्नत्वाद् व्याप्य तिष्ठति । अचलोपरि शेषशायी देवो भगवानन्तो विराजते, यस्य दर्शनान्नरो मुक्तिमवाप्नोति । तत् क्षेत्रं पुरुषोत्तमक्षेत्रनाम्ना प्रसिद्धमस्ति । दारुरूपस्य भगवतो निर्माल्यं समस्तपापनाशकमस्ति । तदर्पितमन्नं च प्रयत्नेन भक्षणीयमस्ति । महापातकनाशकस्य जगन्नाथस्य नैवेद्यभक्षणाद् मानवः कोटिकपिलादानजन्यं फलं लभते[1] । येन जगन्नाथाय समर्पितमघहरमन्नं भक्षितं तेन किं पुण्यं किं वा तपो नानुष्ठितम् ? यथा भगवान् जगन्नाथो दर्शनमात्रेण मुक्तिं ददाति तथैव तदर्पितमन्नमपि मुक्तिं ददाति । द्वापरे युगे भगवान् जगन्नाथो विष्णुकृष्णरूपेणावतीर्य गोगोपगोपीमध्ये स्थितः । अनन्तरं द्वेषकारिणं मातुलं जघान । मथुरायां च उग्रसेनं नृपतिं चकार । तदनन्तरं

---

१. जगन्नाथस्य नैवेद्यं महापातकनाशनम् ।
भक्षणात् फलमाप्नोति कपिलाकोटिददानजम् ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालयवनाक्रमणभयात्ततो निर्गत्य समुद्रमध्ये द्वारकापुरीमगच्छत्। तस्यां यादवैः सह विराजमानः पाण्डवानां हिताय धर्मराजस्य युधिष्ठिरस्य राजसूये महायज्ञे हस्तिनापुरमुपेत्य धर्मराजाय श्वेतातपत्रं प्रदाय हस्तिनापुरस्य राजानं च विधाय पुनः द्वारकापुरीं परावर्तत। इत्थं प्रेम्णा सर्वान् जनान् पालयतः तस्य भगवतः श्रीकृष्णस्य जाम्बवत्यां द्वितीयरतिनायक इव सुन्दरः सुलोचनः सुतः समजनि।

अथैकदा योषिद्भिः समावृतं जलक्रीडां कुर्वाणं तमवलोक्य ता विह्वलाः सत्यः मुमुहुः तासां रेतश्च चष्कन्द[1]। तदवगत्य भगवान् श्रीकृष्णः ता निन्दित्वा उक्तवान् यन् नारीणामसीत्वं धिग् धिक्, यतः पुत्रं दृष्ट्वा सर्वाः मुमुहुः। तदनन्तरं किञ्चित्क्रुद्धः सन् शाम्बमुवाच-अरे वत्स! तवाद्भुतं सौन्दर्यमालोक्य मातॄणां यद्रेतःस्कन्दो ज्ञातः, अतस्तव शरीरे कुष्ठरोगो जायताम्[2], येन कदापि कस्यायाः नार्यःकामजागृतिर्न स्यात्। एवमुक्ते श्रीकृष्णे तत्कालमेव शाम्बस्य सर्वाङ्गेषु कुष्टं जातम्। ततः शाम्बो वेपमानकलेवरः पितरमेवं प्रार्थयत्—तात! अपराधे कृते पुत्रे जनक एव क्षमते। अतः कृपया अपराधक्षमापनं कृत्वा समुपदिश, इदानीं किं करोमि, कुत्र गच्छामि, कथं मे शापमुक्ति र्भविष्यतीति।

पुत्र! त्वमिदानीं मैत्रेयाख्यं वनं गच्छ। तत्र जितेन्द्रियः सन् तपस्तप्त्वा भास्करं च संप्रसाद्य कुष्टान्मुक्तो भविष्यसि। तदनुसारमेवात्यन्तदुःखितः शाम्ब एकाकी एव तत्र जगाम। तत्रोपस्थाय च प्रयत्नेन शान्तो दान्तो निराहारो वायुभक्ष्यो जितेन्द्रियः सन् शाम्बो सूर्याध्यदानपरायणः भगवन्तं भास्करं संपूजयन् स्तुवन् सूर्य! सूर्य! इति गायन् द्वादशवर्षपर्यन्तं सुदारुणं तपस्तेपे।

दिवाकर! नमस्तेऽस्तु प्रभाकर! नमोऽस्तुते।
त्राहि मां करुणागार! व्यङ्गं च पतितं भुवि॥ ४२॥

---

१. तं दृष्ट्वा योषितः सर्वाः ययुर्मोहं च विह्वलाः।
तासां च स्कन्दते रेतश्चक्रे निन्दां तदा हरिः॥ ३३॥

२. ततः शाम्बमुवाचेदमीषत्क्रोधसमन्वितः॥
मातॄणां स्कन्दते रेतः आगते तव पुत्रक।
इदानीं तव देहे च कुष्टं भवतु सर्वतः॥ ३६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततः कतिचित् काले गते भूयो भूय एवमुदीरयन्तं भुवि पतितञ्चालोक्य भगवान् भक्तवत्सलो भास्करः स्वप्ने शापनिर्मुक्तिकारणं वचनमुवाच—हे महावाहो वत्स ! अत्रैव तिष्ठ अहं हि स्वकां तनुं दर्शयामि तामवलोक्य रोगान्मोक्ष्यसे । हे जाम्वतीसूनो ! यदि त्वं मत्तः पापमुक्तिमपेक्षसे तर्हि ४७-४९ श्लोकेषु वक्ष्यमाणानि मे नामानि निरन्तरं कीर्तय । ममोदयसमये य एतानि मे नामानि श्रद्धया पठति तस्सै शान्ति प्रयच्छामि । इति मदीयं सत्यकथनमवेहि । इत्युक्त्वा भगवान् भास्करोऽन्तर्हितः, शाम्बस्य च निन्द्रा व्यपगता । ततः स प्रभाते स्नानार्थं देवलोकप्रदायिनीं महापुण्यां चन्द्रभागां नदीं ययौ । तत्रासौ शाम्बः द्विभुजां पद्मलाञ्छितां प्रतिमां जलमध्ये ददर्श । तां वीक्ष्य दृढः सन् सरेण स्वसमीपमानीतवान् । तच्छरीरं मार्जयित्वा जलेन च प्रक्षाल्य तदर्थं मन्दिरं कारयित्वा सत्वरं तत्र स्थापयामास । तां भक्त्या विधिवत् संपूज्य नमस्कृत्य च सहसा कुष्ठरोगाद्‌विमुक्तो जातः । तत स वाराणसीं ययौ[१] ।

एवं शाम्बः पुरा तपस्तप्त्वा दिवाकरं चार्चयित्वा प्रयत्नेन कुष्ठरोगाद् विमुक्तः । अत्र ये वीतरागा गतकल्मषाश्च स्थातुमिच्छन्ति तेषां मनोरथफलं भगवान् भस्करो नूनं पूरयति । ये हि रम्ये मैत्रेयवने शरीरं त्यजन्ति ते पापविनिर्मुक्ता ज्योतिर्लोकं गच्छन्ति । येऽत्र मानवाः संयमेन्द्रियाः सन्तो रविवासरे रविक्षेत्रं प्रणमन्ति ते शरीरान्ते रविसविधे व्रजन्ति । ये नरा मैत्रेयाख्ये वने निवसन्ति, ते मरणानन्तरं देवलोकं समासाद्य राविणा सह मोदन्ते ।

---

१. यदा जाम्बवती सूनो ! पापमुक्तिमपेक्षसे ।
एतानि मम नामानि कीर्तयस्व निरन्तरम् ।। ४४ ।।
एकविंशति नामानि यः पठेदुदिते मयि ।
तस्य शान्तिं प्रयच्छामि सत्यं सत्यं वदाम्यहम् ।। ५१ ।।
तां पूजयित्वा विधिवद् भक्त्या नत्वा परं ततः ।
विमुक्तरोगः सहसा ययौ वाराणसीं पुरीम् ।। ५७ ।।
एवं पुरा गतः शाम्वः तपस्तप्त्वा दिवाकरम् ।
अर्चयित्वा प्रयत्नेन ततः कुष्ठाद् ध्यमुच्यत ।। ५८ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रव देवतानां मङ्गलप्रदं मङ्गलतीर्थं विद्यते। यो नरो मङ्गलवासरे स्नाति स मङ्गलमवाप्नोति। तत्र त्रैलोक्यपावनं शालमलीभाण्डनामकं तीर्थमस्ति। तत्र सर्वपापहरे गुह्ये शालमलीभाण्डतीर्थे सिद्धकिन्नरगन्धर्वा निवसन्ति, अनेके मुनिवर्याश्च तत्तीर्थं सेवन्ते। सर्वेषां मुक्तिदायके तस्मिन् तीर्थे स्नात्वा नरः सूर्यकन्ति लभते। श्रीशालमलीभाण्डे स्नात्वा छायापति वीक्ष्य च अघौघं नाशयित्वा मनुष्यः सूर्यलोकं व्रजन्ति। सूर्यगङ्गासमं किमपि तीर्थं ब्रह्माण्ड-गोलके नास्ति। तत्र स्नात्वा नरः सूर्यलोकं गच्छन्ति, सर्वतीर्थवरः सरितांपतिः सागरोऽस्ति। तत्र महोदधौ स्नात्वा नरः सर्वपापेभ्यो विनिर्मुक्तो भवति। तत्रैव महोदधेः तटे रामेश्वरलिङ्गं वर्तते यत् श्रीरामः प्राणिनां हितकाम्यया पूजयामासः। ये मानवा गन्धपुष्पधूपदीपनैवेद्यादिभी रामेश्वरमर्चयन्ति तेषामिष्टं वरं श्रीरामचन्द्रः प्रयच्छति। ते च शिवलोकं गच्छन्ति। ये च चन्द्रभागा जले विधिपूर्वकं स्नान्ति ते चन्द्रतुल्यशरीरं धृत्वा चन्द्रलोकं व्रजन्ति[1]। अर्कवटनामकः कल्पवृक्षो वर्तते, स च नानामुनिजनाकीर्णो विविधैः विहङ्गैरुपशोभितः सर्वथा अच्छेद्यः, अभेद्यो मुक्तिदायकश्चास्ति। स हि पादपः सर्वेषां प्राणिनां हितकरः। तत्र वृक्षतले ये उत्तमं मन्त्रं जयन्ति तेषां त्रिपक्षाभ्यन्तरे स मन्त्रोऽभीष्टसिद्धिदो भवति[2]। भूमावर्कवटः स्थर्लोके नन्दनं स्मृतम्। तत्र बहवः सिद्धगणाः सन्ति। तत्र ये विष्णुं ध्यायन्ति तेषां स प्रसीदति। वटच्छायायां ये तिष्ठन्ति, ते सिद्धा भवन्तीत्यत्र कश्चन सन्देहो नास्ति। विजयादशम्यां ये तत्र दिवाकरमर्चयन्ति, तेषां पापानि नश्यन्ति, तेऽत्र विजयिनो भवन्ति। पवित्रे मैत्राख्ये वने ये रथयात्रामहोत्सवं पश्यन्ति, ते हरेः शरीरे लीयन्ते। मैत्रेयाख्ये वने एवमादिगुणाः सन्ति, तानि वक्तुं वर्णशतैरपि न कोऽपि शक्नोति—

एवमादि गुणाः सन्ति मैत्रेयाख्ये तपोवने।
न सामर्थ्यं द्विजश्रेष्ठा वक्तुं वर्णशतैरपि ॥ ८० ॥

---

१. चन्द्रभागा जले तत्र ये स्नान्ति विधिपूर्वकम्।
चन्द्रतुल्यवपुर्धृत्वा चन्द्रलोकं व्रजन्ति ते॥ ७२॥

२. तत्र वृक्षतले ये च जपन्ति मन्त्रमुत्तमम्।
त्रिपक्षाभ्यन्तरे मन्त्रः साधकाभीष्टसिद्धिः॥ ७५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तमेऽध्याये—

पार्वतीक्षेत्रमाहात्म्यविषयके ऋषीणां प्रश्ने भरद्वाजमुनिद्वरा तदुपक्रमः— पुरा ब्रह्मणा सृष्टिरक्षार्थं यदुत्तमं क्षेत्रं निर्मितं तत् सुनिर्मलं महापुण्यं विरजाख्यं क्षेत्रमुच्यते। तत्र विरजादेवी विराजते, या साधकानां हितार्थं स्थिता भुक्ति मुक्ति च प्रयच्छति। दशसहस्रवर्षं यावत् तपसा यत् फलमवाप्यते तत्फलं विरजदर्शनमात्रेण प्रजायते। कुरुक्षेत्रे हरिद्वारे स्नानेन यत् फलं प्राप्यते, तत्फलं तत्र सद्योऽवाप्यते। तत्र मुक्तिदायको वाराहरूपी भगवान् विराजते, तं दृष्ट्वा पूजयित्वा च मनुष्यो विष्णुलोकं गच्छति।

तत्राखण्डलेशः पार्वतीपति भगवान् महेशो विराजते, यस्य दर्शनेन यत्र स्थानेन वा मानवा यमभयं विहाय विष्णोः परमं पदं व्रजन्ति। आखण्डलेशं समासाद्य कुष्ठी कुष्टरोगाद् विमुच्यते, वन्ध्यानारी पुत्रं प्राप्नोति। तत्र क्रोडाखण्लयोर्मध्ये देवदुर्लभे स्नात्वा कीटाद्या अपि मुक्ति गच्छन्ति, किं पुनर्मानवाः। तत्र गुरुहा ब्रह्मदा गोध्नः सुरापो विष्णुनिन्दको वा देहं परित्यज्य वैकुण्ठं व्रजति। तत्रैव वर्तमानं मुक्तीश्वरं लिङ्गं विलोक्य बहवो मुक्ता अभूवन्। तत्रेशानकोणे विराजमाने विरजा क्षेत्रे महापुण्या गयानाभिः प्रोच्यते यत्र पितृभ्यः पिण्डं प्रदाय मानवा वीतकल्मषाः सन्तः हरे पदं प्राप्नुवन्ति। तत्रैव वैतरणी नाम्नी मुक्तिप्रदायिनी नदी वर्तते, तस्यां स्नात्वा द्रष्ट्रिणं देवं दृष्ट्वा च तत्कुलानामुद्धारो भवति, अन्ततो विष्णुपुरं यान्ति। तत्रैव वर्तमानं त्रिलोचनं दृष्ट्वा विधिवत् सम्पूज्य मनुष्यः त्रिलोचनं प्राप्नुवन्ति, तेषां तापत्रयं च विलयं यान्ति। तत्र क्षेत्रे उत्तमं कापिलं तीर्थं विद्यते, यस्य जलं निर्मलं मनोज्ञं च वर्तते। पितृपक्षस्य चतुर्दश्यां कापिले तीर्थे नरः स्नानं विधाय शैलेन्द्रतनयापतिं प्रसाद्य स्वर्गपुण्यमवाप्नोति। तत्र स्नानेन कोटिकपिलादानफलं प्राप्यते। तत्रैव वर्तमानं गोग्रहं तीर्थं मुनीन्द्रैरुपसेवितं वर्तते, यत्र सविधिस्नानेन गोलोकस्नानजन्यं फलं मिलति। हिमांशुना निर्मिते सोमतीर्थे स्नात्वा नरश्चन्द्रलोकं गच्छति। तथा चन्द्रप्रसादात् अनेकान् भोगान् भुङ्क्त्वा भूमिलोके समासाद्य राजा जायते। तत्र देवदेवे महेश्वरे भक्ति विधाय सर्वं पापं परित्यज्य वैकुण्ठलोकं व्रजति पुण्यात्मा मानवः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपि च विरजाक्षेत्रे कल्पाम्बुतीर्थं वर्तते यत्राल्पमपि प्रदत्तं बहु प्रभवति। पुरा क्षमाशीलो दयाशीलः सत्यवाक् विश्रुतो मान्धाता नाम-नृपतिरासीत्। स एकाकी मृगयार्थं निर्जने गहने वने गच्छन् मार्गे लोमहर्षणम् एकमजगरं विलोक्य शरेण व्यापादयामास। तस्य सर्पस्य पतिव्रता पत्नी स्वपतिं पृथिव्यां पतितं समीक्ष्य दुःखशोकाभिभूता सती तस्मै शृगालयोनि-प्राप्तये शापं प्रदत्तवती[1]। ततः तस्याः शापप्रभावेण स सद्यः शृगालत्वमवाप। ततो नृपतिः पतिव्रतां तां सर्पपत्नीं शापमुक्तये प्रार्थयत्। तच्छ्रुत्वा सा प्रावोचत्—राजन्! मम पतिव्रतायाः शापस्यापरिहार्यत्वात् शृगालयोनिमवाप्यापि परन्तपेन मुनिना वसिष्ठेन साकं गत्वा अम्बुतीर्थे स्नात्वा मुक्तिमवाप्स्यसि[2]।

नृपते। परमपावने स्वर्गतुल्ये देवगणाकीर्णे संयमशीलैः ब्राह्मणादिभिरुप-सेविते नानावृक्षपुष्पफलादिभिरूपशोभिते देवदुन्दिभिर्नादिते मनोरमे विरजाख्ये क्षेत्रे तव शापविमुक्तिर्भविष्यति। तच्छ्रुत्वा प्राप्तशृगालशरीरो राजा दुःखेन वेपमानो वसिष्ठस्याश्रमं गत्वा त्राहि त्राहीत्युक्त्वा तच्चरणोपान्ते पपात। ततो महर्षिर्वसिष्ठः तद्वाक्यमाकर्ण्याश्रमाद् बहिर्भूय परिपप्रच्छ-राजन्! कस्माद-कस्मादागत्य ममाग्रे त्वं कथं त्राहीत्युच्चरसि! किं ते भयमुपस्थितम्? सत्वरं कथय। तन्निशम्य स सविवरणमुवाच—गुरुवर! अहं हि राजा मान्धाता अस्मि। मृगयार्थमरण्यं गच्छन् मार्गेऽतिविषधरमजगरमवलोक्य सहसा वाणेन विद्धवान्। ततो दुःखिनी पतिव्रता तत्पत्नी सर्पिणी मां शृगालयोनिप्राप्तये ऽशपत्। तेन त्रस्तोऽहं यदा तां शापमोचनाय प्रार्थितवान् तदा सा कृपया मामवोचत्—राजन्! त्वं महर्षेर्वसिष्ठस्याश्रमं गच्छ तेन सह विरजं क्षेत्रं गत्वा

१. तस्य पत्नी च तं दृष्ट्वा स्वपतिं पतितं भुवि।
दुःखशोकसमाविष्टा ददौ शापं नृपाय तम्॥ ३६॥
अद्रोहकारणं क्रूर! मत्पतिं प्राणवल्लभम्।
जघ्निथ त्वं यतो भूप! शृगालत्वं ततो व्रज॥ ३७॥

२. यदा त्वं च वशिष्ठेन विरजाख्यं गमिष्यसि।
तस्मिन्नन्यम्बुतीर्थ च स्नात्वा मुक्तिमवाप्स्यसि॥ ४०॥
विरजाख्यं नृपश्रेष्ठ! क्षेत्रं परमपावनम्।
रम्यं पापापनोदं च स्वर्गतुल्यं न संशयः॥ ४१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नानदानाभ्यां शृगालयोनितो मुक्तिलंप्स्यसे। अतोऽहं भवतः शरणे समागतोऽस्मि। प्रभो! कृपया क्षिप्रं तत्र मां नीत्वा नरकादुद्धरस्व।

ततः स तपोधनो महर्षिः वसिष्ठः तच्छ्रुत्वा करुणान्वितो भूत्वा तत्कालं तेन साकं विरजं क्षेत्रं जगाम। तत्र कल्पाम्बुसंज्ञके तीर्थे मुनीन्द्रः तं स्नापयित्वा तस्मै भूयः स्वकां तनुं प्रददौ। ततो राजा मान्धाता पुनः स्वं शरीरं प्राप्तवान् तत्क्षणे च गगनमण्डलात् पुष्पवृष्टिः पपात। तदनन्तरं मान्धाता नृपतिः स्वकीयं राज्यमुपस्थाय धर्मेण प्रजाः पालयामास। महर्षिर्वसिष्ठोऽपि शिष्यैः साकं स्वकीयं पुण्यमयमाश्रमं प्रति परावृत्तः। इत्थं शृगालत्वं परित्यज्य, नृपतेर्मन्धातुः पुनर्मानवशरीरग्रहणस्य कथानकमाकर्ण्य मानवः पुण्यां गतिमवाप्नोतीति--

मान्धाता च ततो गत्वा स्वराज्यं द्विजसत्तमाः।
प्रजाश्च पालयामास धर्मेण विनयेन च॥ ५५॥
वसिष्ठोऽपि महातेजाः शिष्यैः परिवृतस्ततः।
सर्वं पुण्यमयं रम्यं जगाम स्वाश्रमं हितम्॥ ५६॥

अष्टमेऽध्याये—

अल्पाम्बुतीर्थमहात्म्यश्रवणानन्तरमनेकेषां गुह्यानां तीर्थानां महत्त्वं श्रोतुं कामनया मुनिभिः प्रार्थितो भरद्वाजमुनिः देवादिभिः संस्तुतस्य मृत्युञ्जयतीर्थस्य माहात्म्यं जगाद, यत्र स्नात्वा मृकण्डुतनयो मार्कण्डेयो मुनिः मृत्युं जिगाय। यो मानवो मृत्युञ्जये तीर्थे स्नात्वा मृत्युञ्जयस्य दर्शनं कुरुते सोऽपि मृत्युं जयति। तत्रैवास्ते क्रोडनामकं परमपावनं तीर्थं यत्र साक्षात् कोडरूपी जनार्दनः तीर्थत्वमगमत्।

तीर्थराज! नमस्तुभ्यं कारुण्यक जलाप्लुत!।
अघौघादुद्धर त्वं मां भजन्तं पाहि भो प्रभो॥ ६॥

इति मन्त्रं समुच्चार्य तत्र स्नानं विधाय मानवः क्रोडदेहे लीयते। तत्रैव वासुदेवपदप्रदायकं शुक्रतीर्थं विद्यते। तत्र सकृत् स्नानेन मानवो दिव्यं लोकं व्रजति। अपि च तत्र सिद्धिदायके सिद्धितीर्थे स्नात्वा सिद्धाः सिद्धित्वम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गमन् । तत्र मनोज्ञे तीर्थे सकृदेव स्नानेन देवो जगन्नाथः प्रसीदति, तुष्टः तस्मै ईप्सितं फलं ददाति । एवं तस्य सिद्धेश्वरस्य बहुविधं पुण्यं वरीवर्ति। सिद्धेश्वरे स्नात्वा मानवो नूनं सिद्धि लभते। तत्र बहुविधानि तीर्थानि सन्ति तथा अनेके सिद्धगणा विद्यन्ते। यो मधुमासे, आश्विने माधवे वा विरजःक्षेत्रे व्रजति, तस्य सिद्धिर्भवति। तत्रैव दोलस्य क्रोडस्य च स्थानमस्ति, तस्य दर्शनं कृत्वा नरो ब्रह्महत्यापापानि क्षयित्वा मुक्ति गच्छति। यश्चतुर्दश्यां भौमवासरे गुरुवारे च भक्त्या विरजं पश्यति, स तद्भक्ति लभते। तत्र विरज-क्षेत्रे यो नरः उत्तमं मन्त्रं समुच्चरति, तस्य स मन्त्रो नूनं सिद्धो भवति, अभीष्टं फलं च प्रददाति। तस्य पृष्ठभागे यो मनुष्यः स्थण्डिले प्रतिमायां शालग्रामे वा पुष्पधूपदीपनैवेद्यमालादिभिः गिरिजापतिं पूजयति, तस्मै स षण्मासाभ्यन्तरे ईप्सितं फलं ददाति। शरीरत्यागानन्तरं मनोमयं विष्णुपुरं व्रजन्ति मानवाः । एवमस्य विरजाख्यस्य क्षेत्रस्य बहवो गुणाः सन्ति। कोऽपि प्राणी तद्गुणं वक्तुं न शक्नोति। सहस्रयोजनदूरस्थोऽपि यो नरो विरजां जपति, तस्य नरस्यासौ देवी ईप्सितं फलं प्रददाति[1]। तत्र तपस्तप्त्वा नरः परां सिद्धि गच्छति।

विरजाख्यं द्विजश्रेष्ठा एवं निगदितं मया।
तत्र यूयं तपस्तप्त्वा परां सिद्धिं गमिष्यथ ॥२२॥

नवमेऽध्याये—

कृष्णार्कपार्वतीहराणां वर्णनप्रसङ्गे शम्भोः भुक्ति-मुक्तिप्रदस्य पुरुषोत्तमस्य सर्वपापनिषूदनस्य जलाकीर्णस्य नीलाद्रेः यतोऽधिकस्य रवितेजसा दुःखहस्य वालुकाकीर्णस्य विरजाख्यस्य च माहात्म्यादिकश्रवणानन्तर मृषीणाम् एभ्योऽपि पवित्रतमं तपसोऽर्थं क्षेत्रं तस्मिन्नद्रौ विश्वेश्वरस्य स्थानं तपसः फलं च वदस्वेति प्रश्नानन्तरं भरद्वाजो मुनि पुनरवोचत्—ऋषयः !

१. एवं चास्य गुणाः सन्ति विरजाख्यस्य निर्मलाः।
वक्तुं शक्नोति को देही बिना शेषेण सत्तमाः॥ २०॥
सहस्रयोजनान्ते च यो जयेद् बिरजां शुभः।
तस्येप्सीतमसौदेवी ददाति किल तत्परा॥ २१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वपापहरं रम्यं शम्भोः परमं पुण्यं स्थानं कैलाशपर्वतमेवास्ति। विरजैकाम्रयो र्मध्ये कैलाशं श्रूयते तत्र सर्वपापहरो विश्वेश्वरो देवो विराजते[1]।

स पुष्पै र्वकुलादिभि र्वृक्षैरुपशोभितं सपल्लवैः चूतपुन्नागादिभि र्विराजमानं प्रियदर्शनैः दाडिम-लोध्र-पलश-पुन्नागादिभिः दृश्यमानं जम्बू-कदम्व-कोविदार-वकुल-चम्पक-धात्री-नागकेशर-जाति-यूथिकादीनां पुष्पैः सुवासितं करवीराशोकमालतीमाधवी-चम्पक-कुन्द-काञ्चन-सेवन्तिकादीनां श्वेत सुमनैरङ्कितं तथा विभिन्नै वृंक्षै, नानाविधैः पुष्पैः बहुविधैः मनुष्यैः विश्वनाथस्य तत्स्थानं समन्ततः परिपूरितं वर्तते। तत्र संवत्सरं यावद् अतन्द्रितो यो विश्वेश्वरं समाश्रयते। तन्मंन्त्रं च जपति, तस्य स मन्त्रः सिद्धयति। तत्र विश्वस्योत्पादने रतो मोक्षदः कामदः लिङ्गरूपी च विश्वनाथो निरन्तरं विराजते। अन्यानि पुण्यस्थानानि अनेकानि च पुण्यक्षेत्राणि परित्यज्य एकाकी पार्वतीनाथः कैलाशे रमते[2]। यदा दुरात्मना रावणेन कैलाशं समुद्धृतं तदा तस्यैकं शृङ्गं पतितम्। ये नरा शङ्करस्थाने कैलाशे वसन्ति तेषां वाप्तिः मुक्तिश्च करे स्थिता भवति। मुक्तिदायकं शम्भोः कैलाशनिलयं मनुष्यै र्दुलभं विद्यते। तत्र शम्भोः समीपे देवगणा नित्यं निवसन्ति विश्वेश्वरस्य

---

१. तत्रासौ विश्वनास्तु विश्वस्योत्पादने रतः।
मोक्षदः कामदः श्रीमान् लिङ्गरूपी न संशयः॥ १६॥
पुण्यक्षेत्राणि संत्यज्य पुण्यस्थानान्यनेकशः।
कैलाशे पार्वती नाथः एकाकी च परन्तपः॥ १७॥

२. काङ् क्षन्ति पितरश्चैव प्रजाश्च सुनृपं यथा।
यदास्माकं कुले जातः कैलासाद्रिं गमिष्यति॥ २५॥
तत्र गत्वा प्रयत्नेन स्नाति तीर्थे पयोऽमृते।
अस्माकं तर्पयित्वा च नरकादुद्धरिष्यति॥ २६॥
तस्मिन्नद्रौ द्विजश्रेष्ठास्तीर्थमस्ति पयोऽमृतम्।
अग्रे श्रीशिखरेशस्य इशानदिशमास्थितम्॥ २७॥
भोगवत्यां च भूर्लोके स्वर्लोके सचराचरे।
पयोऽमृतसमं तीर्थं नास्ति नास्ति वदाम्यहम्॥ ३०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दर्शनेन सम्पूजनेन प्रणामेन च मनुष्याणां सुरभीमारणजन्मदोषो दूरी भवति। विश्वेश्वरं स्मरतः पुंसः गुरुपत्नी-गुरुनिन्दादिभ्यो जायमोनो दोषः नश्यति।

सर्वा ब्रह्मादिदेवता भूयो भूय काङ्क्षन्ति यद् भूलोकमुपगभ्य भगवन्तं विश्वेश्वरं द्रक्ष्यामः। यथा प्रजाः सुनृपं काङ्क्षन्ति तथैव पितरो वाञ्छन्ति यत् कदाऽमाकं कुले जाताः प्राणिनः कैलाशाद्रिमुपस्थाय पयोऽमृते तीर्थे प्रयत्नेन स्नात्वाऽस्नान् तर्पयित्वा च नरकाद् उद्धरिष्यन्ति[1]। द्विजश्रेष्ठाः! तस्मिन् कैलासाद्रौ पयोऽमृतं तीथंमस्ति विश्वेशस्य च ईशानदिशि स्थितं पितृणां मुक्तिदामकं वरेण्यं परमं पुण्यं तीर्थमस्ति, यत्र स्नात्वा सौदासो राजा मुक्तिमवाप।

तत्तीर्थस्य तीर्थान्तरस्य च महात्म्यं श्रवणेच्छया ऋषयो भरद्वाजं मुनिं भूयः प्रार्थितवन्तः। ततः सोऽवोचद् यद् भोगवत्यां भूलोके स्वर्गलोके च पयोऽमृत-तीर्थसमं किमप्यन्यत्तीर्थं नास्ति। पुरा सूर्यवंशे सौदासो नाम महीपतिर्बभूव, स हि राजा प्रजापालनतत्परः शास्त्रज्ञः, अपरो वृहस्पतिरिव वक्ता, रूपेण रति-नाथ इव, संग्रामे शचीपतिरिव जातः। एकदा मन्त्रं साधयितुं तस्य बुद्धि-रुत्पन्ना, ततो महर्षिं वसिष्ठं पप्रच्छ--भगवन्। कुत्र मन्त्रसिद्धि र्भविष्यतीति तत्स्थानं कथय स्नात्वा जप्त्वा च परं पदं गमिष्यामि। तच्छ्रुत्वा स आह-वाराणसी क्षेत्रं मुक्तिदायकं सिद्धिप्रदं कामदं चास्ति। तत्र साक्षाद् विश्वेश्वरो देवः साधकेभ्यः शाश्वतीं मुक्ति ददाति। अतः पृथिव्यां वाराणसीक्षेत्रात् समं किम मन्यत् क्षेत्रं नास्ति, यत्र लिङ्गरूपेण साक्षाद्विश्वेश्वरो देवो निरन्तरं विराजते।

---

१. आस्ते वाराणसी क्षेत्रं मुक्तिदं सिद्धिकामदम्।
यत्र विश्वेश्वरो देवः साधकानां वरप्रदः॥ ३५॥
वाराणसीसमं भूप! क्षेत्रं नास्ति महीतले।
लिङ्गरूपधरः साक्षाद् यत्र देवो जगत्पतिः॥ ३६॥
तस्मिन् क्षेत्रे महीपाल! तीर्थं श्रीमणिकर्णिका।
स्नात्वा तत्र नरो नारी ब्रह्महत्याद् विमुच्यते॥ ३७॥
यत्र भागिरथी पुण्या नराणां मुक्तिदायिनी।
भूलोके चैव पाताले स्वर्गलोके प्रतिष्ठिता॥ ३८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रैव क्षेत्रे मणिकर्णिका तीर्थं वर्तते। यत्र स्नात्वा नरो ब्रह्महत्यादिपापाद् विमुच्यते। तत्रैव नराणां मुक्तिदायिनी उत्तरवाहिनी पुण्या भव्या भगवती भागीरथी गङ्गा विद्यते, यस्या माहात्म्यमपूर्वमस्ति कणमात्रमपि जलं ब्रह्महत्याक्षयं विधातुं विद्यते समर्थम्। तथाचोक्तं—

वाराणसी विश्वनाथो जान्हवी मणिकर्णिका।
एकैका दुर्लभा राजन्! किमु यत्र चतुष्टयम्॥ ४०॥

इत्येवं महर्षेवसिष्ठस्य वचनं निशम्य स राजा सौदासस्तमृषिं नमस्कृत्योत्तमं क्षेत्रं गत्वा गङ्गायां विधिवत् स्नात्वा च भगवतो विश्वनथस्य दर्शनं कृत्वा क्षमासत्यसमायुक्तः सन् सुदारुणं तपस्तेपे। एवं कञ्चित् कालं सुतपस्तपते तस्मै नृपतये भगवान् महेश्वरो देवः स्वप्ने दर्शनं प्रदाय स्वरूपं च दर्शयित्वा प्रोवाच–राजन् मे मुक्तिदे क्षेत्रे त्वमागतः, किन्तु इदानीं तपसे कैलाशनिलयं गच्छ, अहं तत्रैव त्वामात्मनस्तनुं दर्शयिष्यामि मुक्तिं च प्रदास्यामि। तत्र मत्पार्श्वे हतेन्द्रतीर्थं नाम पयोऽमृतं वर्तते। तत्राहं चतुर्वर्गप्रदः शिवशेखर इति नाम्ना प्रसिद्धोऽस्मि। यो मानवः तत्रस्थं सर्वपापहरं शिवशेखराख्यं मम लिङ्गं पश्यति तस्मै मुक्तिं ददामि–हे महीपते! सत्त्ये युगे तत्रत्येन तपसा तुष्यामि त्रेतायां द्वापरे कलियुगे च दर्शनमात्रेण तुष्टो भवामि, सिद्धिं प्रयच्छामि। तस्मिन् गिरौ यः पयोऽमृते तीर्थे स्नाति स परमं स्थानं गच्छति, मम देहे च प्रलीयते।

पयोऽमृते महातीर्थे पयस्तेनामृतोपमम्।
अमृतत्व प्रयच्छाशु कृते स्नाने तवाम्भसि॥५०॥

इति मन्त्रं समुच्चार्य विधिना स्नानं कृत्वा मम दर्शनं च विधाय परां सिद्धिं गमिष्यसि। तत्रैव मदग्रे दक्षिणदिशि जंभकुनुनाम्नाख्यातं तीर्थवरमस्ति। यस्य सर्वलोकपवित्राणि सर्वलोकसुखानि पर्वतोद्भवशीतानि वारीणि यस्य पुण्यवतः अङ्गेषु निपतन्ति, स पूतो भवति, सुखं च लभते। सशिरःस्नानेन च मानवः शुद्धो भवति। कैलाशकुण्डे सुस्नातो महेश्वरं पूजयित्वा च नरः तत्प्रभावेन सिद्धिं लभते। इत्युक्त्वा स देवोऽदृश्योऽभवत्, राज्ञः सुदासस्यापि निद्रा व्यपगता। तत एकाकी स राजा तमुत्तमं कैलाशपर्वतमुपगम्य तपः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तप्त्वा पयोऽमृते तीर्थे च स्नात्वा कियत्कालं स्थितः पश्चान्मुक्ति जगाम। तत्र कैलाशपर्वतेऽपि देवदेवो भगवान् भवानीपति र्विश्वेश्वरो नित्यं विराजते। तत्र कोलाहलं कृत्वा यो विघ्नमुपस्था यति, स नूनं नरके गच्छति। एवं मदुक्ते तस्मिन् पर्वतोत्तमे कैलाशे गत्वा तपस्तप्त्वा परां सिद्धि गमिष्यथ—

एवं मया निगदितं तत् स्थानं पर्वतोत्तमम्।
तत्र गत्वा तपस्तप्त्वा परां सिद्धिं गमिष्यथ॥ ६०॥

दशमेऽध्याये—

अथ ऋषयो भरद्वाजं मुनिं प्रोचुः-भगवन्! त्वयोक्तं तपसो महत् स्थानं पार्वतीपतेः विश्वेश्वरस्य कैलाशं वरीवर्ति, परन्तु तत्र कोलाहलेन मानवो नरकं व्रजतीति उत्कले किमप्यपरं क्षेत्रं ब्रूहि, यत्र भवत्कृपया अस्माकं हितेच्छया वयं कृतार्थाः स्याम। गुह्यं किमप्यपरं स्थानं कथय। ततो भरद्वाजमुनिः गुह्याद् गुह्यतरं गोपनीयं मनस एकाग्रतास्थानं प्राणिनां[1] मुक्ति दायकं जयवर्द्धनं हरिहरात्मकं क्षेत्रं निर्दिष्टं यद् नरा सिद्धगणाकीर्णं मुनीद्रै-रूपशोभितं गन्धर्व-किन्नर-विधाधर-चारणादिभिर्जुष्टम् सपुष्प-फल-पल्ल-वान्वितैः आम्र-निम्ब-कदम्ब-पलाश-पारिजात-प्रियङ्गु-नारङ्ग-खदिर विल्व-मालती-कपित्थ-यूथिका-मल्लिका-जाती-लकुचाशोक-वकुल-दाडिमवीजपुरैः पूरितं कोकिल-चकोर-खञ्जरीट-चटक-चातक-कुक्कुट-मयूर-पारावतैर्विभूषितं वक-सारस-वर्तिका-तित्तिरैरूपशोभितं तथा मृग-व्याघ्र-खड्गादिभिः समाविष्टं नानाविधै र्विहङ्गमैः परिपूरितं दीर्घिका-तड़ाग-सरोवरोत्पल-विराजितं कारण्डव-हंस-जलकुक्कुट-कदर्म-स्वच्छतोयसोपानैः सुशोभितं तथा नाना गुणैः समान्तात् परिपूतितम् एकाग्रं[2] परमं पुण्यं वनं गन्धवत्या चञ्चलैः उर्मिभिः शीतलं सुमनोहरं साक्षाद् वैकुण्ठ भवनं जानीध्वम्। तदेकाम्रे पाषाणनीलया शङ्खचक्रादिभिरङ्कितो वनमालाविभूषितः साक्षान्नारायणात्मको विश्वेश्वरः शम्भु र्विराजत। यतो यूयं मुक्तिकामा स्थ, अतो भवद्भिः तदर्थं तत्रैव गन्तव्यम्।

---

१. प्राणिनां मुक्तिदं शास्त्रं देवानां जयवर्द्धनम्।
निर्मलं च गिराकारं क्षेत्रं हरिहरात्मकम्॥ ७॥
२. एकाग्रं परमं पुण्यं वनं विष्णुप्रियं महत्।
साक्षाद्वैकुण्ठभवनं जानीत्वं मुनिसत्तमाः॥ २४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकाम्रं परमं पुण्यं वनं विष्णुमयं महद् ।
साक्षाद् वैकुन्ठभवनं जानीध्वं मुनिसत्तमाः ॥ २४ ॥
यत्र विश्वेश्वर शम्भुः साक्षान्नारायणात्मकः ।
यस्माद् यूयं मुक्तिकामास्तस्माद् वै तत्र गच्छत ॥ २५ ॥

एकादशेऽध्याये—

एकाम्रवनस्य तत्रत्यानामश्रमाणां लिङ्गानां च माहात्म्यं सविस्तरं श्रोतुकामानां तत्र गन्तुद्यतानां मुनीनां प्रश्ने भरद्वाजमुनिरुवाच-कोटिलिङ्गावृतं क्रोशमात्रपरिमितं परमनन्ददायकमस्ति एकाम्रं वनम्। तत्र स्वगणैः साकं पार्वतीपति र्भगवान् महेशः नृणां वरदो मुक्तिदः साधकानां सिद्धिदः परमानन्द-रूपेण च संस्थितो वर्तते। ब्रह्मादीनां वरप्रदः परात्परः परमेश्वरः महेश्वरो वाराणसीं परित्यज्य हरेः पुण्यं प्रार्थयित्वा एकाम्रवने प्रविवेश ।

लिङ्गरूपेण भगवता शिवेन कदा प्रार्थितमिति वृत्तान्तं विस्तरेण श्रोतु-कामानामृषीणां पुनः प्रश्ने, तदुत्तरे भरद्वाजमुनिरकथयत्-पुरा त्रेतायुगे वाराणस्यां तिष्ठन् महेश्वरो मुनिपुङ्गवं देवर्षि नारदमवोचत् – देवर्षे ! यस्यां पूर्यां तिष्ठामः तत्राघः शीघ्रं विनष्यति, किञ्च इयं नगरी जलाकीर्णा विघ्नकरी च जाता । अतो जलाकीर्णे स्थाने स्थितिर्न समुचिता । ज्ञानहीनै र्नास्तिकैः उपद्रवः समारभ्यते। यत्र नास्तिका तिष्ठन्ति, तत्र धर्मो विलुप्तो भवति। अधर्मस्य प्राबल्याच्च हरेर्भागोऽपि लुप्तो भविष्यति ।

स्थानमिदं मया पूर्वं पार्वत्यर्थं कृतमस्ति । यत् पार्वत्या रुचिकरं स्थानं तदेव ममापि हर्षदम् । अतोऽधुनाऽत्र स्थातुं नोत्सहे, मुने ! रहस्यं परमं स्थानं कुत्रास्ति, तदधुना शीघ्रं वद, तच्छ्रुत्वा देवर्षिः लवणोदधेः उत्तरे तीरे नील पर्वते विजनं विख्यातमेकाम्रकं क्षेत्रं वर्णयामास, यत्र स्नानार्थी जगद्गुरु र्वासुदेवः अनन्तेन साकं निरन्तरं विराजते । परमं गुह्यं तत्स्थानं भगवान् प्रजापतिरपि न जानाति देवतानां का कथा ? एकाम्रकं तदेकाग्रं परमं गुह्यं चक्रिणो जगन्नाथस्य स्थानं समुद्रकन्या लक्ष्मीरपि न जानाति, नवा भवानपि

एवं देवर्षिणां प्रोक्ते चण्डिकापतिः भगवान् विश्वनाथः मुनिपाणिं करे गृहीत्वा तत्र गन्तुं तदा मनश्चक्रे गणाध्यक्षं नन्दिकेश्वरं च समादिशत्— अयि पुत्रक ! अहमेकाम्रकं गमिष्यामि । अतस्त्वं सज्जी भव । स्वामिन आज्ञां शिरसि धृत्वा शूलपाणिः गिरिजया सह वृषेन्द्रं नन्दिनमारुह्य गणैः सह ततो निर्जगाम । स्वयं रुचिरवेशो देवदेवो भगवान् शम्भुः नानाभूषणभूषितं कोटिचन्द्रप्रकाशं स्ववाहनं नन्दिनं समीक्ष्य प्रशशंस । नन्दिकेशोऽसौ देवदेवस्य कर्णयोः नानारत्नदेदीप्यमानं कुण्डलं सज्जयामास । ततो नन्दी कोटिसूर्यं प्रती-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काशं हैमवैदूर्यनिर्मलम् अर्द्धचन्द्रविभूषितं मुकुटं च संयोजयामास, कर्पूर-मिश्रितं सुवासितं शीतलं चन्दनं च ईशस्य भालभागे लेपयामास। गण्डस्थले कुङ्कुमं मृगपत्रिकाम् अधरे शुद्धं ताम्बूलं ददौ। गले मणि-माणिक्य-मुक्ताफल-युक्तम् उज्जलं हारं सज्जयामास। पद्मरागयुतौ सुप्रकाशितौ स्वर्णकङ्कणौ करयोः परिधापितवान्। कट्यां विद्युदाभाश्चन्द्रिकाः तदुपरि पट्टाम्बरं नीवीवस्त्रं तदुपरि च क्षुद्रघण्टिकाप्रोतां मेखलां सज्जयामास। पादयोः नीलमणिसंयुतं दिव्यं नूपुरं सज्जयित्वा नन्दिकेश्वरो देवदेवस्य सुवेशं चकार। क्रोडे हिमाद्रिजां कृत्वा सुवेशः सुमुखः कोटिचन्द्रद्युतिर्भगवान् महेश्वरः सवृषभो ललास। इत्थं सुसज्जितः पुरःसरैः सिद्धगन्धर्वकिन्नरैः गीयमानयशाः शुभ्रैः व्यजनैः चामरैश्च वीज्यमानः शिरसि कोट्यर्कद्युतिनिन्दकेन श्वेतातपत्रेण सुशोभितो भगवान् हरो जगाम। दीर्घनादं जयशब्दं नृत्यं च कुर्वद्भिः अप्सरःसत्तमैःपुरस्कृतः त्रिशूलडमरूजटारुद्राक्षधरो भक्तानां वरदायकः पार्वतीनाथः नारदेन साकमेकाम्रक्षेत्रं प्राप्तवान्। एकाम्रं गतोऽसौ सनातनं वासुदेवं साष्टाङ्गं प्रणिपत्यैव विस्तृतां स्तुतिं कृतवान्। ततो लोचने उन्मील्य विहसन् विष्णुरब्रवीत्—शम्भो! तव हितं ब्रवीमि, तव स्थातुं स्थानं न दास्यमि, परमहं स्वगणैरावृतोऽत्रैव स्थास्यामि काश्यां न गमिस्यामीति प्रतिज्ञां कुरु हे महेश्वर! इदं मम कथनं सत्यमवेहि।

ततो भगवान् शङ्कर उवाच। अहं कथं काश्यां न गमिष्यामि, यत्र भगवती जाह्नवी सर्वतीर्थमयी सुपुण्या मणिकर्णिका च वर्त्ततेदे। ततो वासु-देवोऽवोचत्—न नारदो नवा शेषोऽपि विजानाति, किन्तु केवलमहमेव जानामि। अत्रैवाग्नेय्यां दिशि मत्पादाग्रच्युता जाह्नवी अस्ति, या मुनिभिर्गङ्गेति प्रोच्यते। अपि चान्यान्यपि सुगुप्तानि तीर्थानि वर्तन्ते, यानि पुण्यानि सन्ति। ततः शङ्कर उवाच—प्रभो! वाराणसीम् अन्यक्षेत्राणि च परित्यज्यात्र तव सन्निहिते एव स्थास्यामि। सत्यं ब्रवीमि, नान्यत्र क्वचिद् गमिष्यामिति तथ्यं जानीहि। इत्युक्त्वा भगवान् शम्भुःविष्णोर्दक्षिणस्यां दिशि दिगम्बरः सन् स्थित्वा चतु-र्वर्गफलदाता भूत्वाऽतिष्ठत्। मूलभागे स्फटिकसङ्काशो मध्ये महानीलमिव सर्वत्रमाणिक्यं मयं तल्लिङ्गं वरीवर्ति। ततः प्रभृति तस्मिन् क्षेत्रेऽनेकलिङ्गै-रावृतो महेश्वरोऽतिष्ठत्। य आम्रके क्षेत्रे तल्लिङ्गस्य दर्शनं कुर्वते, ते ब्रह्म-हत्यायुक्ता अपि तेषां करे मुक्तिः तिष्ठति। एवं सनातनं वासुदेवं प्रार्थयित्वाऽ-नेकलिङ्गावृतः स भगवान् महेश्वर एकाम्रविपिने निरन्तरं निवसति।

एवं शम्भुः प्रार्थयित्वा वासुदेवं सनातनम्।
एकाम्रविपिने ह्यास्ते कोटिलिङ्गधरः प्रभुः॥ ६६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वादशेऽध्याये—

तत्र तीर्थे चक्रपाणिना सुगुप्तस्य तथोत्पन्नस्य विन्दुसरसो जिज्ञासया ऋषीणां प्रश्ने भरद्वाजोऽवोचत्–यत्तत्र किञ्चित् काले गते देवदेवो भगवान् महेश्वरो रममाणः स्थितः तदा दृश्यमेकमजायत। तस्मिन् क्षणे तत्र नदनदीभ्यो-जलविन्दवः स्रवन्तिस्म, तस्माद् गणैः सह स देवः तस्य नाम विन्दुसर इति चकार। ततस्तत्र सर्वेऽहर्निशं जलविन्दून् स्रवन्ति, अतो वेदे पुराणे च तस्य नाम विन्दुसरोवर इति जातम्[1]। तत्र विन्दूद्भवे गङ्गागोदावरी-रेवा-तुङ्गभद्रा-नर्मदा-काकेर-सरयू-तापी-प्रभृतयो नद्यस्तथा मानसं, पुष्करं, पम्पा, निर्मलं शैलं सुतीक्ष्णं च प्रसुस्रुवुः। क्षारोधिः पयोधिः दुग्धसमुद्रश्च दधि-सर्पिः-सुरार्णवा विन्दूद्भवेः तीर्थे स्रवन्ति। द्वारवत्यां नैमिषे दण्डकारण्ये वदरिकाश्रमे च यत्तीर्थं तत्सर्वं तत्र नित्यं स्तवन्ति। तस्मादेकाम्रकवने विन्दुसरः श्रूयते। तत्र स्नात्वा तज्जलं पित्वा च नरो नरकं न व्रजति। विन्दुजलं तीर्थमुनीन्द्रैः नित्यमुपसेवितं सोपानैरूपशोभितं पवित्रं निर्मलं जलं चास्ति। स्वर्गे मर्त्ये पाताले अन्तरिक्षे तथा दिक्षु विन्दुसरोवरात्परं किमपि तीर्थं नास्ति। बिन्दूद्भवतीर्थजलममृततुल्यमस्ति। तत्र स्नात्वा यो जनः वृषभध्वजस्य दर्शनं कुरुते, स सर्वपापविनिर्मुक्तोऽन्ते शिवदेहे प्रविलीयते। अत्रैव पादहरादेवी वर्तते। तत्र स्नात्वा पूजयित्वा तद्दर्शनं च विधाय नरः सुखमेधते। यतः तस्या देव्या पादे हरो विद्यते। अतः सा पादहरा प्रोच्यते। सा मनुष्येभ्यः सुखं ददाति। द्वितीये विग्रहे सर्वजनस्य श्रयो दात्री भवति। बिन्दूद्भवे तीर्थे स्नात्वा शुभां पादहारां देवीं दृष्ट्वा तं त्तीर्थेश्वरं दृष्ट्वा मानवः पातकाद् विमुच्यते। नरो बिन्दुतीर्थे स्नात्वा पादहारां देवी पुरुषोत्तमं च दृष्ट्वाऽक्षयं फलं लभते। यः त्रिभुवनेश्वरं लिङ्गं पश्यति तस्मै जगत्स्वामी मुक्तिं प्रयच्छति[2]। तस्मिन् तीर्थवरे स्नात्वा श्रीधरं शङ्करं च दृष्टवा मनुष्यः कामगेन विमानेन वैष्णवं

---

१. सर्वे तत्र स्नवन्तिस्म जलविन्दूनहर्निशम्।
तस्माद् वेदे पुराणे च नाम्ना विन्दूसरोवरः ॥ ५ ॥
मानसं पुस्करं पम्पा सुतीक्ष्णं शैलनिर्मलम्।
स्रवन्त्येतानि सर्वाणि तीर्थे विन्दूद्भवे द्विजाः ॥ ७ ॥

२. अत्र चैव द्विजश्रेष्ठा देवी पादहरा श्रुता।
तां दृष्ट्वा पूजयित्वा च नरस्तु सुखमेधते।
देव्याः पादे हरो यस्मात्तस्मात् पादहरा स्मृता ॥ ५ ॥
विन्दुतीर्थे नरःस्नात्वा दृष्ट्वा श्रीपुरुषोत्तमम्।
देवीं पादहरां दृष्ट्वा ह्यक्षयं च फलं लभेत् ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पदमवाप्नोति। सर्वतीर्थानां श्रेष्ठं बिन्दूद्भवं तीर्थमुदाहृतम्। एतत्पुण्यप्रदमाख्यानं यः शृणोति स सर्वपापक्षयं कृत्वाऽमृतत्वमवाप्नोति। विदूद्भवतीर्थस्यैतत्फलं निगदितम्। अतः परमपरं तीर्थं कथयामि, तत् यूयं शृणुत—

तस्मिन् तीर्थवरे स्नात्वा दृष्ट्वा श्रीधरशङ्करम्।
कामगेन विमानेन वैष्णवं पदमाप्नुयात्॥ २१॥
श्रेष्ठं च सर्वतीर्थानां त्रिन्दूद्भवमुदाहृतम्।

त्रयोदशेऽध्याये—

एकाम्रकवनस्योत्तमं माहात्म्यं वासुदेवस्य कोटिलिङ्गेश्वरस्य च महिमानं वक्तुमृषीणां प्रश्ने भरद्वाजमुनिरुवाच—क्षेत्राणामुत्तमं श्रीमत् क्षेत्रमेकाम्रकवनं विद्यते[३]। एतदेव परमं स्थानम्, एतदेव परमं पदमस्ति। वासवसहिताः सर्वे देवा अत्र निर्भयाः सन्तो निवसन्ति। इदमेकाम्रकं वनं सर्वतीर्थमयं वर्तते। अत्र तीर्थे लिङ्गरूपी साक्षाद् ब्रह्म निवसति। सर्वक्षेत्रादधिकफलं महापुण्यं कामदं मोक्षदं सर्वपुण्याभिवर्द्धनं चैकाम्रकं क्षेत्रमस्ति। ये कृतसंकल्पमानसाः नरास्तत्र गच्छन्ति, ते तत्कालमेव पापं निर्हृत्य आत्मनः कुलानि उद्धरन्ति। एकाग्रसदृशं क्षेत्रं पृथिव्यां किमपि क्षेत्रं नास्ति, यत्र गत्वा पापिनोऽपि नरा उत्तमं मोक्षं लभन्ते[४]।

ये नरोत्तमास्तस्मिन् क्षेत्रे शरीरं त्यजन्ति प्रियम्बदास्ते भासमानाः सन्तः शिवसानिध्यं यान्ति। कोटिहत्यायुतो गोघ्नः गुरुतल्पगोऽपि एकाम्रविग्रहं विलोक्य सनातनं विष्णुपदं गच्छन्ति। हरि-शङ्करयोर्मध्ये विन्दूद्भवजले कीटकोऽपि देहं त्यजन् नूनं परमं पदं प्राप्नोति। यो वासुदेवस्याग्रे शरीरं संत्यजति स जलमध्ये वासुदेवे च लीयते। कीटाद्या जङ्गमाश्च तत्र स्वं शरीरं संत्यज्य मुक्तिपदं यान्ति, किं पुनः मनुष्याः! यो यदा एकाम्रके वने स्वकीयं शरीरं त्यजति तदा तस्य कर्णमूले भगवान् शम्भुः वक्ष्यमाणमिदं पद्यं पठति—

त्वमत्र त्यजसि देहं पुरा पुण्यं कृतं त्वया।
वदोङ्कारं व्रज पर वैष्णवं च सनातनम्॥

---

३. एकाम्रकं वनं श्रीमत् क्षेत्राणामुत्तमं वरम्।
एकाम्रसदृशं क्षेत्रं भूमौ नास्ति द्विजोत्तमाः॥ २॥

४. एकाम्रसदृशं क्षेत्रं नैव पश्यामि किञ्चन।
पापिनो यत्र गत्वा च लभेयु र्मोक्षमुत्तमम्॥ ७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति मन्त्रं तत्कर्णमूले समुच्चार्य भगवान् महेश्वरः स्वगणात् प्रेषयित्वा तं पुण्यात्मनं नरं निराकारं नयेदिति ध्रुवमस्ति। स्वयं देवेन निर्मितो सर्वपापहरो दक्षिणे गजराजस्य वृक्षः, आमलकी च वर्तेते, यौ वृक्षौ शुभं वासुदेवप्रियं कुरुतः, यतस्तौ क्षेत्रराजे स्थितौ स्तः। तन्मूले ये पापकृत्तमा अपि शरीरं त्यजन्ति, ते मुक्तिं गच्छन्ति, किं पुनः पुण्यकर्माणः। अविश्वासकारकेभ्यः तां मुक्तिं न ददाति। विश्वासार्थमेव तमाग्रलकं वृक्षं कृतवानस्ति। तत्रैकाम्रे गृहे वाह्ये अन्तरिक्षे जले च स्थितो यत्र तत्र शरीरं संत्यज्य मानवो मुक्तिमवाप्नोति।

ये एकाम्रविपिने लिङ्गरूपिणमव्ययं भगवन्तं तं पश्यन्ति तेषां करे एव मुक्तिः स्थिता। यस्य देवस्य नैवेद्यं महापातकनाशनं वर्तते ब्रह्मादीनां च देवानां भोग्यमस्ति। एकाम्रके वने साक्षात् सनातनं लिङ्गं वर्तते यस्य नैवेद्यं शक्रादयोऽपि देवा वाञ्छन्ति। ईशस्य नैवेद्यं न ग्राह्यं न वा भोक्तव्यमिति यदुच्यते, न तद् वचनं श्रद्धेयं विद्यते। महर्षयस्तन्नैवेद्यंमहाप्रसादं कथयन्ति[५] एकाम्रकानने विष्णो नैंवेद्ये पुण्यस्य संख्या न कार्या। तदनादृत्य नरा नरकं यान्ति, अत्र सन्देहो नास्ति। तस्य श्रीलिङ्गराजस्य ध्वजारोपणमुत्तमं कथितमस्ति, तेन च नरा शिवत्वं गच्छन्ति। यो नीलैः पट्टवस्त्रैः पीतशुक्लाम्वरैश्च ईश्वरे ध्वजारोरणं कुरुते, स ब्रह्महत्यादीनि पापानि क्षयित्वा नरकात् पितृनुद्धृत्य नूनं शिवलोकं व्रजन्ति। ये नरोत्तमाः प्रयत्नेन पूजाकाले मुरजध्वनि भृदङ्गशङ्खपटहभेरीनादं काहलं रिणिमं शब्दं च स्वयं कुर्वन्ति परैश्च कारयन्ति तेः शब्दैः वेष्ठितास्तेऽव्ययं शिवपदं गच्छन्ति। नरः तस्य शब्दं श्रुत्वैव मुक्ति व्रजति, तत्पूजा समालोकनेन न जाने किं फलं भवति। कोटिलिङ्गेश्वरस्याग्रे यो भक्त्या मन्त्रं जपति। इहलोके सुखं भुक्त्वा देहान्ते शिवमाप्नोति। कोटिलिङ्गेश्वरो हि साक्षद् ब्रह्मैवास्ति, यस्य दर्शनं कृत्वा नारा नित्यं मनोरथान् प्राप्नुवन्ति। सर्वा ब्रह्मादयो देवता बिन्दूद्भवे तीर्थे भक्त्या यमहर्निशं यजन्ति, ताः स्वं पदं प्राप्नुवन्ति। पृथिव्यां भुवि स्वर्गे च कोटिलिङ्गेश्वरसमं लिङ्गं नास्ति। योऽसौ त्रिभुवनेश्वर एकाग्रविपिने वर्तते, तस्य दर्शनमात्रेण नरो

५. अग्राह्यमीशनैवेद्यं न भोक्तव्यमिति द्विजाः।
यानि वाक्यानि तान्यत्र नाद्रियन्त कदाचन॥
महाप्रसादं नैवेद्यमिति प्राहु र्महर्षयः॥ ३१॥

६. एकाम्रवृक्षस्तत्रासीत् पुरा कल्पे तु मुक्तिदः।
तत्र एकीगतश्चाम्रस्तस्मादेकाम्रकं वनम्॥ ५३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मोक्षं गच्छति । ये च मानवाः कोटिलिङ्गेश्वरस्य प्रदक्षिणां प्रकुर्वते तेषां पदाद् पदात् परं ब्रह्मपदं सन्निहितं वर्तते ।

चण्डेश्वरं समासाद्य सव्यासव्यप्रदक्षिणं सोमसूत्रस्य लङ्घनं च कृत्वा नरो नरकमश्नुते। तस्याग्रे वृषभराजस्य विग्रहवती मूर्ति र्वर्तते। तां दृष्ट्वा हृष्ट्वा पूजयित्वा च नरः शिवप्रीतिं लभते, देवस्य पृष्ठभागे नैर्ऋत्यदिशि वर्तमानां सावित्रीं दृष्ट्वा पूजयित्वा च वाञ्छितं फलं लभते। अग्रे विध्वेश्वरं देवं दृष्ट्वा पार्श्वे च हिमाद्रिजां पूजयित्वा नरो नरकान् जिघांसति। देवस्य किञ्चिदुत्तरदिशि स्थितं शिखध्वजं समालोक्य नरः सम्पदमाप्नोति। पूर्वे तस्य सन्निहिते एकाम्रेश्वरं दृष्ट्वा पूजयित्वा च नरः स्वं मनोरथं लभते। तत्रैव पुरा कल्पे मुक्तिद एकाम्रवृक्षोऽस्ति। यतस्तत्र एकाम्रो वृक्षोऽत एकाम्रकं वनमुच्यते। स हि वृक्षो महोच्छ्रायः सुशाखो सुमनोहरपल्लवो वृक्षो वर्तते यतौ धर्मार्थकाममोक्षाः पत्र-वृक्ष-फलानि च उत्पद्यन्ते। तं वृक्षं भगवान् देवदेवो गोपनीयं चकार। तस्य मूलभागे शमेशो वर्तते तं दृष्ट्वा विधिमन्त्रेण नरो धर्मकामार्थमोक्षान् लभते। तत्र श्रीशैलजाया अग्रे तिक्तशाको नाम महान् वृक्षोऽस्ति, यं पादपं पुरा भगवान् शम्भुः अरोपयत्[1]। तस्य तिक्तशाकस्य वृक्षस्य पापनाशनं माहात्म्यं विद्यते।

पुरा प्रथमे भैरवेऽत्यन्तसंकटे देवासुरसंग्रामे बलदार्पितैसुरैः इन्द्रादयो देवा निर्जिताः। ततः शोकसन्तप्तः शक्रः देवगुरुं वाक्पतिं प्रार्थयत्। ततः स तपस्तप्तुं तमादिदेश। तदनुसारं तपसा परितोषितो भगवान् शङ्करः शक्रमुवाच—पाकशासन! पुरा स्वयमहमेव वृक्षमिममरोपयम्। तस्य मूले मन्त्रं जप, अहं तवेप्सितं वरं दास्यामि[2]। इदानीं तस्मिन्नाम्रकानने देवानाहूय असुरैः साकं सग्रामं कुरुष्व त्वमवश्यं जेष्यसि तान् शत्रूनिति आदिशत्। ततः त्रिदशनाथो महेन्द्रः तत् स्वीकृत्य देवताभिः साकं दैत्यैः सह योद्धुं त्रिदशं गत्वा तैः सह युद्धं च कृत्वा तान् जघान। ततः पुरुहूतस्य शिरसि आकाशात् पुष्पवृष्टिः पपात। तदनन्तरं सफलमनोरथा देवाः स्वं स्वं स्थानं गतवन्तः। एवमयं तिक्तशाको वृक्षः परमः प्रसिद्धः। मन्त्रेण तमुपास्य स्वं स्वं मनोरथमवाप्तुं शक्यते। एवमस्य वृक्षस्यातिनिर्मलं माहात्म्यं मया समासतः

१. तत्र श्री शैलजाग्रे च तिक्तशाकको महाद्रुमः।
पुरा श्रीभगवान् शम्भुः पादपं तमरोपयत् ॥ ५७ ॥

२. गच्छैकाम्रं शचानाथ! पश्य देवं सनातनम्।
तिक्तशाकतले तत्र तपस्तप्त्वा च जेष्यसि ॥ ६० ॥
पादपो यमहं साक्षात् श्रृणुध्वं पाकशासन।
तस्य मूले जपन् मन्त्रं ददामि वरमीप्सितम् ॥ ६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गदितम् । अस्य वृक्षस्य मूले पुरा त्रिदशाधिपतिः परमं तपतप्त्वा दैत्यान् जघान ।

ततोऽम्बरात् पुष्पवृष्टिः पुरुहूतस्य मस्तके ।
पपात देवताः सर्वा ययुः स्वं स्वं पुर ततः ॥ ६७ ॥

चतुर्दशाध्याये—

एकाम्रके वने भगवतो वासुदेवस्य कीर्तनं कृत्वा मानवो मुक्तिमवाप्नोति । जगद्गुरुर्वासुदेवो वैकुण्ठं विहाय विग्रवान् सन्नेकाम्रके वने विराजते । स हि नानाविधसुघटितरत्नजटितकङ्कणाभ्यां सुशोभितः, कट्यां किङ्किण्या विभूषितः, अभिनवपल्लवसमानपादो निद्राघूर्णितलोचने गण्डे विचित्राभ्यां कुण्डलाभ्यां विराजितः । देदीप्यमानमुकुटैर्जटाभिश्च भ्राजमानः, इन्द्रनील इव श्यामलवर्णः श्रीवत्साङ्कितविग्रहः दाडिमपुष्पसङ्काशः, अमृतदायकाधरो कलाधरो रामकृष्णरूपेणास्थितोऽसौ साक्षात् परब्रह्मरूपोऽस्ति ।

यो नरो भक्त्या तं न पश्यति स रौरवं नरकं व्रजति । तत्र यमदूतैश्च लगुडताडनादिभि र्भूयो भूयो नरककुण्डेषु पापच्यते च । भगवान् जगन्नाथो रम्याणि क्षेत्राणि पुण्यानि तीर्थानि मनोहराणि आयतनानि च परित्यज्य एकाम्रवने तिष्ठति । एकाम्रं हि प्रलयकालेऽपि न नश्यति । अतः सर्वं परिहाय भगवान् गदाधारस्तत्र विराजते । एकाम्रकं विन्दुसरोवरश्च परात्परब्रह्मात्मकोऽस्ति । शाश्वतो हरिरर्कतेजसा ब्रह्मस्वरूपोभक्तप्रियो मुरारिः सुहृद्दानवानां रक्षार्थं तत्र सर्वदा तिष्ठति । कौमुदकी शङ्खचक्रधारी पीताम्बरो कौस्तुभविभूषितः स सर्वं फलं प्रयच्छति । भगवतो वासुदेवस्य दक्षस्य, शेषस्य, गदायुधस्य च दर्शनेन शठाः खला नास्तिकाः कर्मयुक्ताः सर्वेऽपि एकाम्रके मुक्तिमवाप्नुवन्ति । योऽसौ सर्वगतो मधुसूदनो मुरारिः स एव भगवान् स्वयमेकाम्रकवनमध्ये तिष्ठति । पृथिव्यां यानि तीर्थानि ऋषीणां ये चाश्रमा सन्ति, तानि सर्वाणि परित्यज्य हरिः स्वयं तत्र शिलारूपेण वर्तते[1] ।

---

१. साक्षाद् ब्रह्मस्वरूपोऽयं परं ब्रह्म उदाहृतः ।
अद्वितीयोऽक्षयो नित्यो वासुदेवेति संज्ञकः ॥ ७ ॥

२. एकाम्रकं गमिष्यामि द्रक्ष्यामि पुरुषोत्तमम् ।
इत्युच्चरति यस्यास्ये सोऽपि विष्णुपुरं व्रजेत् ॥ २२ ॥
तथा तीर्थानि संत्यज्य एकाम्रं पुरुषोत्तमः ।
यद्धि वेदे पुराणे च प्रणवो जप्यते सदा ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कदाचिद् भगवान् हरिः नीलाद्रौ दारुवपुःसंत्यजेत्,परमेकाम्रकं न त्यजति, तत्र सदा पाषाणनीलया विराजते एकाम्रकवनमध्ये यः शङ्खचक्रगदाधरो हरिः सर्वदा तिष्ठति, यस्य स्मरणमात्रेण पातकानि क्षयं यान्ति। तस्य देवस्य दर्शनेन कि फलं जायते इति न जानामि, किन्तु पुरुषोत्तमं भजन् संपूजयन् नमन् नरो नूनं विमुच्यते।

ब्रह्मलोके पितामहो यदेव परमं ब्रह्म जपति, तदेव च चतुर्षु शास्त्रेषु प्रसिद्धं तत्र शिलारूपेण तिष्ठति। तत्र यो विन्दूद्भवे जले स्नात्वा देवस्य दर्शनं कुरुते स जीवन्नेव कृतार्थो भवति। ब्रह्मरूपिण स्तस्य देवस्य मुखपद्मं समालोक्य नरः परं निर्वाणमवाप्नोति। यो नरश्रेष्ठः तस्याग्रे कृष्ण ! कृष्णेति गायति, भावनादी भक्तबन्धुः पुरुषोत्तमः तस्मै मुक्तिं प्रयच्छति। यस्तु तच्चरणोद्भूतमुदकं पिवति तदालपनं च कुरुते, तस्य बाह्याभ्यन्तरं-वा पापं प्रणश्यति। यो मर्त्यो जनार्दनं दण्डवत्प्रणामं कुरुते तस्याश्वमेध-शतोद्भवं पुण्यं जायते। तस्य श्रीवासुदेवस्य लीलया प्रदक्षिणेन पदे पदे सहस्रशो ब्रह्महत्या विलीयते। देवदेवो जनार्दन एकाम्रके वने वासुदेव-संज्ञया: तिष्ठति। पाषाणवपुषाऽसुरनायकः स भुक्तिं मुक्तिं च ददाति। तस्याग्रे पुरुषोत्तमं ध्यायन् जपन् नरो मुक्तिं गच्छति। विष्णुपरायणः स नरः वैकुण्ठं व्रजति।

कार्यमकार्यं वा कृत्वा जनार्दनं दृष्ट्वा नरो वैकुण्ठमवाप्नोति। वासुदेवस्य स्थानं वैकुण्ठं विद्यते। तत्र तिष्ठन् जीवन्मुक्त उच्यते। एवं चक्रिणो वासुदेवस्य नानागुणाः सन्ति, येषां स्मरणमात्रेण ब्रह्महत्यादि पापं विलयं व्रजति।

शङ्खचक्राङ्कितभुजं विपिनैकाम्रसंस्थितम्।
कञ्जाक्षं पीतवसनं नीरदाभं हरिं भजे ॥३७॥

इति मन्त्रं भक्तियुक्तेन चेतसा यो जपति तस्मै श्रीवासुदेवो मुक्तिं प्रयच्छति। सहस्रयोजनान्ते शङ्खचक्रेति मन्त्रं जपन् मनुष्यः दुर्लभां मुक्तिमवाप्नोति शङ्खचक्रधरः सन् व्रजति वा। मन्त्रोऽयं प्राणिमात्रेण जपनीयो वर्तते, मन्त्रोऽयं मन्त्रराज इत्युच्यते बुधैः। सर्वदा तस्मिन्नेव पुण्याश्रमे ब्रह्मेश्वरं लिङ्गं वर्तते, यस्य दर्शनमात्रेण मनुष्यो ब्रह्मलोकमवाप्नोति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा भास्करेशं मेघेशं गोकर्णेश्वरं स्वर्णजलेश्वरं स्वर्णकूटेश्वरं च लिङ्गं वर्तते। एतानि लिङ्गानि यत्नतो दृष्ट्वा नमस्कृत्य पूजयित्वा च सर्वं पापं परित्यज्य नरः कैलाशनिलयं व्रजति। देवदेवस्याग्निकोणे सूक्ष्मेश्वरं लिङ्गं वर्तते तदर्चयित्वा आलोक्य च नरः पापराशिं परित्यजति। अत्रैवाम्रकेशः मध्यमेशश्च वर्तेते तयोर्दर्शनेन मनुष्यः काशीवासफलं लभते। तत्रैव दक्षिणे सूक्ष्मेश्वरं लिङ्गं वर्तते। तत्र पितृभ्यः पिण्डं वितरन् नरः पितृनुद्धरते, ते च नरकाद् ब्रह्मलोकं व्रजन्ति। यः सूक्ष्मेश्वरस्थाने पिण्डदानं कुरुते, सः पितॄन् नमन् तेषामक्षयां तृप्तिं करोति। आश्विनमासस्यामावस्यायां यो यतात्मा नियतशुचिः सूक्ष्मेश्वरदक्षिणे पिण्डदानं करोति, तस्य पितरः कल्पकोटिपर्यन्तं तुष्यन्ति। तस्य पश्चिमदिग्भागे कपिलेश्वरसंज्ञकः कपिलेन-महामुनिना पूजितः कामप्रदो देवोऽस्ति। कपिलेशलिङ्गं दिव्यन्तरीक्षदायकं प्राणिनामीप्सितमनोरथफलप्रदं विद्यते। तत्रैव सर्वतीर्थफलप्रदं श्रीकपिलकुण्डं वर्तते, तत्र स्नात्वां वनं दृष्ट्वा च अक्षयं फलमवाप्यते। तदुत्तरदिग्भागे वर्तमानमुग्रेश्वरं लिङ्गं वर्तते यद् दशलक्षैकलक्षाणां लिङ्गानां प्रभुरस्ति। प्रीतियुक्तेन मानसा तत् लिङ्गं दृष्ट्वा लक्षैकादशं फलप्राप्नोति मनुष्यः। तत्रैव देवाग्रे नन्दीश्वरस्तथा भृकुटीशः वर्तेते तौ दृष्ट्वा नमस्कृत्य च मानवः शाश्वतं सुखं लभते। तत्र वायव्यां यमेश्वरो वर्तते तद्दर्शनेन यमदण्डस्य भयं न भवति। तस्याग्रे पापनाशननामकं परमं तीर्थं वरीवर्ति, तज्जले स्नानमात्रेण पापानि विलयं गच्छन्ति। मार्गशीर्षस्य अष्टम्यां कृष्णपक्षे तत्र स्नात्वा पितॄन् सन्तर्प्य च यो यमवरुणयोः दर्शनं कुरुते, तस्मिन् भगवान् शम्भुः तुष्टो भवति, विशेषतः कलिकाले। तत्र योऽष्टतीर्थानि विधिवत् प्रकुरुते, स शिवलोकं गत्वा तत्र तिष्ठति, न पुनरावर्तते कदाचन। कुण्डस्य दक्षिणे भागे ईशानेश्वरसंज्ञको देवोऽस्ति तमाश्रित्य नरः ऐन्द्रं पदमवाप्नोति। कोटिलिङ्गाभिपूरितं पुण्यमेकाम्रकाननं कोटितीर्थसमायुक्तं देवानां जयवर्द्धनमस्ति। तत्रानेकानि लिङ्गानि वर्तन्ते, तेषां सख्यां कर्तुं न कोऽपि शक्नुयात्[1]। एकाम्रकस्य क्षेत्रस्य गुणान् वक्तुं न कोऽप्यस्ति समर्थः। तत्र रम्याणि आम्राणि सन्ति। यत्र महर्षयो नित्यं तपस्तप्यन्ति—

अनेकानि च लिङ्गानि तत्र सन्ति द्विजोत्तमाः।
संख्यां कर्तुं न शक्नोति कोऽपि मानवपुङ्गवः ॥६४॥

---

१. कोटिलिङ्गेश्वरो यस्तु तद् ब्रह्मैव न संशयः।
यमलोका नरा नित्यं प्राप्नुवन्ति मनोरथान् ॥ ४३ ॥

२. एकाम्रकाननं पुण्यं कोटिलिङ्गाभिपूरितम्।
कःशक्तोऽतिगुणान् वक्तुं क्षेत्रस्यैकाम्रकस्य च ॥ ६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चदशेऽध्याये—

तस्मिन् एकाम्रकानने पुनः परमाश्रमविषयके, ऋषीणां प्रश्ने भरद्वाजमुनिरकथयत्–तस्मिन् पुण्यवने देवदेवस्योत्तरे भागे भगवता रामचन्द्रेण पूजितो रामेश्वर इति नाम्ना विख्यातो देवो विद्यते।[1] श्रीरामचन्द्राश्रमे ब्रह्म-वासवादिभिर्वन्दितं नानामुनिगणाकीर्णं वकुलैः पनसैः आम्रपादपैश्च सुशोभितं वहुविधैःखगैरनेकै मृगैश्च समन्तात् परिपूरितं पुण्यप्रदं स्थानं विद्यते, यद्रघुनाथस्य तपोवृद्धिकरमस्ति। तत्र जानकीनाथः शिवं नित्यं स मर्चति। तत्राध्वरोद्भूतं लिङ्गं वर्तते तस्य पश्चिमे भागे पापप्रणाशनं नाम अशोकवार इति नाम्ना विख्यातं तीर्थमस्ति, यत्र स्नात्वा नरः शिवलोकं गच्छति।[2]

यो हि शुक्लपक्षस्याष्टम्यां विशेषेण संरम्भाद् महेश्वरं ध्यात्वा-स्नाति, स पापेभ्यो न लिप्यते। तद्वुत्तरस्यां दिशि निर्मलपानीयं सरः, सर्वपापहरो रम्य आश्रमश्च विद्यते। अग्रे देव्या तथा ईशस्य मुनिसत्तमैः परिपूरितम् अशोक-वकुल-नीप-लोध्र-नागकेशर-मालती-मल्लिका-युतं नानाविधैर्वृक्षैः परिपूरितं मुक्तिप्रदायकं सुमनोहरं सिद्धेश्वरं नामकं लिङ्गं विद्यते। मध्ये रम्यतोया रत्नोत्पलसुशोभिता कर्दमहीना शीतलजला पुस्करणी च वर्तते। तत्र परपतपसो मुनयः सिद्धेश्वरं समाराध्य इहलोके परलोके च उत्तमां सिद्धिं प्राप्तवन्तः। सिद्धेश्वरात् परः कश्चन देवो-नास्ति यस्य दर्शनेन नरो पापान्मुच्यते, ब्रह्मघ्नतया च विमुच्यते।[3] यः शिरसा नतदेहः तस्य प्रणामं कुरुते, स एव भगवान् विष्णुः, स एव भगवान् शिवः। तत्र भगवतः सिद्धेश्वरस्य निर्वचनं यथा—

चतुर्दशसु लोकेषु यः सिद्धो भगवान् शिवः।
शिव एकत्वमायाति तस्मात् सिद्धेश्वरः स्मृतः॥ १८॥

---

१. तस्मिन् पुण्यवने विप्रा देवदेवस्य चोत्तरे।
— रामेश्वर इति ख्यातो रामचन्द्रेण पूजितः॥ २॥
२. अशोकादधिकं तीर्थं नास्त्यत्र पृथिवीतले।
यत्र स्नात्वा नरो विप्राः शिवलोकं च गच्छति॥ ७॥
३. सिद्धेश्वरात् परो देवो न भूतो न भविष्यति।
यं दृष्ट्वा मुच्यते पापान्नास्ति ब्रह्मघ्नता नरे॥ १६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्य दर्शनेन सर्वपापापनोदः, स्पर्शनेन दीर्घायुष्ट्वोपलब्धिः, पूजया च मुक्ति र्जायते इति निश्चप्रचम्। अस्य दक्षिणे पार्श्वे विख्यातं पापप्रणाशनं कुण्डं वर्तते, तत्र सुनिर्मले जले सकृत् स्नात्वा नरो नाकपृष्ठे मोदते। तस्य सिद्धेश्वरस्याग्रे य उत्तमं मन्त्रं जपति, तस्य स मन्त्रो नूनं सिद्धो भवति। तत्र पापप्रणाशनं मुक्तिदं मुक्तेश्वरं लिङ्गमस्ति, यस्य दर्शनं विधाय मानवः पापाद् विमुच्यते।

तस्य भरद्वाजस्य मुनेः तद्वचनं निशम्य सानन्दाः सर्वे ऋषयः आदरात् प्रोचु र्यद् वयं कृतार्था जाताः। यद्यस्मासु भवतोऽनुकम्पास्ति तर्हि कृपया भगवतः सिद्धेश्वरस्य समीपे यानि लिङ्गानि सन्ति, तान्यपि कृपया कथय—हे मुनिशार्दूल! प्राक् शचीपतिर्विडौजा यं विधिवत् पूजयामास, तमपि सिद्धेश्वरं लिङ्गं वर्णय। एवं तेषां भावितात्मनां रम्यं तद्वचनं निशम्य महामति र्भरद्वाजोऽवोचत्—सर्वसिद्धिप्रदायिनो भगवतः सिद्धेश्वरस्याग्रे पूर्वदिग्भागे देवदेव इन्द्रेश्वरः स्मृतोऽस्ति। तत्रैकदा सर्वदेवै र्वृतो महेन्द्रो यज्ञं कर्तुमारेभे तदा दुष्टा दितिसुता यज्ञे विघ्नं चक्रुः। तत्र दितिपुत्रैरसौ शचीपतिः पराजितो देवानां शरणं गतः। तत्र भगवन्तं भवानीनाथं निरीक्ष्य, हे परमेश्वर! यज्ञकालेऽहं दैत्यै र्विजितः, अतः कृपया मां त्राहीत्यभ्ययाचत। ततस्तद्वचनं श्रुत्वा महादेवोऽब्रवीत्—अपि शचीनाथ! त्वदर्थमहं दैत्यान् शमयिष्यामीत्युक्त्वा महता वेगेन अमितवर्चसा विष्णुना सह भगवान् महेश्वरः तत्रोपस्थाय, तान् दानवान् रणाजिरे हत्वाऽन्तर्हितः। तदनन्तरं वृद्धश्रवाः तत्र लिङ्गे भगवन्तं शङ्करं पूजयामास। विविधै र्मनोहरैः धूपदीपादिभि र्विधिवत् सम्पूज्यामरावतीं जगाम।[१] इत्थं प्राक्काले इन्द्रेश्वरः प्रख्यातः। इन्द्रेश्वरमाहात्म्येन कल्मषा विलयं व्रजन्ति। एतदिन्द्रेश्वरस्य स्थानं सर्वपुण्यप्रदमभिहितम्। नानामुनिगणाकीर्णं सर्ववृक्षविराजितं च तमीशानं ये भक्ता अर्चयन्ति ते प्रेत्य देवैरपि दुर्लभमुत्तमं स्थानं यान्ति। ये नरा दुर्वाङ्कुरैः तमीशानं समर्चयन्ति, ते सुतेजसा भासमाना विमलं स्थानं यान्ति। सर्वपापहरं

१. संयूज्य विधिवल्लिङ्गं धूप-दीप मनोहरैः।
चन्दनेन सुगन्धेन जगामाप्यमरावतीम्॥ ३६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुण्यं परमं स्वस्त्ययनमिदमार्षमुपाख्यानं श्रुत्वा यो वाचकं न प्रपूजयति, तस्य चक्षुषी ज्योतिरहिते तथा कर्णौं बधिरौ भवतः। तस्माद्वाचकं फलैः पुष्पैः वस्त्रैः स्वर्णादिभिश्चावश्यं प्रपूजयेत्—

येऽर्चयन्ति तमीशानं भक्तास्तु नरसत्तमाः।
प्रेत्य ते यान्ति परमं यद् देवैरपि दुर्लभम् ॥३४॥

षोडशेऽध्याये–

सिद्धिनाथस्य दक्षिणे भागे केदारेश्वरोऽस्ति। केदारेश्वरस्थलीं प्राप्य भक्तिपरायणो नरो महेशं पूजयित्वा स्वस्येप्सितं फलमवाप्नोति। सर्वसिद्धिप्रदायकः दक्षिणामूर्तिनाम्नाऽयं प्रसिद्धः। अस्य दर्शनेन वाजपेयाश्वमेधयोः फलं भवति। अस्य लिङ्गस्य पश्चिमे उत्तरे च भूभागाः सदा स्रवन्ति, येऽन्तरिक्षं भूर्भुवःस्वानि पुनन्ति। यो मानवः शिवपरायणः सन् शिरसि तज्जलं धारयति तत्तस्य केदारेश्वरकृपया दुरितं नश्यति। तस्यां स्थल्यां साधकानां फलप्रदा त्रैलोक्यसुन्दरी देवी अस्ति, सा त्रयाणां जगतां माता गौरीरूपेण संस्थिताऽस्ति। तस्या दर्शनेन लोकनाथः प्रसीदति। मन्त्राणां फलदायिनीं तां देवीं मानवाः समाराधयन्ति, यामुपास्य महीतले नहुषो राजाऽभूत्। सा देवी पुरा तत्रैव विविक्तं निर्मलजलं केशरसंज्ञकं कुण्डं चकार। विन्दूद्भवे तनुत्यागात्, सूक्ष्मे पिण्डदानात्, केदारे उदकं पित्वा च पुर्नजन्म न विद्यते[1]। कृष्णपक्षस्य नवम्यां मूर्ध्नि जलप्रोक्षणेनामितं फलं प्रजायते। तस्मिन् ह्रदे स्नात्वा नरः सर्वं फलं लभते। तत्र दक्षिणदिग्भागे साधकनां फलप्रदः महान् पीठोऽस्ति। नक्तव्रतं समास्थाय संयतात्मा जितेन्द्रियो मन्त्रं जप्त्वा त्रयोदशाहेन मन्त्रसिद्धिं प्राप्नोति। यस्य पुंसः केदारके स्थाने मन्त्रसिद्धिर्न जायते, तस्य विंशतिजन्मनाऽपि सिद्धिं र्भवितुं नार्हति। केदारके

१ विन्दूद्भवे तनुत्यागात् श्रीसूक्ष्मे पिण्डदानतः।
केदारे उदकं पित्वा पुनर्जन्म न विद्यते॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीर्थे स्नात्वा गौरीमहेश्वरं च दृष्टवा पीठे सकृज्जप्त्वा नरः कृतकृत्यो भवति। केदारस्य पुरावृत्तं श्रुत्वा पापराशि विलयं व्रजति।

यदा दक्षस्य सत्रे प्रवृत्ते वासवाद्या देवता हविर्भागमभुञ्जन्, परं पूर्ववैरकारणाद् महेश्वरो न पूजितस्तदा दाक्षायणी सती पत्यु र्विगर्हितं ज्ञात्वा भर्तुर्भक्तिपरायणा सती वह्नौ प्रविवेश।[1] तच्छ्रुत्वा देवो महेश्वरो दक्षयज्ञं वीरभद्रद्वारा व्यनाशयत्। ततो रुद्रस्य भयाद् देवा पलायन्ते स्म। कृत्तिवासा जगन्नाथः नागेश्वरे हिमालये तस्थौ। सापि साध्वी सती हिमवतो मेनायां पुनरुत्पन्ना। कमललोचना सा पार्वती पित्राऽनुमता सती महेश्वरं समाराधयामास। ततः कन्दर्पो ब्रह्मण्यस्य तपस्यतस्तस्य महादेवस्य संमुखे उपस्थितां पार्वतीं प्रति बाणान् चिक्षेप। कामेन धनुषि बाणे धृते भगवतः कृत्तिवाससः तृतीयनेत्रान् निर्गतो वह्निर्मदनोपरि पपात[2]! इत्थं कामं दग्ध्वा जगद्गुरुर्महादेवस्तां पार्वतीमुपयेमे। ततो हिमालये पर्वते देवदेवो महेश्वरः स्थित्वा पार्वत्या सह यथासुखं विजहार। एवं तत्र हिमालये स्थितयोः यथासुखं विहरतोस्तयोरेकदा हिमालयपत्नी मेना पुत्रीं पार्वतीं प्रति प्रोवाच–उमे! तव पत्युर्गृहं नास्ति, किम्? एतत्स्थानं युवयोः कृते सुखदं नास्ति। युवां स्वस्थानं गच्छत। स्त्रीणां पितृगहे निवासो निन्दनीयः। एतेन लोके निन्दा प्रजायते। अतः श्वसुरगृहे पितृगेहे वा वासो न समुचितः। इत्येवं मातुर्वचनमाकर्ण्य कोपप्रस्फुरिताधरा बहुधा विलपन्ती सा भगवन्तं शिवमिदं जगाद[3]—भगवन्! सर्वशक्तिसमन्वितस्त्वमीश्वरोऽसि। अत एवमपमानं न सोढव्यम्। दुःसहं हि मातुर्वचनम्। ततो भवानीपतिः प्रिय-

---

१. तदा दाक्षायणी देवी ज्ञात्वा पत्युर्विगर्हितम्।
प्रविवेश स्वयं वह्नौ भर्तुर्भक्तिपरायणा॥ १९॥
२. धृते धनुषि कामेन सशरे कृत्तिवाससः।
तृतीयचक्षुषो वह्निः पपात मदनोपरि॥ २४॥
३. स्त्रीणां पितृगृहे वासो निन्दितव्यः पुनः पुनः।
इति श्रुत्वा हैमवती कोपप्रस्फुरिताधरा।
बहुधा विलपन्ती सा शिवायेदं जगाद ह॥ २९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भार्यायाः समुचितं तद्वचनं निशम्य पूर्वसागरगामिन्या गङ्गाया उत्तरे तटे पार्वतीकृते वाराणसी नगरी निर्ममे[1]। तत्र तिष्ठन्नेकदा जगन्नाथो देवर्षिं नारदं पर्यपृच्छद्-मुने! एकाग्रं परमं पुण्यमरण्यं कुत्रास्ति! यद्यपि वाराणस्यां मम परमा प्रीतिः तथापि तत्रानेकधा निन्दाऽपि श्रूयते-एका तु तत्र सकलपापघ्नी उत्तरवाहिनी भव्या भगवती भागीरथी, यत्र मणिकर्णिकाऽस्ते, द्वितीयं च वाराणस्यां शरीरत्यागाद् ब्रह्मविद्याववोधः। द्वाभ्यामाभ्यामेवात्र तनुत्यजां मुक्तिं नैत्वन्यत् कारणमस्ति। अपिचेयं सांप्रतं बहुजनाकीर्णा जाता। अतो मे मनोऽत्र सांप्रतं न रमते। इत्येवमुक्त्वा देवर्षिणा साकमेकाम्रकं वनं ययौ। तत्र च पुरुषोत्तमं नत्वा लिङ्गधरः सन्नतिष्ठत्।

एतत् सर्वं वृतान्तं ज्ञात्वा नगाधिपति र्हिमालयः सर्वश्रीभिः मैनाकेन मेनया लोकपावन्या गङ्गया तत्त्वदर्शिभिः मुनिभिश्च साकं वनश्रेष्ठमेकाम्रकमाश्रममाजगाम। स विन्दुतीर्थे स्नात्वा नारायणं हरिं च दृष्ट्वा देवस्य भगवतो महेशस्य द्वारदेशमासाद्य स्तोतुमुपचक्रमे—

आदिकन्द! नमस्तुभ्यं नमस्तेऽव्यक्तयोनये।
कामचाराय सिंहाय सर्वेप्सितप्रदाय च॥
भक्तप्रिय! नमस्तुभ्यं विष्णुचक्रप्रदाय च।
त्रिपुरघ्न! नमस्तेऽस्तु नानासुरवरप्रद॥
नमो मोक्षप्रदात्रे च भगीरथवरप्रद!
नीलकण्ठनमस्तुभ्यमुमाप्रियकृते नमः॥
नमस्ते! सच्चिदानन्दः कुमारगुरवे! नमः।
रामचन्द्रप्रतिष्ठात्रे पञ्चब्रह्म! नमोऽस्तु ते॥ ४१-४५॥

एवं स्तुत्वा भूभृतां श्रेष्ठोऽवनितले साष्टाङ्गं पपात। ततोऽमृताक्षरभाषिणं गिरिवरं विलोक्य सन्तुष्टो भगवान् महेशोऽभ्यभाषत—गिरिराज! अनया स्तुत्या त्वयि तुष्टोऽस्मि, किमिच्छसि, यथेप्सितं कामं दातुमह-

---

१. पूर्वसागरगामिन्या गङ्गाया उत्तरे तटे।
वाराणसी नागपुरी निर्ममे पार्वतीहिते॥ ३२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुद्यतोऽस्मि। इति धूर्जटे र्मधुरं वचो निशम्य हिमवान् बद्धाञ्जलिः प्रियम्वदां वाचमवोचत्—एतस्यां पार्वत्यां ते महतीं प्रीतिं पर्यालोच्य मम बन्धुजनस्यानुरागो विवर्द्धते। साम्प्रतं बहुभिः रत्नैः ते प्रसादं करवाणि। हे महेश! आज्ञापय, मयि करुणां कुरु। अथ देवेशोऽकथयत्-देवताभि दुर्लभं त्वया किं प्रार्थितम्। असाध्योऽयं प्रसादः कलौ चन्द्रः शं करिष्यति।

इदानीं मत्समस्य लिङ्गस्य केदारेश्वरसंज्ञकस्य समीपे प्रसादं कुरु। तत्राहं सर्वतोभावेन साधकानां वरप्रदः। तत्र ते तनया गौरी अस्मत्प्रीतिविवर्द्धिनी आस्ते, या लोकोपकाराय स्वपाणिना कतुं कृत्वां सौम्यप्रदं रूपं विधिवद् विभज्य उत्कुण्डवारिणि—

गोरीकृतनमस्तुभ्यं सर्वकामफलप्रद!
पापापनोदं कुरु मे निमज्जेऽहं तवाम्भसि ॥ ६० ॥

इत्युक्त्वा वारत्रयं वारिणि निमज्ज्य स्नानं कुर्यात्। ततः कृताञ्जलिः सन् देवदेवस्य स्तोत्रं पठेत्—

दक्षिणामूर्तये तुभ्यं वटमूलनिवासिने।
ध्यानैकनिरताङ्गाय नमो रुद्राय ते नमः ॥ ६१ ॥

शुचिः तद्गतमानसो यो धीमान् एवं कुरुते, स कैलासभुवनं याति। ईषे (कार्तिके) मासि विशेषतः शुक्लपक्षस्य नवम्यां यो मूर्ध्नि कृष्णतिलान् दत्त्वा पार्वतीह्रदे स्नाति, स विमानेनाखण्डलस्थाने विराजते। गिरिराज! शुचिः ऊर्ध्वगतिः परं ब्रह्मसदनं गत्वा तत्राचमनं कृत्वा प्रयत्नेन मदीयमुत्तमं लिङ्गं पूजयस्व, इत्येवं प्रहसन्निव तं गिरीशमुवाच। ततः स हे शम्भो! भवद्वचनादहं तत्र गच्छामि, भवदुक्तं च सर्वं करिष्यामीति, अत्र संशयो नास्ति। इत्युक्त्वा गिरिराजो बहुविस्तृतं छत्रव्यजन सङ्कुलं बहुकोशप्रपूर्णं च प्रसादं विधिवच् चकार, येन भगवान् शङ्करः तुष्येत्। ततः समस्तैर्बान्धवैः वृत्तास्तत्र गत्वा महेशस्य पूजनं विधाय प्रणम्य स्तुत्वा च कृतकृत्यो बभूव। ततो गन्धवतीं गङ्गां त्रैलोक्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पावनं सर्वं पापघ्नं मुनीनां प्रीतिवर्धनमतुलं तत्तीर्थवरं विसर्ज्य पर्वतराजो हरमुक्तये स्वस्थानमगच्छत् ।[1]

या हि महेशस्य दक्षिणा मूर्तिः प्रकीर्तिता कर्मभूमावस्यां तत्तुल्या फलदा देवता नास्ति । तत्सन्निधावेव वरं रुद्रलिङ्गं वर्तते । अतः शान्तिशिवनाम्ना स पूजितः । शान्तशिवस्य दर्शनेन नरः सर्वशान्तिमवाप्नोति । शान्तात्मा विजितात्मा च नरः सत्यं शिवालयं गच्छति । शान्तशिवनाम्ना प्रसिद्धः स दक्षिणामूर्तिरेव । एनं सम्पूज्य नमस्कृत्य च मानवः शिवसायुज्यं लभते । यो हि मानवमणिः शिवनामशिरोमणिः इदं केदारेश्वरस्याख्यानं श्रद्धया सततं संकीर्तयेत्, शृणुयाद्वा तस्य शाश्वती गति भवति—

केदारेश्वरमाख्यानं य इदं कीर्तयेन्नरः ।
शृणुयाच्छ्रद्धया यो वा तस्य वै शाश्वती गतिः ।। ७८ ।।

सप्तदशेऽध्याये—

पुरा हिमवता त्यक्ताया गन्धसरितः कामदं सर्वमङ्गलं कथानकं तथा तस्यास्तीरे वर्तमानानां तीर्थयुक्तानां पर्वताणां लिङ्गानां च वर्णनकामनया ऋषिणां प्रश्ने भरद्वाजमुनिरुवाच-ऋषयः ! गन्धवतीसमा नद्यो त्रिषु लोकेषु न सन्ति, यस्या गन्धवत्या दर्शनमात्रेण नरः कल्मषात् सद्यो विमुच्यते—

न सन्ति त्रिषु लोकेषु नद्यो गन्धवतीसमाः ।
यस्या दर्शनमात्रेण नरो मुच्येत कल्मषात् ।। ४ ।।

---

१. गते गन्धवती नाम्ना गङ्गां चात्र विसृज्य च ।
ययौ गोत्रकुलश्रेष्ठः स्वं स्थानं हरमुक्तये ।। ७२ ।।
एतत्तीर्थं वरं विप्राः श्रुतं त्रैलोक्यपावनम् ।
सर्वपापघ्नमतुलं मुनीनां प्रीतिवर्द्धनम् ।। ७६ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकदा एनामासाद्य सप्तर्षयो दिवं ययुः, यतः सर्वभूतानां पावनीं तां नदीं को वा न संश्रयेत्। यदा पर्वताधिपो हिमवानत्राजगाम, तदा उत्तमं केदारेश्वरं देवं सम्पूज्य तल्लिङ्गार्चनजैः सुखैः पर्वतराजः कृतार्थात्मा जातः। ततो गन्धवती ननन्दारं गिरिशप्रियां जान्हवी-मुवाच—हे गङ्गे! यथा भागीरथीति नाम्ना तवाख्यास्ति तथैव मुन-योमामपि हेमवतीति नाम्ना अवदन्। निम्नगे! यथा बहुपुत्रोऽपि कुमु-दवान्धवः त्वया बहुविधैः रत्नैः पयोभिश्चालङ्कृतः तथैवाहमप्यलंकृता। हे गङ्गे अधुनाऽस्मिन् क्षेत्रे मम परमशाश्वती कीर्तिः स्थापिता हे पापघ्ने! त्वमप्यत्र स्थितिमाचार। त्वं पूर्वं नवधा प्रोक्ता इदानीं दशधा भव। तत्राद्या गोदावरी ब्रह्महत्यादिपापानां नाशिनी पुण्यवेर्द्धिनी, द्वितीया च गङ्गा प्रोक्ता, तृतीया रेवा कथिता, चतुर्थी जाह्नवी स्मृता, पञ्चमी कावेरी कथिता, षष्ठी गौतमी स्मृता, सप्तमी कृष्णा कथिता, अष्ठमी ब्राह्मी उदाहृता, नवमी वैतरणीति चेति नवधा विश्रुतासि। हे देवि! अधुना इहैकाम्रके सशरीरा भव। हे सुरार्चिते! गोदावरी, गोमती, कृष्णा, ब्राह्मी, रेवा, कावेरी, वैतरणी, जाह्नवी तथा गन्धवती, इत्येता दशधारा जाताः। तस्या तद्वचनमाकर्ण्य गङ्गोवाच-हेतात! यूयं मे गुरवः सन्ति। अतस्ते वचः करिष्यामि[1]। परं हे गिरीश्वर! यदि ते मयि प्रीति तर्हिःकेन नाम्ना ख्यातिं गमिष्यामिति शीघ्रं वदेति श्रुत्वा हिमवानु वाच—गङ्गे! यतः काननोद्भवपुष्पाणां लतान्तरे केतकीनां पद्मानां चम्पकानां, विशेषतः फलानां च वायुसंसर्गाद् गन्धलाभात् गन्धव-तीति नाम्ना शुभे एकाम्रवने प्रसिद्धा भव। अतस्त्वयि मे महती प्रीति-र्भविष्यति, भगवान् शङ्करोऽपि त्वयि तुष्टो भविष्यति। इति कथनान-न्तरं गङ्गा तस्मिन् काननान्तरे दक्षिणसागराभिमुखं ववाह।

ततो देवदुन्दुभिना सह देवानां करैर्मुक्ता पुष्पवृष्टि र्हिमालयमूर्द्धिन पपात। तेन कर्मणा परिवारेण सह कृतकृत्यो नगाधिराजो हिमालयो

---

१. इति तस्य वचः श्रुत्वा गङ्गोवाच हिमालयम्।
यूयं मे गुरवः तात! करवाणि वचस्तव॥ १७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निजभवनमुपजगाम। एवं गन्धवतीसरिदिति नाम्ना निगदिता सती एकाम्रवने प्रच्छन्नरूपिणी गङ्गा निरन्तरं प्रवहति।

अथ गन्धनद्याः पुरातनमाख्यनकं वक्ष्ये-मया पूर्वं पुलहाश्रमे या कथा श्रुता तामेवेदानीं संप्रवक्ष्यामि यूयमेकाग्रमनसः शृणुध्वम्। एकदा देवर्षिः पुण्ये वदरिकाश्रमे ययौ। तत्रोपस्थितं मनिपुङ्गवं नारदं दृष्ट्वा सर्वे मुनयो वहुभिः वलिभिः सन्तोप्य एवमब्रुवन्—हे देवर्षे! त्वदीयेन दर्शनेन अद्य तीर्थशुश्रूषवो वयं कृतार्था भवामः। भगवन्! कस्मिन् क्षेत्रे अथवा कुत्र तीर्थे, कस्यां नद्यां कृतः स्वल्पोऽपि धर्मः नानाविधो भवति, अल्पोऽपि अक्षयमेधते, रम्याः शिवाश्रमाः कुत्र सन्ति, कुत्र च पुण्ये क्षेत्रे मानवै र्मुक्तिरवाप्यते। एतदाकर्ण्य भगवान् नारदोऽब्रवीत्—महर्षयः! महीपृष्ठे पापिनां सिद्धिहेतवे अनेकानि क्षेत्राणि तीर्थानि नद्यश्च सन्ति। तथापि चक्रपाणिनः एकं विविक्तं स्थानं विद्यते, तथैव तत्र भवद्भिः पृष्टाः सर्वे गुणा सन्ति। महोदधेरुत्तरत. त्रियोजनमायतम् एकाम्रकं वनं विद्यते यत्तत्रागतानां प्रीतिप्रदमस्ति। स्वर्णवर्णगिरिरम्ये तथैव कोटि लिङ्गावृतो भूतेशो विभुर्भगवान् महेश्वरो विराजते। तत्र प्रवर्तितं वित्तं नूनमक्षयं भवति। तत्रोपस्थाय कन्यामधुसर्पिरादिदानमुत्तमं प्रतिपादितम्। तत्र सर्वदानापेक्षयाऽन्नदानं विशिष्यते। पृथ्वीतलेऽन्नदानात् परं किमपि दानं नास्ति। अन्नमाश्रित्यैव प्राणिनां प्राणाः तिष्ठन्ति। अन्नेन विना प्राणिनः प्राणविह्वला सन्तो जीवितुं न शक्नुवन्ति। तस्मादन्नप्रदातारं प्राणदातारं कथयन्ति वुधाः—

तत्क्षेत्रे सर्वदानेभ्यो ह्यन्नदानं विशिष्यते।
अन्नदानात् परं दानं नास्त्यन्यत् पृथिवीतले॥
अन्नमासाद्य तिष्ठन्ति प्राणाश्चैव तु प्राणिनाम्।
विनाऽन्नेन न जीवन्ति प्राणिनः प्राणविह्वलाः॥
तस्मादन्नप्रदातारः प्राणदातार एव हि।

तस्मिन् पुण्यक्षेत्रे दत्तमल्पमपि वहु भवति। गङ्गादिषु तीर्थेषु वाराणस्यादिषु क्षेत्रेषु कृतं स्नानसन्ध्यादिकं प्रयागकाशीफलदमस्ति। अधिकफलकथनेन किं फलं तस्मिन् स्वर्णकूटाचले पापिनां पुण्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मणां च तनुत्यागान् मुक्तिर्भवति । तत्र ये तनुं ज्यजन्ति, तेषां कर्णे साक्षान्महेश्वरो मुक्तिप्रदातारं तारकं मन्त्रमुपदिशति, तेन ते सद्य एव मुक्ता भवन्ति ।[१]

तस्मिन् वैष्णवे क्षेत्रे भगवान् विष्णुरेव परिपालकः । तत्र सर्वे विष्णुपराः केचन च माहेश्वरा जनाः सन्ति । तत्र गजानां सिंहैः सह सम्वादः श्रूयते, जिह्मगानां सर्पाणां नकुलैः साकं, मार्जारैः सार्द्धं मूषकानां मित्रत्वं तथा शत्रव आत्मीया भवन्ति । तत्क्षेत्रस्य प्रभावतो न केऽपि परस्परं विरुध्यन्ति । तत्र महेशस्य नानाविधा आश्रमाः सन्ति, बहूनि पावकानि तीर्थानि, विविधवाहिन्यो विविधा नद्योऽपि सन्ति । तस्मिन् उत्तमे क्षेत्रे नाम्ना गन्धवती सरिदस्ति, या आद्या गङ्गा समाख्याता त्रिकूटकल्मषमपहन्ति । पूर्वं भगीरथेन राज्ञाऽत्र सदाशिवः समाराधितः । यो हि त्रैलोक्यपावनी तां गङ्गादेवीं शिरसा धारयामास । भगीरथेनानीतां तां रुद्रस्य जटाकलापे भ्रममाणां गङ्गां शिवभक्तये हिमवान् विससर्ज । लोकानां पावनार्थाय कलिकल्मषनाशिनीं त्रिकोटिकुलतारिणीं तामाद्यां गङ्गां ब्रह्मवादिनो मुनयः पुण्यां गन्धवतीं ब्रुवन्ति । पापिष्ठा पाखण्डिनो ब्राह्मणनिन्दका गुरुभक्तिविहीना ये नास्तिका सन्ति, तेऽपि तत्र स्नात्वा दिवं गताः । चतुर्युगेषु तस्याश्चत्वारि नामानि यथा—

कलौ गन्धवती नाम्ना कृते भागीरथीति च ।
त्रेतायां जन्हुतनया द्वापरे हरिपादजा ॥ ४७ ॥
एवं नामानि च पुरा कीर्तितानि मनीषिभिः ।
चत्वारि त्रिषु लोकेषु चतुर्षु च युगेषु च ॥ ४८ ॥

ब्रह्मस्वाहारकः पापीयान् यथा नरकं याति तथैव तस्याः सरिद्वरायाः स्नानमन्त्रनिरोधको याति । तस्याः संस्पर्शनादेव स्वर्गादिसुख-

---

१. प्रयाग-काशी-फलदमेकाम्रं मुनिसत्तमाः ।
स्वर्णकूटाचले तस्मिन् पापिनां पुण्यकर्मिणाम् ।
तनुत्यागादेव मुक्तिः किमत्र अधिकं फलम् ॥ २६ ॥
त्यजन्ति तत्र ये देहं तेषां कर्णे महेश्वरः ।
मन्त्रं मुक्तिप्रदातारं ब्रह्मतारकमादिशेत् ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मवाप्यते। यो हि तां वन्दमानः तत्र स्नाति, तस्य सा त्रिकोटिकुलानि पुनाति। यथाहि—

गुप्तगङ्गे ! नमस्तुभ्यम् ऋषिदेवाभिवन्दिते !
निमज्जेऽहं महाभागे ! मां समुद्धर पातकात् ॥ ५१ ॥
इत्युक्त्वा मज्जयेत्तस्या शम्वरे कलुषापहे।
विशेषतः कलियुगे त्रिकोटिकुलपावनी ॥ ५२ ॥

सर्वपापयुक्तोऽपि मानवः पितृभ्यो गङ्गायां पिण्डदानाद् मुक्तो-भवति। तस्यास्तीरे पर्यन्येश्वरो महेशो विश्रुतोऽस्ति, यत्पूजनेन सर्वं सफलं भवति। तस्यां स्नात्वा विधिवत् पूजयित्वा च नरः पापक्षयं कृत्वा राजसूयफलं लभते। तत्रैव पापघ्नं पुण्यवर्द्धनं मेघेश्वरं तीर्थं विद्यते। तस्मिन् स्नात्वा नरः शिवसायुज्यं सालोक्यं वा समश्नुते। तस्यास्तीरे ब्रह्मलोकप्रदायकं पूर्वं ब्राह्मणाराधितं ब्रह्मेश्वरं लिङ्गं वरीवर्ति तत्रैव जनपावनं ब्रह्मयशोद्भवं तीर्थं विद्यते, तत्र स्नानेन पूजनेन चाघो-विनश्यति। गन्धवतीतीर्थे स्नात्वा ब्रह्मेश्वरं हरं दृष्ट्वा च नर. एकविंशति-कुलसहितो ब्रह्मलोकं गच्छति। तस्या नद्यास्तटे सुधाम्नैव पूजितं गोकर्णे-श्वरं लिङ्गं विद्यते। नरो गन्धनद्यां स्नात्वा गोकर्णेश्वरं पूजयित्वा शिवप्रीत्या मन्त्रसिद्धिमवाप्नोति। गन्धनद्यास्तटे उत्पलकेश्वरं वर्तते, तत्र स्नानं पूजनं च मुक्तिलक्षणमुच्यते। पुनस्तस्यास्तटे भूमी-स्वरं लिङ्गं वर्तते। तस्य लिङ्गस्य दर्शनेन भवभीति र्विनश्यति। तस्यास्तटे त्रयः:—सूक्ष्मेस्वरः, आम्रकेश्वरः, तयोर्मध्ये मध्यमेश्वरश्च सन्ति। तान् समासाद्य नरो ब्रह्मसायुज्यमश्नुते। तत्रत्यं पिण्डदानं पितॄणां मुक्तिकारकमस्ति। पिण्डं वितरन् नरः पितृभिः सहितः स्वर्गे मोदते।

दक्षिणां दिशमाश्रिता गङ्गा कलावन्तर्हिता। "अहो गन्धवती पुण्या त्रिकोटिकुलपावनी। तस्यां नरः सकृत् स्नात्वा जिह्वीते ब्राह्मणः पदं।" इत्युक्त्वा देवर्षि र्ब्रह्मणः पदं गतः। तस्मिन् गते मुनयोऽपि सानन्दं ययुः। ततो जितेन्द्रिया मुनयः सहैव तत्क्षेत्रमागत्य गन्धवत्यां स्नात्वा ईश्वरलिङ्गं ददृशुः। तत्र शुद्धजले स्नात्वा पितृपितामहान् तर्पयित्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाहिताः सन्तः पिण्डदानादिकं चक्रुः। ततस्तत्र सहस्राणि जाम्बूनद-सदृशानि विमानानि आययुः। तदा ते मुनयः तत्र स्वसप्तदशशतकुलैः सार्द्धं समारुह्य ब्रह्मणः पदं ययुः। तेषां मुनीनां परमं सौभाग्यं यत्ते सकृदेव दुरितौघविनाशनं गन्धवत्यां स्नानं विधाय ब्रह्मलोकं गताः। कैलासनिलयाया गन्धवत्या जलं ब्रह्मलोकगामिनं पाथेयं श्रुतम्। गन्धवत्या महात्म्यं श्रुत्वा मनुष्यस्य पापं विनश्यति, दीर्घमायुश्च प्रवर्द्धते सुकृतस्यापि उपबृंहणं भवति। यो नरो गन्धवत्याः पुण्यवर्द्धनमाख्यानं शृणोति, तस्य सन्ततेः धनस्य च विच्छेदो नैव जायते—

माहात्म्यं गन्धवत्याश्च श्रुत्वा पापं विनश्यति।
दीर्घमायुरवाप्नोति सुकृतस्यापि बृंहणम् ॥ ६८ ॥

●

अष्टादशोऽध्याये–

अथ देवीपादविनिःसृततीर्थवर्णनप्रसङ्गे देवीद्वारा हतयोः कीर्तिवासयो र्विषये ऋषीणां प्रश्ने भरद्वाजो मुनिरवोचत-यादसां विनाशको देवब्राह्मणनिन्दकोदुर्विनीतो दुर्धर्षस्य दुर्मिलस्य पुत्रो महासुरः कीर्तिर्बभूव। विश्वस्य निधनोद्यतः तद्भ्राता च वास आसीत्। तस्य एकोत्तरशतं भ्रातर आसन्। ते सर्वेऽपि पर्वतनिवासिनो भीमबला बभूवुः।

एकदा पित्रा त्रासितो हंसको भ्रातॄन् विहाय मृगव्याजेन एकाम्रकं वनं जगाम। तत्र भगवतीं दृष्ट्वा सहवासमयाचनमुवाच-हे आर्ये! मम प्राणान् पालय, सुन्दरि! मां रक्ष, अहं कीर्तिनामास्मि महासुरः, अयं चास्ति मम भ्राता वासः। हे वरवर्णिनि! मत्समः त्रिषु लोकेषु ऐश्वर्यगुणरूपाढ्यः सौभाग्यपूजितश्च कोऽपि नास्ति। अपि अरविन्दाक्षि! त्वामवलोक्याहं सीदामि। अतो मां त्राहि, स्वकीयं शरीरं मह्यं देहि। तदुत्तरे भगवती देवी प्रावोचत्-असुरराज! यमो हि मम पादौ स्वशिरसि धृत्वा जगद् बिभर्ति। तस्मिन् हतेऽहं नित्यं ते प्रिया भवे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यम् । इति तस्या देव्या वचनं निशम्य दुर्भिलात्मजौ तौ सुहृष्टौ सन्तौ महासुरं बलं विधातुं प्रवृत्तौ । तदा धीरा सा तु गिरिनन्दिनी सव्येन पादेन कीर्तिं वासं च स्फटिकामलपृष्ठे निपात्य जघान । ततस्तौ दिवौकसः स्थानं जग्मतुः । ततो बहुभिः मुनिभिस्तत्र देव्या प्रीतये त्रैलोक्यपावनं तीर्थं स्थापितम् । फाल्गुनमासस्यासिताष्टम्यां सिताष्टम्यांञ्च तत्र देवीपदे भक्त्या स्नात्वा नरः गोपालिनीसममभीष्टं काममवाप्नोति । तत्र एवंविधानि बहूनि तीर्थानि सन्ति ।

तस्मिन् फलप्रदे क्षेत्रे पवित्राणि तीर्थानि विद्यन्ते, येषां स्मरणमात्रेण नरो निष्पापो जायते । स्वर्णकूटः रसालः-मध्योष्मशिरसद्म, लध्वार्जितः सिद्धशैलः स्वर्णः, तपसःस्थली च । एतानि नामानि शतानि पुण्यानि, तथा बहराणि च सन्ति । प्रातरुत्थाय स्मरणेन तद्दिने परमं सुखमुपजायते । भरद्वाजस्य मुनेरिदं वचनं निशम्य सानन्दा मुनयः पुनरादरात् स्वर्णकूटे शिवालये चातुर्मासस्य व्रतस्य फलं पप्रच्छुः---भगवन् ! तत्र दानेन किं पुण्यं भवति ? तत्र तपसा किं फलं प्रजायते ? तत्रान्न दानेन किं सुकृतमुपपद्यते ? तत्र व्रतं च केन विधानेन अनुष्ठेयम् ?

ततः स चातुर्मास्यव्रतस्य विधानं वक्तुमुपाक्रमत–एकेन दिनेन वासस्य फलं काशीवासफलसमानमस्ति । यो हि पुमान् एकाम्रके क्षेत्रे चातुर्मास्यं व्रतं कुरुते, स काशीवासाद् शतगुणितं फलं लभते । केदारे यत् फलं लभ्यते पुरुषोत्तमे च यत्फलमवाप्यते स्वर्णकूटाचले तत्फलं शतगुणितं भवति[1]---

---

१. करोत्येकाम्रके क्षेत्रे चातुर्मास्यं तु यः पुमान् ।
फलं काश्याः शतगुणं सहस्राधिकमाप्नुयात् ॥ ३६ ॥
केदारे यत् फलं प्राप्तं यत् फलं पुरुषोत्तमे ।
तत्फलं कोटिगुणितं स्वर्णकूटाचले द्विजाः ॥ ३७ ॥
कुरुक्षेत्रे चतुर्भिश्च ग्रहणे चन्द्रसूर्ययोः ।
एकाम्रे तत्फलं प्रोक्तं चातुर्मास्ये न संशयः ॥ ३८ ॥
यत्र सन्निहितो विष्णु र्वासवादिभिरावृतः ।
कस्तस्य शक्नुयाद्वक्तुं माहात्म्यं विधिविस्तरम् ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्रोमया देव्या सह देवदेवः कृत्तिवासा अस्ति, तस्य महात्म्यं न कोऽपि कथयितुं समर्थः । काश्यामष्टयुगपर्यन्तं सुदारुणं तपस्तप्त्वा या गतिरवाप्यते, सैव गतिः शिवालये चातुर्मास्यव्रतविधानेनापि प्राप्यते । यो मनुष्यो हरिशयनादूर्ध्वं चातुर्मास्ये एकं दिनं एकाम्रक्षेत्रे निवसति, तेन पुंसा सांख्ययोगव्रतेन या गतिरवाप्यते सैव गति र्लभ्यते ।

चातुर्मास्यस्य व्रतस्य विधानं तु तेनेत्थमभिहितमस्ति-आषाढ़स्य शुक्लदशम्यां सुमाहितो व्रती संकल्पमाचरेत् । नवम्यामष्टतीर्थं च कुर्वीत । वासुदेवपरायणो भूत्वा वक्ष्यमाणं मन्त्रं समुदीरयेत् –

आजन्म दुरितानां च क्षयाय मधुसूदन !
अष्टतीर्थविधिं कुर्वे आज्ञापय जनार्दन ।। ३७ ।।

इत्येवं गोविन्दमनुज्ञाप्य विन्दुसर उपव्रज्यापि वासुदेवस्येवमनुज्ञामुदीरयेत्—

वासुदेव ! नमस्तुभ्यं वसुदेवात्मज ! प्रभो !
स्नातुमिच्छामि देवेश ! सिद्धिमात्रं प्रकल्पय ।। ३९ ।।

इत्येवं वासुदेवं प्रार्थयित्वा हृदि, दक्षिणे, वामभागे, पृष्ठे, मूर्ध्नि च क्रमशः स्कन्दं, महाकालं, नन्दिकेश्वरम् , अनन्तकं वासुदेवं च न्यसेत् । ततः शुद्धमना भूत्वा सपवित्रः उदङ्मुख सन् नाभिमात्रे जले स्थित्वा वक्ष्यमाणं मन्त्रं समुच्चरेत्—

विन्दूद्भव ! नमस्तुभ्यं महादेवेन निर्मित !
विश्वविन्दुर्जगद्दीप ! मज्जयामि तवाम्भसि ।। ४४ ।।
एष विश्वेश्वरो देव एषा च मणिकर्णिका ।
कलावन्तर्हिता काशी मूर्ध्नि एव न संशयः ।। ४६ ।।

एवं स्नात्वा विशुद्धात्मा त्रिलोचनं देवं दृष्ट्वा च वायव्यां दिशि देवस्य पापविनाशनं स्थानं व्रजेत् । ततः कृताञ्जलिपुटः सन् देवस्याभिमुखो भूत्वा वक्ष्यमाणं पद्यं पठेत्—

सान्निध्यं भवता पूर्वमादिष्टं शूलपाणिना ।
प्रतिपेदेऽमितास्माकं निमज्जेऽहं ह्रदे तव ।। ४८ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युच्चार्य जले प्रविश्य सावधानतया उदङ्मुखो हृदये विरूपं ध्यात्वा ततो वक्ष्यमाणं मन्त्रमुदीरयेत्--

जगद्भूत ह्यनाद्यन्त अशरीरः शररधृक् ।
प्रसीद देव ईशान ! स्थिरा भक्तिरिहास्तु मे ।
मज्जये त्रीणि वारिणि पिवतोऽहं षडक्षरम् ॥ ५१ ॥

ततः त्रिभुवनेश्वरं गत्वा प्रयत्नेन तं पश्येत् । अनन्तरमैशान्यां दिशि गत्वा गङ्गायमुनमर्दिन्या दर्शनं कार्यम् । तस्याः तटे समासाद्य पुर्वानुज्ञामुदीरयेत् । तदनु जलान्तरं गत्वा सपवित्र उदङ्मुखो भूत्वा चन्द्रिकार्चनं च स्मृत्वा एतन्मन्त्रमुदीरयेत्—

गङ्गाधर ! नमस्तुभ्यं गङ्गायमुनसङ्गमे ।
स्नात्वा च हितमत्यर्थं ब्रह्म-विष्णु-शिवात्मकम् ॥ ५४ ॥

अनेन मन्त्रेण स्नात्वा तत्र गङ्गां समर्चयेत् । तदनन्तरमैशान्यां दिशि ईशस्य कोटितीर्थप्रपूरितं त्रिभुवनेश्वरं लिङ्गं प्रयत्नेन प्रपश्येत् । पूर्वानुज्ञां स्मृत्वा ततो वक्ष्यमाणं मन्त्रं समुदीरयेत् —

स्नानं जगदिदं कृत्स्नं यत् पुण्यं समुदीरयेत् ।
तदिहाप्यक्षयं पुण्यं ममास्तु त्रिपुरान्तक ! ॥ ५७ ॥

एवं विधिवत्तत्र स्नात्वा त्रिभुवनेश्वरदर्शनं च कृत्वा पूतात्मा सन् पूर्वस्यां दिशि ब्रह्मेश्वरं यजेत् । ततः पूर्वामनुज्ञां स्मृत्वा वक्ष्यमाणं मन्त्रं समुदीरयेत्—

नमोऽस्तु परमार्थाय प्रजानां पतये नमः ।
यजेऽत्र शाम्भवे कुण्डे निमज्जेऽहं तु तवाज्ञया ॥ ६० ॥

तदनन्तरं त्रिभुवनेश्वरस्य दर्शनं विधाय मेघेश्वरं व्रजेत् । पूर्वानुज्ञा स्मृत्वा ततो वक्ष्यमाणं मन्त्रं समुदीरयेत्--

नमस्ते शितिकण्ठाय पर्यन्तपतये नमः ।
प्रसीद सुमुखो नाम यज्ञमेतमुदीक्ष्यसे ॥ ६२ ॥

अनेन विधिना स्नात्वा कपर्दिनं दृष्ट्वा कैवेर्यां दिशि देवस्यालम्बकं तीर्थमाव्रजेत् । तस्य तटं समासाद्य पूर्ववत् पूर्वामनुज्ञां स्मृत्वा वक्ष्यमाणेन मन्त्रेण त्रीणि वाराणि मज्जयेत्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमो वो ध्यानयोगाय शाश्वताय कपर्दिने ।
मनोरथफलवाप्तिं पूरयस्व महेश्वर ! ॥ ६५ ॥

ततो महेशानं गत्वा त्रिभुवनेश्वरं च दृष्ट्वा वन्दयित्वा नमस्कृत्य च उत्तरपर्वतं व्रजेत् । यत्र रामेश्वर इति नाम्ना प्रसिद्धो महादेवो वर्तते । तत्र स्नानं विधाय पूर्ववदनुज्ञां च स्मृत्वाग्रिमं पद्यं पठेत्—

वृषभस्योत्तरे तीरे शृङ्गे वसति दक्षिणे ।
अशोकवारनामा त्वं पापं हर नमोऽस्तु ते ॥ ६६ ॥

रात्रौ भूतले कुशासनमास्तीर्य शयनं कार्यम् । दशम्यामष्टतीर्थं वा कुर्यात् । पुनः प्रभातसमये विचक्षणः एकादश्यां विन्दुसरसि स्नानं कृत्वा श्रीरमापते र्दर्शनं कुर्यात् । ततः पूर्वाभिमुखो भूत्वा स्नानकर्ता हृदये चक्रिणं ध्यात्वा जगन्नाथमनुज्ञाप्य सङ्कल्पमाचरेत्—

निर्विघ्नेन यथा विष्णो ! चातुर्मास्यव्रतं मम ।
भवेत्तथा कुरुष्वाशु पापघ्नं पुण्यवृंहणम् ॥ ७४ ॥

तत एकादश्यां तिथौ यतात्मा अच्युतमित्थमनुज्ञाप्य 'गणानां त्वा' इति-मन्त्रेण विघ्नविनायकं समर्चयेत् । ततो विघ्नराजं समभ्यर्च्य एकमेश्वर-सन्निधौ व्रती यथाकामेन संकल्पं कुर्यात् । ततो व्रती तत्र ह्रदोत्तमे प्रति-दिनं स्नानं कृत्तिवाससो दर्शनं देव्या हरस्य अनन्तस्य तथा ब्रह्मणो कीर्तिवासश्च दर्शनं कुर्यात् । व्रतिनाम्बरस्तेषां प्रत्यहं दर्शनं कार्यम् । मत्सरहितः प्रथमे मासे शाकं वर्जयेत्, भाद्रपदमासि दधिवर्ज्यम्, अश्विने मासि दुग्धं च न पिवेत्, कार्तिके मासे तु मांसं विवर्जयेत्, प्रत्यहं दीपदानं विधेयम् । व्रतिना स्त्रीसम्पर्को न कार्यः, तैलसेवनं च न विधेयम् । कार्तिकमासानन्तरं व्रतचारिणा क्षुधार्तेभ्योऽन्नदानं कर्तव्यम् । अन्य-तीर्थापेक्षयाऽत्रान्नदानस्य सहस्रगुणितं फलं भवति । तस्मादत्रान्नप्रदे पुण्य-क्षेत्रेऽत्र मुक्ति र्व्रतिनः करे स्थिता भवति । अतः पुण्यमिच्छता व्रतिनाऽत्र प्रतिदिनं नूनमन्नदानं कार्यम् । अस्मिन् क्षेत्रे अन्नदानाद् विरतौ सत्यां सर्वं विफलं जायते । तस्माद् गजाश्वरथदानेभ्योऽन्नदानं विशिष्यते । शिवसद्मनि सर्वकालेऽन्नदानं कर्तव्यम् । यः पुमान् नरो वा एवं चातु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यक्षेत्रे कृतं पापं स्वर्णकूटे विनश्यति ।
स्वर्णकूटे कृतं पापं वज्रलेपं भवेद् ध्रुवम् ॥ ६३ ॥

[मास्यव्रतं कुरुते, स दिनेदिनेऽश्वमेधस्य राजसूययज्ञस्य च फलं लभते[१]। अन्यक्षेत्रे कृतानि ब्रह्महत्यादीनि पापानि अस्मिन् क्षेत्रे प्रविष्टे सत्येव नूनं क्षयं यान्ति। अन्यक्षेत्रे कृतं पापं स्वर्णकूटे विनश्यति स्वर्णकूटे कृतं पापं ध्रुवं च वज्रलेपायते ।[१]

पुनरस्मिन् क्षेत्रे कृतस्य वज्रलेपस्य पापस्य कथं क्षयो भवतीति मुनीनां प्रश्ने भरद्वाज उवाच–यो मनुष्यः संयतात्मा सन् माघकृष्णपक्षे चतुर्दश्यां क्षेत्रस्यास्य प्रदक्षिणां कुरुते। देवस्य दक्षिणे पश्चिमे उत्तरे च क्रोशमात्रं परमेष्ठिनः शिवस्य क्षेत्रमस्ति। यो नरः सूर्यहरस्य मेरोः प्रदक्षिणं कुरुते, एकेन दिनेन प्रदक्षिणया तस्य सर्वं पापादिकं विलयं प्रयाति। अस्य तीर्थस्य प्रदक्षिणायां क्षणमपि न तिष्ठेत्, नवा हासं कुर्यात्, न च रोदनं कार्यम्। हासे रोदने च प्रदक्षिणं विफलं भवति[२]। अस्य क्षेत्रस्यैकेन प्रदक्षिणेन कोटिजन्माघनाशनं भवति, द्वितीयेन द्वितीयजन्मनः, तृतीयेन च त्रिजन्मनोऽघनाशनं जायते। एकाम्रे कृतपापानां क्षयाय क्षेत्रप्रदक्षिणं श्रेष्ठमस्ति, अन्योऽपि न कश्चनास्ति मार्गः। अन्यतीर्थे कृतं पापं स्वर्णकूटे विनश्यति, स्वर्णकूटे कृतं पापं प्रदक्षिणे एव विनश्यतीति निश्चप्रचम्---

एकाम्रकृतपापानां क्षयाय द्विजसत्तमाः ।
क्षेत्रप्रदक्षिणाच्चात्र नान्यः पन्थास्तु विद्यते ॥ १०१ ॥

अन्यतीर्थे कृतं पापं स्वर्णकूटे विनश्यति ।
स्वर्णकूटे कृतं पापं विनश्यति प्रदक्षिणे ।' १०२ ॥

---

१. चातुर्मास्यव्रतं विप्राः ! य एवं कुरुते पुमान् ।
नारी वाथ द्विजश्रेष्ठाः स फलं लभते ध्रुवम् ॥ ८८ ॥
दिने दिनेऽश्वमेधस्य फलमाप्नोति मानवः ।
राजसूयस्य यज्ञस्य कार्तिके समुदाहृतम् ॥ ८९ ॥

२. नैव तिष्ठेत् क्षणमपि न हासं नैव रोदनम् ।
हासे च रोदने विप्रा विफलं वै प्रदक्षिणम् ॥ ९९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकोनविंशतितमेऽध्याये—

एकाम्रकवने विविधयात्राविषये ऋषीणां प्रश्ने भरद्वाजो मुनिरुवाच—ऋषयः! एकाम्रकवने हि सप्त यात्राः प्रकीर्तिताः सन्ति,ता यथा—मार्गशीर्षकृष्णाष्टम्यां प्रथमा यात्रा भवति। पुरा देवदेन शम्भुना वरुणभूपाय अनुज्ञा प्रदत्ता। अतो मार्गशीर्षस्य प्रथमाष्टम्यामेकाम्रकलिंगसमीपे प्रथमा यात्रा प्रोच्यते। तत्र स्नान-जप-दानानि सर्वपापप्रणासनानि प्रोक्तानि सन्ति। अथ पापप्रणाशिनीं यात्रां नाम्ना अभिधास्यामि। भगवता शम्भुना पुरा भास्कराय या अनुज्ञा प्रदत्ता तामहं युष्मान् प्रीत्या वदामि, सावधानतया शृणुध्वम्! माघशुक्लस्य सप्तम्यां सूर्यमुद्दिश्य शिवेनाभिहितम्—हे सहस्रांशो! तस्यां तिथौ तत्र लिङ्गस्य सन्निधिं यास्यामि लोकेभ्यश्चोत्तमं फलं प्रदास्यामि। तत्र तिलदानं महाफलप्रदं प्रोक्तमस्ति। तत्र भास्करेशस्य पूजनेन मुक्तिर्लभ्यते[१]।

कपिलस्य महात्मनो लिङ्गस्य पूजनं फलप्रदमस्ति, यत्र भगवतः शूलिनो नित्यं सन्निधानं भवति। कपिले लिङ्गे पूजिते नूनं कपर्दिना वरो दीयते। तत्र स सर्वदा सर्वभावेन तिष्ठति, पूजां च गृह्णाति। फाल्गुनशुक्लपक्षस्य सौरवासरे भगवान् शिवो भगवत्या उभया सह यात्रां कुरुते, प्राणिनां कृते च पक्तॄणां भोक्तॄणां च विशेषतो वाञ्छितं फलं विधत्ते च। शिरसि शरीरे च तैलमर्दनपूर्वकं कापिले वक्ष्यमाणमन्त्रपठनपूर्वकं स्नानं कार्यम्—

नमः कपिलतीर्थाङ्ग गङ्गाम्बुधिफलप्रदकम्।
पापं नाशय मे तीर्थ! मज्जयेऽहं तवाम्भसि॥ १५॥

इति मन्त्रसमुच्चारणपूर्वकं स्नानेन ब्रह्महत्यादिपापानि विलयं व्रजन्ति। इत्थमभिधाय भगवान् शम्भुस्तत्रैवान्तरधीयत। पुरा राघवाय प्रसन्नो भगवान् सदाशिवो मधुरं वाक्यमुवाच—हे महाबाहो राम! मम वचनं निशामय। अहं हि सर्वभूतानां मोक्षाय महाफलां यात्रां

---

१. तिलदानं तु तत्रोक्तं महापुण्यप्रदायकम्।
तत्र श्रीभास्करेशस्य पूजनं मुक्तिलक्षणम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वदामि तां सावधानतया शृणु—चैत्रमासस्य शुक्लाष्टम्यां याम्ये गिरिजया सार्द्धं मम लिङ्गस्य सन्निधौ रथस्थं मां दृष्ट्वा चाण्डालयोनिजोपि मानवो ब्रह्महत्यादिपातकेभ्यो विमुच्यते। ततः प्रभृति सा यात्रा अशोकाख्या प्रोच्यते। मदनान्तिका यात्रा यथा—विशेषतः तीर्थेश्वरसन्निधौ चैत्रशुक्लचतुर्दश्यां मदनेन हि शिवः समर्चितः। तस्य समर्चनेन नरः सर्वपापविनिर्मुक्तः सन् ध्रुवं शिवलोकं व्रजति। आषाढशुक्लाष्टम्यां श्रीरामेण पूजितं यामदग्न्यस्य सम्मतं रामेश्वरसंज्ञकं लिङ्गं सर्वफलप्रदं विद्यते। तद्यात्रया मानावानां सर्वानर्थविमर्दनपूर्वकं सर्वेप्सितफलस्य प्राप्ति र्जायते इति निश्चप्रचम्। परमेश्वरसन्निधौ कार्तिकशुक्लद्वितीयायां महाफला कामप्रदा, यात्रा प्रोक्ता। इयं सप्तमी यात्रा कथ्यते! इत्येता महाव्रताः सप्त यात्रा मया समुदीरिताः।

तस्य भरद्वाजस्य मुनेरिदं कथनं निशम्यानन्दाश्रुजलैर्युक्ता ऋषयो वने यात्रामकुर्वन्। आद्ये दिवसे ते सर्वे वाराणसीं पुरीं ययुः। तत्र जाह्नवीतोये विधिवत् स्नानं कृत्वा शिवलिङ्गस्य दर्शनं विधाय परमं हर्षमवापुः, पुनश्च देवदेवं महेश्वरं पूजयामासुः। द्वितीये दिवसे गङ्गां प्राप्य गङ्गाधरकरे पिण्डदानादिकमकार्षुः—

आद्ये च दिवसे सर्वे ययु र्वाराणसीं पुरीम्।
स्नात्वा च जाह्नवीतोये ददृशुर्लिङ्गमुत्तमम् ॥ ३१ ॥
द्वितीये दिवसे चैव गङ्गां प्रापु र्महीसुराः।
पिण्डदानदिकं तत्र गादाधरकरे कृतम् ॥ ३२ ॥

ततो विरजमण्डलं गत्वा वैतरणीतोये स्नात्वा कोपरूपिणं शिवं ददृशुः। ततस्ते विरजां देवीं मुक्तेश्वरं देवम् अखण्डलेश्वरं त्रिलोचनमहेश्वरं ततः पूर्वसागरगामिनीं सर्वपापक्षयकारीं ब्राह्मीं नदीं प्रापुः। तत्र ते स्नानादिकं कृत्यं विधाय परमप्रीता अजायन्त। तृतीये दिवसे एकाम्रकं वनं ययुः। तत्र गत्वा पुनीतान् आश्रमान् विलोक्य प्रसन्ना सन्तः सिद्धाश्रमं समाश्रित्य परमा मुदं प्रापुः—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततो ब्राह्मीं नदीं प्रापुः पूर्वसागरगामिनीम् ।
सर्वपापक्षयकरीं स्नानं चक्रुर्द्विजोत्तमाः ॥ ३६ ॥
तृतीये दिवसे राजन्! ययुरेकाम्रकं वनम् ।

एवं पुरा वरिष्ठे पुष्करे तीर्थे धीमता भरद्वाजेन मुनिना सह ऋषीणां सम्वादो जातः। तत्र तत्तुष्ट्यर्थमुत्कलस्य देशस्य माहात्म्यमुवर्णितम्। यो हृष्टरोमा मानव उत्कलस्य माहात्म्यं शृणोति, स पुण्यां गतिमवाप्नोति। यो हि नरश्रेष्ठ इदमुत्कलोपाख्यानं पठेत्, स देवादीनां च दुर्लभं परमं स्थानं प्रयाति। ये मानवा उत्कलस्य माहात्म्यं शृण्वन्ति, ते पुण्यभाजो नरा गोसहस्रप्रदानस्य फलं लभन्ते।[1] यो नर इदं परमं पुण्यं कुरुते, तस्य नरसत्तमस्य बुद्धिर्धर्मे स्थिरा भवति, न ततोऽपि कदाचिद् विचलति[2]।

विंशतितमेऽध्याये—

अथ पुरातनधर्माणां श्रवणेन नदीनां वर्णनेन तीर्थमाहात्म्यस्य कीर्तनेन च व्यपगतकल्पषो राजा सत्यजित् परमः प्रसन्नो जातः। ततः प्रोवाच कपिलो महामुनिः–राजन्! मया पूर्वं सफलानि क्षेत्राणि कथितानि, इदानीमहं भवानीपते. भगवतो महेशस्य महितं महत्त्वं वर्णयामि तत् सावधानतयाऽवधेहि—भूपते! प्रथमं या वह्वघनाशिनी महानदी कथिता, तस्या दक्षिणे दिग्भागे तस्याः तनयास्ति, या महात्मना भृगुणा स्वतपसा समानीता। अतः सा भार्गवीति समाख्याता, या गोसहस्रफलप्रदा वर्तते[3]। तस्यास्तटे यत् शिवलिङ्गमस्ति तदपि मोक्ष-

१. उत्कलस्य च माहात्म्यं ये शृण्वन्ति महीपते!
गोसहस्रप्रदानस्य ते नराः फलमाप्नुयुः ॥ ४३ ॥
२. यस्त्विदं परमं पुण्यं करोति नरसत्तमः।
तस्य धर्मे स्थिरा बुद्धि र्न चलेत्तु कदाचन ॥ ४४ ॥
३. कथिता या पुरा राजन्! वह्वघघ्नी महानदी।
तस्यास्तु तनयाऽख्याता दक्षिणे दक्षिणागमाः ॥ ३ ॥
सा नदी भृगुणाऽऽनीता तपसा च महात्मना।
ततः सा भार्गवी ख्याता गोसहस्रफलप्रदा ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दमुक्तमस्ति। तत्र सा भार्गवी नित्यं मोक्षदा प्रोक्ताऽस्ति। तस्यां स्नानविधिः महान् पुण्यप्रदोऽस्ति। स्नानमन्त्रं विना कृतं स्नानं विफलं भवति। तथाहि तन्मन्त्रः—

भृगुकन्ये नमस्तुभ्यं सोसहस्रफलप्रदे।
पापानि विलयं यान्तु मज्जने तव वारिणि ॥ ८ ॥

इत्युक्त्वा मज्जयेत्तस्यां तर्पयत् पितृदेवताः।
प्राप्नोति परमं स्थानमेकविंशतिपूरुषैः ॥ ९ ॥

इत्युक्त्वा तस्यां मज्जयित्वा पितृदेवताश्च तर्पयित्वा मानव एकविंशतिपुरुषैः सह परमं स्थानं प्राप्नोति। ततः पूर्वस्यां दिशि पूर्वसागरगामिनी तस्यास्तनया पुष्यभद्रेति नाम्ना विश्रुतास्ति। कार्तिके तस्यां स्नानं सर्वकामफलप्रदं भवति तथा माघे आषाढे फाल्गुने च विशेषफलमुपजायते।

या पुष्पभद्रा नदी सा कृष्णा समाख्याता, यस्या निर्मलं जलं पितृदेवता अपि वाञ्छन्ति। तस्या अन्या दुहिता मुनय दधिनादेति नाम्ना समाख्याता, या तापसेन दधीचिना ऋषिणा एकाम्रवनसन्निधौ समानीता। तस्या जले स्नानमात्रेण नरः सोमलोकं व्रजति। तत्रैव व्योमकेशस्य लिङ्गं दृश्यते। तस्यास्तटे प्रयत्नेन स्नानं समाचरेत्। अन्यस्नानाच्छतगुणं पुण्यमत्र सहस्रगुणितं भवति। तस्यां स्नानकर्ता नरसत्तमोऽमितं कामं प्राप्नोति। इतः परं प्राची गुप्तसरस्वती नदी विद्यते, यया कालाग्निना दग्धं सचराचरं रक्षितम्। एकाम्रकाननात् पूर्वे योजनान्ते प्राचीति नाम्ना विख्याता गुप्तसरस्वती सरित् विद्यते। महेशस्य प्राच्यां दिशि, यत्र सागरसंगमो वर्तते। तत्र तटे क्रोशे क्रोशे लिङ्गं वरीवर्ति। ततः प्राची सरस्वती वर्तते, तस्यां स्नात्वा सप्तविंशतिपुरुषैः साकं पापविनिर्मुक्तो नरो ज्योतिर्लिङ्गं व्रजति।

एकाम्रकवनात् पूर्वस्यां दिशि योजनपरिमिते भूभागे लोकविख्यता सर्वपुण्यप्रदा मान्या वैकुण्ठभवनप्रदा साक्षात् प्राची सरस्वती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सरिद्विद्यते। सर्वत्र शुभसञ्चारे विद्वज्जनसुसेविते तस्यास्तटे क्रोशे क्रोशे मनोरमानि लिङ्गानि वर्तन्ते[1]।

तत्रैव विघ्नमूलाश्रितो विघ्नेश्वरो नाम हरो विराजते, तस्य दर्शनं पूजनं च विधाय मानवः शिवत्वं प्राप्नोति। विघ्नशाखिनः कल्पवृक्षसमस्य तस्य प्रदक्षिणं कृत्वा मनुष्यो ब्रह्महत्यादोषाद्विमुच्यते। तत्र महापुण्यप्रदायकं त्रिवेणीसङ्गमो विद्यते। यत्र माघमासे स्नानं प्रकीर्तितं विशेषतोऽमावस्यायां स्नानेन महत्फलं प्रजायते। तत्र तदा स्नानं, सन्ध्या, तपः, दानं च अक्षयं समीरितम्।[2] तत्र प्राच्यां पाण्डवतीर्थे विधानतः स्नानं कृत्वा नरः स्वार्जितपापक्षयं विधाय शिवसालोक्यतां व्रजति। तस्यास्तटेऽमरेश्वरं नाम महत् लिङ्गं वर्तते। अमरेश्वरस्य दर्शनं कृत्वा नरो न पुनर्भवं समागच्छति। तस्यास्तटे कपिलेश्वरसंज्ञको महेशो वर्तते। सर्वपापहरः स देवो मया पूर्वं पूजितोऽस्ति। एवं तत्र तटे वहुविधानि सुपुण्यानि लिङ्गानि विद्यन्ते। अतस्तस्याः प्राच्या गुणान् वक्तुं को नरः शक्तोऽस्ति। अतस्तत्प्रसङ्गात् मया संक्षेपतस्तस्य वर्णनं कृतम्। एवं कपिलोक्तं सर्वं निशम्य स सत्यजिन्नृपतिः उत्कलस्य माहात्म्यश्रवणानन्तरं पुन र्ज्ञानयोगमाख्यातुं संप्रार्थयत्।

एकत्रिंशतितमेऽध्याये—

हे अवनीश्वर! यदि ते श्रद्धा वर्तते तर्हि सावधानतया शृणु, अहमिदानी परं गुह्यं ज्ञानयोगं कथयामि। मया हि पुरा नन्दिकेशवर-

---

१. एकाम्रकाननात् पूर्वे योजनान्ते महीपते!
नाम्ना प्राचीति विख्याता सरिदारते सरस्वती॥ १८॥
प्राच्यां दिशि महेशस्य यत्र सागरसङ्गमः।
क्रोशे क्रोशे तटे लिङ्गं ततः प्राची सरस्वती॥ १९॥

२. त्रिवेणीसङ्गमं तत्र महापुण्यप्रदायकम्।
तत्र स्नानं महीपाल! माघमासे प्रकीर्तितम्॥
विशेषेण प्रवक्ष्यामि अमावस्याफलं महत्।
स्नानं सन्ध्या तपो दानाक्षयं तु समीरितम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संवादे देवदेवेन शम्भुना वर्णितो ज्ञानयोगः श्रुत.। इदानी महं त्वदर्थं भूयो ब्रवीमि, सावधानो भूत्वा आकर्णय—

नमस्ते पार्वतीनाथ ! भक्तानां करुणाकर !
कथं विमुच्यते जन्तुः संसारात् कर्मबन्धनात् ।। ३ ।।

इति स्ववाहनस्य नन्दिकेश्वरस्य प्रश्ने भगवान् महादेव उवाच—

यो जन्तुः कामं क्रोधं च परित्यज्य मामुपास्ते, तस्मै परां मुक्तिं प्रयच्छामीत्यत्र न कश्चन सन्देहोऽस्ति। यदा मनुष्यः काम-क्रोधौ परित्यजति, तदास्य हृदि सुप्रकाशः अधिगच्छति। पुत्रदारसमायुक्ता ये नरा आनन्दन्ति, परं हृदयस्थं नारायणं प्रभुं परं ज्योति र्न जानन्ति, ये च नराधमाः मदेन मोहिता अनर्थान् क्रीडन्ति, तेषां निरये वासो भवतीति सत्यं वदामि। तस्मात् हे नन्दिकेश्वर ! त्वं कामं, क्रोधं, मदं, मोहं, मात्सर्यं, हिंसां, पैशुन्यं, अहङ्कारम्, लोभं च परित्यज। यः मनोवाक्कायकर्मभिः सङ्कल्पं त्यजति, स हरिनामजपेन नूनं भवाब्धिं संतरति।[1]

यथा हरि र्जगन्नाथस्तथाहमपि जगतां नाथोऽस्मि। व्योम्नि वायोरिव आवयोः किमपि अन्तरं नास्ति। अतः सर्वदा हरिनाम संकीर्तनीयम्—

हरिर्यथा जगन्नाथस्तथाहं जगतां पतिः।
आवयोरन्तरं नास्ति आकाशे पवनं यथा ।। ११ ।।
हरे र्नाम हरे र्नाम कीर्तयस्व निरन्तरम्।
ददाति परमां मुक्तिं सायुज्यां नात्र संशयः ।। १२ ।।

अतः तस्मिन् त्रैलोक्यनायके हरौ विश्वासः क्रियताम्, यस्य मायासमाविष्टो ब्रह्मा सर्वदा भ्रमति, तस्मिन् जगदुपरि वर्तमाने वातस्वरूपिणि मयि गोविन्दे दृढां भक्तिं कुरु ! हे पुत्रक ! एवं कृते दृढबन्धनाद् नूनं विमोक्ष्यसे। अतः शङ्करो नीलकण्ठश्च श्रीधरो नीलविग्रहः

---

१. कर्मणा मनसा वाचा सङ्कल्पं त्यजते तु यः।
हरिनामजपेनैव भवाब्धिं तरते तु सः ।। ९ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गरीशोऽपि गोपिकाकान्तः एकचेतसा ध्यायताम्। माधवस्य, उमाधवस्य च (हरिहरयोः) भेदो न वर्तते, परं शास्त्ररहस्यानभिज्ञा मूढा तयोः भेदमाकलयन्ति। अतस्ते नूनं रौरवे नरके पतन्ति। एवमुक्त्वा शम्भुः तुष्णीं बभूव, ततो नन्दी च वैष्णवानां चिह्नानि श्रोतुकामनया पुनरभाषत—भगवन्नहं वैष्णवानां लक्षणं ज्ञातुमिच्छामि। अतः कृपया प्रबोधय। तदा भगवान् महादेवो वैष्णवलक्षणं वक्तुमुपाक्रमत[1]—

एवं वैष्णवचिह्नानि यस्य सन्ति स वैष्णवः।
अन्ये ये दाम्भिका लुब्धाः तेषां लिङ्गं न कारणम्॥ २६॥

इत्युक्त्वा—भगवान् शम्भुः गौरीक्रीडागृहान्तरं प्रविवेश, तत्प्रतिहारी नन्दी च दण्डं गृहीत्वा तत्रैवावतस्थे[2]। एवं देवदेवेन साकं नन्दिकेश्वरस्य संवादः पुण्यः सर्वशान्तिकरो गुह्यश्च वर्तते। अवैष्णवे संशयात्मने देवब्राह्मणनन्दिके ज्ञानयोगोऽयं न वाच्यः। यः पुण्यात्मा मानवः इमं परमं गुह्यं ज्ञानयोगं भक्त्या पठति, शृणोति वा स शान्तिमधिगच्छतीतिशम्।[3]

******

गुरुपूर्णिमा
२०३४

विदुषामाश्रवः
विजयशङ्करतिवारी

---

१. शङ्खचक्राङ्कितं देहं तुलसीदामभूषितम्।
कामक्रोधपरित्यक्तं चिह्नं वैष्णवसंज्ञकम्॥ २०॥
एषां कौपीनके श्रद्धा मुखे च मधुरं वचः।
सर्वदानन्दहृदयं चिह्नं वैष्णवसंज्ञकम्॥ २१॥
सतां संप्रीतिजननं चिह्नं वैष्णवलक्षणम्।
एवं वैष्णवचिह्नानि यस्य सन्ति स वैष्णवः॥ २२॥

२. इत्युक्त्वा भगवान् शम्भुः गौरीक्रीडागुहान्तरम्।
प्रतिहारी त्वसौ नन्दीं तत्रास्ते धृतदण्डकः॥ २७॥

३. य इदं परमं गुह्यं ज्ञानयोगं पठेन्नरः।
शृणुयादपि यो भक्त्या स शान्तिमधिगच्छति॥ ३०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कपिलपुराणस्य विषयसूची

१. प्रथमाध्याये—सत्यजित्कपिलसम्वादे उत्कलस्य सर्वश्रेष्ठत्ववर्णनम्, ओड्रदेशस्य महत्त्वप्रतिपादनम् , पुष्करे तपस्तपतामृषीणां जन्मसाफल्यकथनञ्च।

२. द्वितीयाध्याये—महेन्द्रपर्वते वर्तमानस्य पुलहपुत्रस्य सुकान्तिनाम्नो ब्राह्मणस्य जनकं प्रति तपस्तप्तुं स्थलनिर्देशप्रश्नः। विन्ध्यपर्वते तपस्यासमये जलाभावमालोक्य तदर्थं गङ्गां प्रति तत्र तदवतारस्याभ्यर्थनप्रतिपादनम् ।

३. तृतीयाध्याये—पुरुषोत्तमक्षेत्रे नीलाचले राज्ञ इन्द्रद्युम्नस्य तपोऽर्थं गमनं तेन भीतस्य सूर्यपुत्रस्य यमस्य वसुदेवसमीपमुपस्थाय तत्सूचनदानम् ।

४. चतुर्थाध्याये—राज्ञ इन्द्रद्युम्नस्य स्वप्ने जगन्नाथदर्शनं, नारदद्वारा महोदधिजले दारुण उत्प्लवनस्य सूचनं तदादाय विश्वकर्मद्वारा कृष्ण-बलभद्र-सुभद्रा-सुदर्शनमूर्त्तीनां निर्माणं ब्रह्मद्वारा च तत्स्थापनादिवर्णनम् ।

५. पञ्चमाध्याये—महोदधौ स्नात्वा रथे पुरुषोत्तमं दृष्ट्वा ब्रह्महत्यादि-पापान्मुक्तिवर्णनम्, तत्रानेकलिङ्गसविधे ईषदपि कृतं बहु स्यादिति प्रतिपादनम्, देवादीनां दुर्लभस्य तत्स्थानस्य महत्त्वकथनञ्च ।

६. षष्ठाध्याये—जाम्वतीसूनोः शाम्बस्य शरीरे कुष्टप्राप्तिः, भगवतो भास्करस्याराधनया ततो मुक्तिवर्णनम् । मैत्रेयवनस्य विस्तरतो महिमवर्णनञ्च ।

७. सप्तमाध्याये—विरजःक्षेत्रे कपिलतीर्थस्नानेन गोलोकजन्यफलप्राप्ति-वर्णनम्, राज्ञो मान्धातुर्वसिष्ठेसमीपे गमनं तेन साकं कलपाम्वुतीर्थे गत्वा तत्र पतिव्रतासर्पिणी शापात्प्राप्तशृगालयोनितो मुक्तिवर्णनम् ।

८. अष्टमाध्याये—अनेकेषां गुह्यानां तीर्थानां महत्त्ववर्णनं मृत्युञ्जयतीर्थे, यत्र मार्कण्डेयमुनिर्मृत्युं जिगाय, तस्य विरजाख्यस्य क्षेत्रस्य गुणान् वक्तुं सहस्रफणं शेषनागं विना न कोऽपि पुमान् भवितुमर्हति समर्थे इतिकथनम् ।

९. नवमाध्याये—कैलाशे भगवतः शिवस्य निरन्तरं निवासवर्णनम्, तत्र पयोऽमृते तीर्थे सूर्यवंशेसमुत्पन्नस्य नृपतेः सौदासस्य मुक्तिकथनपूर्वकं कैलाश-पर्वतस्या पूर्वं वैशिष्ट्यवर्णनम् ।

१०. दशमाध्याये—गन्धवत्या नद्या उर्मिभिः शीतले एकाम्रके हरिहरा-त्मके क्षेत्रे पाषाणनीलया शम्भोः स्थितिवर्णनम् । अतो मुक्त्यर्थं तत् प्रसिद्धम् ।

११. एकादशाध्याये—भगवान् विश्वनाथो वाराणसीं विहाय एकाम्रके निवसतीति तदत्यन्तं श्रेयस्करम् । तत्र नन्दिकेश्वरेण सह गमनवर्णनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१२. द्वादशाध्याये—सर्वतीर्थविशिष्टे विन्दुसरोवरे पादहराया देव्या दर्शनेन मनुष्यस्य कामगेन विमानेन वैष्णवपदप्राप्तिनिरूपणप्रदर्शनम् ।

१३. त्रयोदशाध्याये—एकाम्रके निवासेन निर्मलमनसः पुंसः कर्णे विश्वनाथस्तारकमुपदिशति । ईशनैवेद्यं भक्षणमावश्यकं प्रोक्तम् । असुरैः पराजितस्य शक्रस्य तिक्तशाकवृक्षतले तपसा मन्त्रजपेन च पुनर्मनोरथसाफल्यवर्णनम् ।

१४. चतुर्दशाध्याये—प्रलयकालेऽपि एकाम्रं न विनश्यतीति वैकुण्ठं विहाय मधुसूदनस्य निवासवर्णनम्, तत्रानेकेषां लिङ्गानां संख्या वक्तुमशक्या ।

१५. पञ्चदशाध्याये—एकाम्रके श्रीरामेण स्थापितस्य रामेश्वरलिङ्गस्य दर्शनेन मनोरथसिद्धिः, सिद्धेश्वरस्य समाराधनेन सकलकामनावाप्ति वर्णनम् । शक्रस्य यज्ञे असुराणामुपद्रवेण शङ्कराधनात्पुनः स्वपदप्राप्तिः ।

१६. षोडशाध्याये—एकाम्नके केदारेश्वरस्य दर्शनेन नहुषस्य राज्यप्राप्तिः, विन्दूद्भवे तनुत्यागान्न पुनर्जन्म । दाक्षायण्या वह्निप्रवेशः, दक्षयज्ञविध्वंसः । पुनर्हिमालये तस्या जन्म, शिवाराधने विघ्नकारिणः कन्दर्पस्य दाहादिवर्णनम् ।

१७. सप्तदशाध्याये—त्रिदिवं गते सप्तर्षौ गङ्गां प्रति गन्धवतीनदी प्रोवाच—गङ्गे ! त्वं पूर्वं नवधा प्रोक्ता, इदानीं दशधा भव । इहैकाम्रके त्वयि नितरां सन्तुष्टाऽस्मीति गन्धवतीमाहात्म्यवर्णनम् ।

१८. अष्टदशाध्याये—दुष्टस्य दुर्भिलस्य पुत्राभ्यां कीर्तिवासाभ्यां स्वशरीरदानाय प्रोक्ता देवी प्रोवाच—असुरराज ! यमराजो मम चरणौ स्वहृदये कृत्वा तिष्ठति । तया सव्येन पादेन स्फटिकामलपृष्ठे निहतौ तौ द्वावसुरौ । ततः चातुर्मासस्य व्रतस्य विधानकथनम् ।

१९. एकोनविंशाध्याये—एकाम्रके वने शिवस्य यात्रया ब्रह्महत्यादिपापनिवृत्तिविषये तत्तन्मासेषु यात्राणां विवरणपूर्वकं वर्णनम् ।

. विंशत्याध्याये—अनेकेषां तीर्थानामाश्रमणां च वर्णनानन्तरं महानद्यास्तनयायां भार्गवीनद्यां स्नानेन एकविंशतिकुलस्योद्धारदि वर्णनम् ।

२१ एकविंशत्याध्याये—महादेव-नन्दिकेश्वरसंवादे ज्ञानयोगस्य सांसारिककर्मबन्धनान्मुक्तिवर्णनम्, जगदुपरि गोविन्दे दृढभक्त्या भवबन्धनविमुक्तिः । माधवे उमामाधवे च भेदकरणाद् रौरवनरके पातः, वैष्णवचिह्नवर्णनं श्रद्धया ज्ञानयोगं शृण्वन् मनुष्यः शान्तिमधिगच्छतीत्यलं पल्लवितेन ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

॥ सुरभारती विजयतेतराम् ॥

कपिलपुराणम्

(समीक्षात्मकं संस्करणम्)

अथ प्रथमोऽध्यायः

पान्तु वो जलदश्यामाः शार्ङ्गज्याघातकर्कशाः ।
त्रैलोक्यमण्डपस्तम्भाश्चत्वारो हरिबाहवः ॥ १ ॥

शल्यजिदुवाच

मया श्रुतानि क्षेत्राणि पुण्यान्यघहराणि च ।
इदानीं श्रोतुमिच्छामि क्षेत्राण्युत्कलदेशके ॥ २ ॥
तेषु क्षेत्रेषु यत् पुण्यं यत्तीर्थं याश्च देवताः ।
यदाश्रयं च मान्यांस्तान् सर्वान् त्वं कथय स्वयम् ॥ ३ ॥
त्वत्प्रसादाद् भविष्यामि कृतार्थोऽहं महामुने !
सर्वाभिर्देवताभिस्त्वं वन्द्यः पूज्यतमः प्रभो ॥ ४ ॥
त्वं हि सर्वाणि जानासि पुराणाष्टदशानि च ।
सर्वशास्त्राणि जानासि सर्वज्ञस्त्वं महामुने ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कपिल उवाच

कथयामि रहस्यं त्वां शृणुष्वैकमना नृप !
येषां स्मरणमात्रेण कल्मषा यान्ति वै क्षयम् ॥ ६ ॥

वर्षाणां भारतं श्रेष्ठं देशानामुत्कलः स्मृतः ।
उत्कलेन समो देशो देशो नास्ति महीतले ॥ ७ ॥

अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
ऋषीणां चैव सम्वादं भारद्वाजेन धीमता ॥ ८ ॥

पुष्करे च वने पुण्ये तिष्ठन्तो मुनिपुङ्गवाः ।
भरद्वाजमिदं प्रोचुस्ते सर्वे च हतांहसः ॥ ९ ॥

ऋषय ऊचुः

यस्मिन् पुण्यवने विद्वन्! यत् पुण्यं समुदाहृतम् ।
पापानां चैव यद् भोग्यं तत् सर्वं कथयस्व नः ॥ १० ॥

भरद्वाज उवाच

अस्मिन् पुण्यवने विप्रा ये वसन्ति नरोत्तमाः ।
तेषां भाग्यं महज् जन्म सफलं गीयते द्विजैः ॥ ११ ॥

पुष्करेऽस्मिन् वने विप्रा येऽर्चयन्ति जनार्दनम् ।
सर्वपापक्षयं कृत्वा हरेः पदमवाप्नुयुः ॥ १२ ॥

अत्र ये स्थातुमिच्छन्ति वीतरागा विकल्मषाः ।
तेषां भाग्यवतां पित्रोः सफलं जीवनं श्रुतम् ॥ १३ ॥

येऽत्र दानं द्विजातिभ्यः प्रयच्छन्ति सुभक्तितः ।
ते स्वर्गलोकमासाद्य न त्यजन्ति कदाचन ॥ १४ ॥

स्वल्पपुण्यं बहुतरं भवत्यत्र तपोधनाः ।
देवताः स्थातुमिच्छन्ति अन्येषां का कथा द्विजाः ॥ १५ ॥

स्वपन्त्यत्र तु ये ते वै प्रणमन्ति जनार्दनम् ।
भोजनं कुर्वते येऽत्र ये यजन्ति महेश्वरम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमादिगुणाश्चास्य पुष्करस्य तपोधनाः ।
अत्र प्राणान् परित्यज्य गताः स्वर्गं नरोत्तमाः ॥ १७ ॥
एतत् पुण्यतमं तीर्थं वनानामुत्तमं श्रुतम् ।
देवताभिः समाजुष्टं पुण्यतीर्थैरभिष्टुतम् ॥ १८ ॥
वकुलैश्चम्पकै र्वृक्षै र्दाडिमैरतिशोभितैः ।
अशोकैश्चैव पुन्नागैः कर्णिकारैश्च पाटलैः ॥ १९ ॥
पूगैः पानसकै र्वृक्षै र्नारिकेलैश्च खर्जुरैः ।
साल-ताल-तमालैश्च वटैरश्वत्थकैस्तथा ॥ २० ॥
एवं नानाविधैर्वृक्षैः पूरितं तत् समन्ततः ।
मल्लीजातीसमायुक्तं कुन्दपुष्पैस्तु शोभितम् ॥ २१ ॥
तुलसीदलकै र्युक्तं पवित्रं पापनाशनम् ।
अत्र पापं तु कुर्वन्ति ये नरा मोहसंयुताः ॥ २२ ॥
न तेषां तु पुनर्जन्म भवेद् वै भारतोत्तमे ।
अणुमात्रमयं चात्र भवेद् वै पर्वतोपमम् ॥ २३ ॥
अत्र प्रतिग्रहं घोरं हालाहलविषोपमम् ।
अन्य क्षेत्रेषु यत् पुण्यं तदप्यत्र क्षयं भवेत् ॥ २४ ॥
ईषत् पापं भवेच्चात्र मेरुतुल्यं महीसुराः ।
एतस्मात् कारणाद् विप्रा यदिच्छथ परां गतिम् ॥ २५ ॥
पापानि च परित्यज्य पुण्यं तत्र समाचर ।
इति तस्य वचः श्रुत्वा मुनयः पुण्यलालसाः ॥ २६ ॥
ऊचुस्ते घनगम्भीरं भारद्वाजं महद् वचः ।

ऋषय ऊचुः

दुष्करं तत्र पुण्यं वै भारद्वाज ! महामते ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापं पुण्यतमं यत्र तत् स्थानं वद नः प्रभो !

भरद्वाज उवाच

इममर्थं मया पृष्टः कुशकेतुः पुरा द्विजाः ॥ २८ ॥
स यदाह शृणुध्वं तद् भवपापविमोचनम् ।
देशानां प्रवरो ह्येक ओड्रदेशोऽतिविश्रुतः ॥ २९ ॥
पुण्यायन्ते च पापानि तत्र देशे परन्तपाः ।
पुण्यक्षेत्राणि तीर्थानि तत्र सन्ति महर्षयः ॥ ३० ॥
अल्पपुण्यं बहुतरं भवेत्तत्र न संशयः ।
तस्मात् क्षेत्रमिदं विप्राः सेवनीयं प्रयत्नतः ॥ ३१ ॥

इति श्रीकपिलपुराणे ऋषिप्रश्नो नाम
प्रथमोऽध्यायः ॥ १ ॥

उवाचसंख्या ६, अर्द्धश्लोकसंख्या ×, पूर्णश्लोकसंख्या च ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ द्वितीयोऽध्यायः

ऋषय ऊचुः

ओड्रदेशस्य माहात्म्यं समाख्याहि सविस्तरम् ।
यास्यामस्तं वयं देशं तिष्ठामस्तत्र देशके ॥ १ ॥

भरद्वाज उवाच

सर्वपापहरं देशमोड्रं देवैस्तु कल्पितम् ।
शृणुध्वं कथ्यमानं हि विस्तरेणास्य भो द्विजाः ॥ २ ॥
तस्मिन्नोड्रे सदा सन्ति कृष्णार्कपार्वतीहराः ।
एवमीशस्य क्षेत्रं तु सर्वपापप्रणाशनम् ॥ ३ ॥
तत्र देशे द्विजश्रेष्ठाः नदीनामुत्तमा नदी ।
महानदीति विख्याता सर्वपापापनोदिनी ॥ ४ ॥
तस्या नद्यास्तु माहात्म्यं कथयामि पुनः पुनः ।
तस्यां स्नात्वा नरश्रेष्ठो दिव्यलोकं समाप्नुयात् ॥ ५ ॥
पुरा त्रेतायुगे विप्रः सुकान्तिनामतः श्रुतः ।
ब्राह्मणः सर्वशास्त्रज्ञो नीतिज्ञः पुलहात्मजः ॥ ६ ॥
महेन्द्रे पर्वते तिष्ठन् स प्राह पितरं द्विजः ।

सुकान्तिरुवाच

एतत् स्थानं जनाकीर्णं बभूव हि ततः प्रभो ॥ ७ ॥
तपश्चर्तुं महारण्यं प्रयातुं कथयस्व माम् ।

पुलह उवाच

सर्वव्यक्तिपरित्यक्तं सर्वपक्षिसुखावहम् ॥ ८ ॥
मृगानेकैः समाकीर्णं सिद्धै र्गन्धर्वसेवितम् ।
तपसस्तु महत् स्थानं विद्वद्भिः परिकीर्तितम् ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रज त्वं सुमना भूत्वा सुफलं विन्ध्यपर्वतम् ।
पितृवाक्यमिदं श्रुत्वा सुकान्तिः सहसा ययौ ॥ १० ॥
फलदं सर्वपुण्यानां शुभदं तपसे बुधाः ।
गत्वा च दृष्टवान् स्थानं तपसे निर्जनं महत् ॥ ११ ॥
तपोऽत्र च करिष्यामि मनसेदं विचार्य्यवान् ।
तत्रादृष्ट्वा च सलिलं सलिलार्थं तपोऽकरोत् ॥ १२ ॥
आयाहि निम्नगे देवि ! सरिच्छ्रेष्ठेऽम्बुधिप्रिये !
तपोऽत्राहं करिष्यामि मयि गङ्गे ! कृपां कुरु ॥ १३ ॥
जप्त्वेदं परमं मन्त्रं सर्वसिद्धिमवाप ह ।
मन्त्रस्यास्य प्रसादेन विप्रस्य तपसस्तथा ॥ १४ ॥
सर्वपापहरा तत्र गङ्गा अवततार ह ।

गङ्गोवाच

साधु पुत्र महाभाग ! तपस् तप्तं त्वया महत् ॥ १५ ॥
त्वदर्थमाजगामाहं विन्ध्यं शैलं नगोत्तमम् ।
इदानीं स्वेच्छया विप्र ! त्वं कुरुष्व तपो महत् ॥ १६ ॥
तावदत्र तु तिष्ठामि यावत्ते तपसः फलम् ।
विन्ध्यादस्माद् गमिष्यामि पश्चाच्च पूर्वसागरम् ॥ १७ ॥
इदानीमत्र तिष्ठामि तपसेऽर्थे तवात्र च ।
देवानां दुर्लभा चाहं मनुष्याणां च का कथा ॥ १८ ॥
प्राप्ताऽहं च त्वया ब्रह्मन् ! पुलहस्य प्रभावतः ।

भरद्वाज उवाच

गङ्गाया वचनं श्रुत्वा प्रीतात्मा पुलहात्मजः ।
उवाच घनगम्भीरं वचनं जाह्नवीं द्विजाः ॥ १९ ॥
भूतनाथस्य देवस्य प्रिया त्वं चक्रपाणिनः ।
ब्रह्मणश्च प्रिया त्वं हि सर्वेषां चैव दुर्लभा ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मलोकात् पुरा जाता तस्माच्छंकरमूर्धनि ।
तस्माद् वहसि मेदिन्यां प्राणिनां हितकारणात् ॥ २१ ॥
जाह्नवीमिदमुक्त्वा तु कृताञ्जलिपुटोऽग्रतः ।
प्रपन्नो हि द्विजश्रेष्ठः स्तुतिमेनां चकार ह ॥ २२ ॥

सुकान्तिरुवाच

नमामि देवीं पापघ्नीं जाह्नवीं भक्तवत्सलाम् ।
त्रैलोक्यपावनी त्वं हि रक्ष मां शरणागतम् ॥ २३ ॥
सर्व-पाप-क्षयकरी सर्वलोकार्तिनाशिनी ।
पूज्या त्वं सर्वदेवैस्तु त्वां नतोऽस्मि पुनः पुनः ॥ २४ ॥
गिरिजानाथशिरसि स्थिता त्वं जनभाविनी ।
त्वां नतोऽस्मि स्थितां गङ्गां पितामहकमंडलौ ॥ २५ ॥
विष्णोः पादाब्जजां त्वां हि भगीरथवरप्रदाम् ।
प्रणतोऽस्मि महाभागां तारिणीं सगरात्मजान् ॥ २६ ॥
इति श्रुत्वा स्तुतिं विप्राः ! पपात धरणीतले ।
अथ गङ्गा महापुण्या दृष्ट्वा भक्तिं द्विजस्य च ॥ २७ ॥
विप्रमुत्तोलयामास बाहुभ्यां पतितां भुवि ।
मुखे तु चुम्बनं दत्वा मार्जयित्वा तनोः रजः ॥ २८ ॥
क्रोडे निवेशयामास उवाच मधुरं वचः ।

गङ्गोवाच

पुत्रस्त्वं मे महाभाग ! धर्मतो नात्र संशयः ॥ २७ ॥
तवाद्याऽपि च माताऽहं वरं वरय सुव्रत !

सुकान्तिरुवाच

यदुक्तं हि त्वया पूर्वं गन्ताऽस्मि पूर्वसागरम् ।
इदानीं गच्छ त्वं मात मर्म कीर्तिः सदास्तु वै ॥ ३० ॥
अपरं वरमिच्छामि प्रपन्नाय प्रदीयताम् ।
भवतु तत्र सम्पूर्णं तपो मे विभवार्जितम् ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गङ्गोवाच

एवमस्तु महाभाग ! तपस्ते विभवार्जितम् ।
स्वनाम्ना चात्र विख्यातिं न गन्तास्मि द्विजोत्तम ॥ ३२ ॥
महानदीति विख्यातिं गमिष्याम्यत्र सर्वदा ।
भगीरथेन चानीता यथार्थं पापनाशिनी ॥ ३३ ॥
तस्माच्छतगुणा प्रोक्ता यत्राहं दुरितापहा ।
सर्वदा तव कीर्तिस्तु स्थास्यत्यत्र महीतले ॥ ३४ ॥

भरद्वाज उवाच

इति दत्त्वा वरं तस्मै गङ्गा त्रैलोक्यपावनी ।
धृत्वाम्बुविग्रहं सा च ववाह पूर्वसागरम् ॥ ३५ ॥
महानदी महापुण्या महादेवप्रिया शुभा ।
द्वितीयं विग्रहं धृत्वा आस्ते गङ्गा तु या यया ॥ ३६ ॥
उत्कलेशं समासाद्य यावच्चित्रा महेश्वरी ।
तावच्चित्रोत्पलाख्याता सर्वपुण्यप्रदायिनी ॥ ३७ ॥
महानद्यां नरः स्नात्वा दृष्ट्वा वै पार्वतीहरम् ।
सर्वपापविनिर्मुक्तो गङ्गास्नानफलं लभेत् ॥ ३८ ॥

इति श्रीकपिलपुराणे महानदीमाहात्म्यं नाम
द्वितीयोऽध्यायः ॥ २ ॥

उवाचसंख्या ११ अर्द्धश्लोकसंख्या २ पूर्णश्लोकसंख्या च ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ तृतीयोऽध्ययः

ऋषय ऊचुः

पुरा ते कथिता विप्र ! कृष्णार्कपार्वतीहराः ।
तेषां क्षेत्रं च तीर्थं च कथयस्व यथार्थतः ॥ १ ॥

भरद्वाज उवाच

आदौ कृष्णस्य माहात्म्यं माहात्म्यं क्षेत्रतीर्थयोः ।
संक्षेपेण प्रवक्ष्यामि शृणुध्वं भो द्विजोत्तमाः ॥ २ ॥

क्षेत्रं नीलाचलं पुण्यं दारुब्रह्मस्वरूपिणः ।
अत्र क्षेत्रे त्यजन् देहं नरो वैकुण्ठमाप्नुयात् ॥ ३ ॥

नीलाचलं महापुण्यं वरदाय प्रियं महत् ।
दशयोजनविस्तीर्णम् उच्छ्रतं योजनार्द्धकम् ॥ ४ ॥

नानामुनिगणाकीर्णं विहङ्गैरुपशोभितम् ।
पादपैः सफलैर्युक्तं पुष्पै र्नाना विधैरपि ॥ ५ ॥

साक्षाद् वैकुण्ठरूपं तत् क्षेत्रं श्रीपुरुषोत्तमम् ।
क्षेत्राणामपि क्षेत्रं यत् तीर्थानामपि यद् वरम् ॥ ६ ॥

निद्रा - समाधि - सत्कर्म - परमानन्दनिर्वृतिः ।
सर्वकर्माणि धर्माणि धन्यानि पुरुषोत्तमे ॥ ७ ॥

यस्मिन् क्षेत्रे सदा सन्ति ब्रह्महत्यावतारगाः ।
जगन्नाथं च पश्यन्ति स्नात्वा तीर्थमहोदधौ ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नीलाचलवरे विप्राः पुरा नीलाश्मरूपधृक् ।
इदानीं तु जगन्नाथो भाति दारवनीलया ॥ ९ ॥

ऋषय ऊचुः

पुरा कथं भरद्वाजो देवदेवो जगत्पतिः ।
नीलाश्माङ्गस्तु नीलाद्रौ साम्प्रतं च कथं पृथक् ॥ १० ॥

भरद्वाज उवाच

संक्षेपेण प्रवक्ष्यामि तां कथां वै सनातनीम् ।
यांश्च श्रुत्वा पुन र्मोहं नैव गच्छन्ति मानवाः ॥ ११ ॥
आसीत् सत्ययुगे विप्रा इन्द्रद्युम्नो महीपतिः ।
स वै क्षीरसमुद्रेन्दुसमः शत्रुकुलान्तकः ॥ १२ ॥
देवदेवे जगन्नाथे भक्तिर्यस्य दृढा मता ।
यस्तु साक्षात् स्वयं विप्रा ब्राह्मणः पञ्चमस्तनुः ॥ १३ ॥
यदा श्रीभगवान् शंभु र्गृह्णातिस्म हिमाद्रिजाम् ।
तदा जघान सहसा ब्रह्मणः पञ्चमं शिरः ॥ १४ ॥
तदा प्रभृति भो विप्रा ! ब्रह्मा चैव चतुर्मुखः ।
छिन्नशिरा महाबाहुरिन्द्रद्युम्नेति विश्रुतः ॥ १५ ॥
यज्वा तपस्वी दान्तस्तु शान्तश्चातिथिपूजकः ।
वैष्णवः सत्यसम्पन्नो जितक्रोधो जितेन्द्रियः ॥ १६ ॥
एवमेष महीपालः चिन्तयामास चेतसि ।
विष्णुं जिष्णुं चतुर्बाहुं लोचनाभ्यां पिवाम्यहम् ॥ १७ ॥
इत्थं चिन्तयतस्तस्य महीपालस्य भो द्विजाः ।
स्वप्ने तु दर्शनं दत्त्वा विष्णुश्चेदं वचोऽब्रवीत् ॥ १८ ॥

श्रीभगवान् उवाच

इन्द्रद्युम्न महीपाल ! श्रृणु मद्वचनं हितम् ।
यच्छ्रुत्वा त्वं पुनर्मोहं नैव यास्यसि सुव्रत ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लवणस्योदधेस्तीरे बालुकाभिः समावृते ।
तत्र नीलाचलं क्षेत्रं मम तिष्ठति मुक्तिदम् ॥ २० ॥

रहस्यं दुर्लभं स्थानं स्थलं ब्रह्मादिदुर्लभम् ।
योगिनो वीतरागाश्च न जानन्ति मम स्थलम् ॥ २१ ॥

गोप्यं पुण्यप्रदं क्षेत्रं मत्पूज्यं पुरुषोत्तमम् ।
प्रलये च महीपाल ! नष्टे स्थावरजङ्गमे ॥ २२ ॥

विश्वेऽस्मिन् दुःखिते चैव कारुण्यकजलाप्लुते ।
महत्क्षेत्राणि पुण्यानि तीर्थान्यायतनानि च ॥ २३ ॥

आश्रमाणि च रम्याणि वैकुण्ठक्षीरसागरम् ।
एतानि संपरित्यज्य सुस्थानानि महीपते ॥ २४ ॥

वटपत्रपुटस्थोऽहमस्मि श्रीपुरुषोत्तमे ।
तत्र गच्छ महीपाल ! प्रयत्नेन सुसंयतः ॥ २५ ॥
द्रक्ष्यते त्वं तपस्तप्त्वा इन्द्रनीलतनुं हि माम् ॥ २६ ॥

रोहिण्याख्यं महत्तीर्थं मत्पार्श्वे चैव तिष्ठति ।
तत्र भक्त्या नरः स्नात्वा मद्देहे लीयते ध्रुवम् ॥ २७ ॥

एवं निगदिते तस्मिन् केशवे केशिसूदने ।
इन्द्रद्युम्नस्य राजर्षेः स्वयं निद्रा बभंज ह ॥ २८ ॥

ततः सुप्तोत्थितो राजा न दृष्ट्वा श्यामसुन्दरम् ।
रुरोद भृशदुःखार्तः कृष्ण ! कृष्णेति कीर्तयन् ॥ २९ ॥

देवानां ब्राह्मणानां च किं मयापकृतं कृतम् ।
पश्यतो मे गतः कुत्र घनश्यामो निरञ्जनः ॥ ३० ॥

जलार्थमागता गावः किं मे नियमिताः पुरा ।
पश्यतो मे गतः कुत्र शङ्खचक्रधरो हरिः ॥ ३१ ॥

चूतनिम्बकदम्बाद्याः पादपाश्छादिता मया ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्यतो मे गतः कुत्र पीतवासा गदाधरः ॥ ३२ ॥
वैश्वदेवस्य वेलायां नार्चितश्चातिथिर्मया ।
पश्यतो मे देवदेवो गतः कुत्र जगत्पतिः ॥ ३३ ॥
परनिन्दा कृता किं मे वस्त्रं चापि हृतं मया ।
पश्यतो मे गतः कुत्र सिन्धुजारतिदायकः ॥ ३४ ॥
मया हता ब्राह्मणाश्च गावः किं वा सहस्रशः ।
पश्यतो मे गतः कुत्र शंकरार्द्धशरीरकः ॥ ३५ ॥
किं मे न रक्षिताः शीघ्रं प्रजा दुःखपरिप्लुताः ।
पश्यतो मे गतः कुत्र राघवो रावणान्तकः ॥ ३६ ॥
किं मे लोष्ठं तृणं काष्ठं क्षिप्तं कूपे जलाशये ।
पश्यतो मे गतः कुत्र तेन पापेन केशिहा ॥ ३७ ॥
सभ्याः किं नार्चिताः काले तर्पणं न कृतं मया ।
पश्यतो मे गतः कुत्र गोपिकानन्दवर्द्धनः ॥ ३८ ॥
इत्थं विलपतस्तस्य इन्द्रद्युम्नस्य धीमतः ।
आययु र्मन्त्रिणः पौरा श्रीमन्तश्च पुरोहिताः ॥ ३९ ॥
ते दृष्ट्वा रोदनं तस्य इन्द्रद्युम्नस्य भूपतेः ।
प्रोचुरित्थं वचः सर्वे भृशं दुःखितमानसाः ॥ ४१ ॥

मन्त्रिण ऊचुः

महीपते ! महाबाहो ! किमर्थं रुदितं त्वया ।
कथयस्व यथार्थं नः साधयामो न संशयः ॥ ४२ ॥
इत्थमाराधितो भूयो मन्त्रिभिश्च पुरोहितैः ।
तानुवाच प्रयत्नेन हर्षगद्गदया गिरा ॥ ४३ ॥

इन्द्रद्युम्न उवाच

स्वप्ने दृष्टो जगन्नाथः शङ्खचक्रगदाधरः ।
वनमाली पीतवासा घनश्यामो रमापतिः ॥ ४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स उवाच हृषीकेशो मां स्वप्नपापकारिणम् ।
गच्छ भूप ! तपस्तप्त्वा द्रक्ष्यसे नीलपर्वते ॥ ४५ ॥
इदानीं च गमिष्यामि नीलाद्रिं निर्मलप्रदम् ।
कुरुध्वं मन्त्रिणोऽदीर्घं संभारं मम सम्मतम् ॥ ४६ ॥
स्वीकृत्य सर्वपौराश्च मन्त्रिणश्च पुरोहिताः ।
आविवेश ततो राजा ययुः स्वं स्वं पुरं ततः ॥ ४६ ॥

भरद्वाज उवाच

एतस्मिन्नन्तरे विप्रा यमस्तु रविनन्दनः ।
तत्क्षणे हृतकामस्तु नीलपर्वतमाविशत् ॥ ४८ ॥
दुःखितो यमुनाभ्राता वेपमानः पुनः पुनः ।
स्थित्वाग्रे वासुदेवस्य वाक्यमेतदुवाच ह ॥ ४९ ॥

यम उवाच

नमोऽस्तु विष्णवे तुभ्यं सर्वलोकहितात्मने ।
रजस्तमोविमुक्तस्त्वं स्वप्रकाश ! नमोऽस्तु ते ॥ ५० ॥
सृष्टोऽहं प्रेतराजस्ते देवदेव ! जगत्पते ।
किं करोमि महाबाहो ! त्वं वै दीनार्तनाशनः ॥ ५१ ॥

श्रीभगवान् उवाच

किं ते दुःखं समुत्पन्नं कथयस्व ममाग्रतः ।
तं दुःखं छेदयिष्यामि सत्यं च रविनन्दन ॥ ५२ ॥

यम उवाच

कृतं देव ! त्वया सत्यम् इदानीं कथयाम्यहम् ।
तत् कुरुष्व महाबाहो ! शृणुष्व मधुसूदन ॥ ५३ ॥
इन्द्रद्युम्नस्तु नृपतिरागच्छति बलान्वितः ।
मुक्तिं यास्यन्ति ते सर्वे किं करोमि वद प्रभो ! ॥ ५३ ॥
परित्यज्य जगन्नाथं नीलेन्द्रानिलाङ्गगम् ।
पातालं यातु तत्तीर्थं रोहियाख्यं च केशव ॥ ५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्मिन् स्नात्वा महाबाहो ! काको मुक्तिमवाप ह।
यद् रूपं च समालोक्य शवोऽपि चाजरामरः ॥ ५६ ॥

श्रीभगवान् उवाच

सत्यमुक्तं त्वया पूर्वमिदानीं किं करोम्यहम् ।
यदुक्तं ते वचः सर्वम् एवं भवतु भास्करे ॥ ५७ ॥
विश्वकर्मा ततः शीघ्रं प्रतिमात्रयमकल्पयत् ।

भरद्वाज उवाच

आज्ञां प्राप्य जगन्नाथात् स्वगृहं भास्करिर्ययौ ।
देवदेवोऽपि भगवान्नास्ते नीलाचले शुभे ॥ ५८ ॥

इति श्रीकपिलपुराणे यमवरदानं नाम
तृतीयोऽध्यायः ॥ ३ ॥

उवाच संख्या १२, अर्द्धश्लोकसंख्या २, पूर्णं श्लोकसंख्या च ५८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ चतुर्थोऽध्यायः

नीलशैले जगन्नाथं मन्त्रिभिः सह भूमिपः ।
पुरोहितैः पुराणज्ञैः प्रजाभिश्चैव वारणैः ॥ १ ॥
गच्छन् मार्गे ददर्शाथ वनैकाग्रे शिरोत्तमम् ।
पूजयित्वा च ते नत्वा गतवान् नीलपर्वतम् ॥ २ ॥
स्वर्णकूटात् परं नीलशैलो हि भुवि राजते ।
एत्य तत्र ददर्शासौ शङ्खचक्रगदाधरम् ॥ ३ ॥
समीपं तस्य संप्राप्य राजासौ दीनमानसः ।
करं संपुटिकां बद्ध्वा नारदं पर्यपृच्छत् ॥ ४ ॥

इन्द्रद्युम्न उवाच

स्फुरते दक्षिणं चक्षु र्वामाङ्गं तु प्रकम्पते ।
ममैतत् कारणं ब्रूहि त्रिकालज्ञस्त्वमेव हि ॥ ५ ॥

नारद उवाच

इन्द्रद्युम्न महाबाहो ! इन्द्रनीलतनुर्हरिः ।
पातालं गतवानद्य रोहिण्याख्यं गतस्तथा ॥ ६ ॥
इन्द्रद्युम्नस्तु तच्छ्रुत्वा वज्रपातसमं वचः ।
पपात धरणीपृष्ठे गिरेः शृङ्गमिवापरम् ॥ ७ ॥
तं दृष्ट्वा दुःखिताः सर्वे मन्त्रिणश्च पुरोहिताः ।
शीघ्रमुन्नामयामासु र्नृपतिं पतितं भुवि ॥ ८ ॥
एतस्मिन्नन्तरे विप्राः ! नारदो मुनिपुङ्गवः ।
उवाच वचनं रम्यं राजानं दीनमानसम् ॥ ९ ॥

नारद उवाच

ब्रह्मणा प्रेषितोऽहं च तवान्ते नात्र संशयः ।
इदानीं तु जगन्नाथः पुनस्स्थानं करिष्यति ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्ते नारदेनैव चक्रुः कोलाहलं जनाः ।
शङ्खचक्राङ्किततनु दीरुरुत्प्लवते द्विजाः ॥ ११ ॥
जनानां तद् वचः श्रुत्वा स नृपो हर्षमानसः ।
तपोधनं करे धृत्वा कृताञ्जलिपुटोऽग्रतः ॥ १२ ॥

राजोवाच

नमस्ते ब्रह्मणे तुभ्यं बल्लकीपाणये नमः ।
गत्वा दृष्ट्वा समानीतो दारू राजा जनैः सह ॥ १३ ॥
वलभद्रो जगन्नाथः सुभद्रा च सुदर्शनम् ॥ १४ ॥
वनमाली पीतवासाः शङ्खचक्रधरो हरिः ।
हलपाणिः गदापाणिः र्बलभद्रो बलान्वितः ॥ १५ ॥
सुभद्रा पद्महस्ता च स्तम्भरूपं सुदर्शनम् ।
एताश्च प्रतिमाः कृत्वा स्थापयित्वात्र मण्डपे ॥ १६ ॥
ब्रह्मलोकं महाबाहुः प्रतिष्ठार्थं समाययौ ।
गत्वा च दृष्टवांस्तत्र ब्रह्मा हि कुशलाञ्छनम् ॥ १७ ॥
उवाच वचनं नत्वा कृताञ्जलिपुटोऽग्रतः ।
नमस्ते ब्रह्मणे तुभ्यं प्रजानां पतये नमः ।
त्राहि मां करुणागार ! पूरयस्व मनोरथम् ॥ १८ ॥

ब्रह्मोवाच

साधु पुत्र महाबाहो ! वैष्णवस्त्वादृशो भुवि ।
नातीतो वर्तमानश्च न भविष्यति मे मतिः ॥ १९ ॥
अधुनाऽहं गमिष्यामि तवार्थं चक्रपाणिनः ।
प्रतिष्ठां च करिष्यामि गच्छ शीघ्रं महीपते ॥ २० ॥

भरद्वाज उवाच

ब्रह्मणो वचनं श्रुत्वा राजा हृष्टमना भवत् ।
ब्रह्मलोकात् परिभ्रष्टो भूमिलोकं समाविशत् ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आगत्य दृष्टवांस्तत्र गणं नृपतिकुञ्जरम् ।
विगृह्य तेन राजेन्द्रो जग्राह हरिमव्ययम् ॥ २२ ॥
ततो ब्रह्मा ब्रह्मलोकाद् भूमिलोकं समाविशत् ।
आगत्य क्षिप्रं भूलोकं प्रतिष्ठां कृतवांस्ततः ॥ २३ ॥
जितं त इति मन्त्रेण अस्तुवन् देवतागणाः ।
आविर्बभूव भगवान् शङ्खचक्रधरो हरिः ॥ २४ ॥
प्रीतो विष्णुरुवाचेदम् इन्द्रद्युम्नं महीपतिम् ।

श्रीभगवान् उवाच

पुण्यक्षेत्राणि तीर्थानि परित्यज्य महीपते !
अत्रैव सर्वभावेन स्थास्येऽहं वै परार्द्धकम् ॥ २५ ॥
इन्द्रद्युम्न महीपाल ! शृणु मद्वचनं हितम् ।
स्नानं त्वं च प्रकुर्वीथा गुडिचाख्यं महोत्सवम् ॥ २६ ॥
स्नानकाले नरा ये मां द्रक्ष्यन्ति च मुदान्विताः ।
सर्वपापविनिर्मुक्तास्ते यान्ति भुवनं मम ॥ २७ ॥
तूष्णीं बभूव भगवानिदमुक्त्वा जनार्दनः ।
ब्रह्मापि ब्रह्मलोकं च गतवान् भो द्विजोत्तमाः ॥ २८ ॥
इन्द्रद्युम्नो हि राजर्षि र्देवदेवं जगत्पतिम् ।
पूजयित्वा प्रयत्नेन ततो मुक्तिमवाप सः ॥ २९ ॥
एवं पुरा जगन्नाथ इन्द्रनीलस्वरूपधृक् ।
दारुब्रह्मस्वरूपेण भातीदानीं जगत्पतिः ॥ ३० ॥

इति श्रीकपिलपुराणे इन्द्रद्युम्ननृपमोक्षप्राप्ति र्नाम
चतुर्थोऽध्यायः ॥ ४ ॥

उवाचसंख्या ८, अर्द्धश्लोकसंख्या ३ पूर्णश्लोकसंख्या च ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ पञ्चमोऽध्यायः

भारद्वाज उवाच

तस्मिन् क्षेत्रे द्विजश्रेष्ठा ये वसन्ति नराः किल ।
ते यान्ति विष्णोः सान्निध्यं भासमानाः सुतेजसः ॥१॥
महोदधौ नरः स्नात्वा दृष्ट्वा श्रीपुरुषोत्तमम् ।
ब्रह्महत्यादिपापानि क्षयित्वा मोक्षमाप्नुयात् ॥ २ ॥
गङ्गायात्रासरस्वत्याः गोदावर्य्याश्च भो द्विजाः ।
यत्तत्फलमवाप्नोति अचलाम्बुधिदर्शनात् ॥ ३ ॥
मार्कण्डेयं च तत्रैव तीर्थं त्रैलोक्यपावनम् ।
यत्र स्नात्वा सुराः सर्वे स्वपदं प्राप्नुयुः पुरा ॥ ४ ॥
मार्कण्डेयवटं विप्राः स्वयं कृष्णेन निर्मितम् ।
हितार्थं च महर्षीणां मार्कण्डेयस्य धीमतः ॥ ५ ॥
यत्र स्नात्वा नरश्रेष्ठो दृष्ट्वा शैलसुतापतिम् ।
कोटिजन्मकृतं पापं तत्क्षणादेव नाशयेत् ॥ ६ ॥
तस्मान्नीलाचले विप्रा देवराजस्य दक्षिणे ।
यमेश्वर इति ख्यातो यमसंयमतत्परः ॥ ७ ॥
यमेश्वरं समालोक्य पूजयित्वा च भक्तितः ।
नरः शिवमवाप्नोति यमदण्डविवर्जितः ॥ ८ ॥
तस्याः पश्चिमदिग्भागेऽलावुनाथसंज्ञकः ।
समाश्रित्य नरस्तं च मनोरथमवाप्नुयात् ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपुत्रः पुत्रवांश्चैव व्यङ्गः कन्दर्परूपधृक् ।
भवत्येवं महीपाल ! तस्य लिङ्गस्य सेवनात् ॥ १० ॥
कपालमोचनं नाम लिङ्गं सन्निहितं प्रभोः ।
तद् दृष्ट्वा विधिवद् भक्त्या ब्रह्महत्याद् विमुच्यते ॥ ११ ॥
भक्षणाद्दर्शनाच्चैव द्विजातीनां विमुक्तिदम् ।
द्विजाश्च सुपचायान्नं यत्र भुञ्जन्नपूपकम् ॥ १२ ॥
तस्मात् सर्वप्रयत्नेन गन्तव्यः पुरुषोत्तमः ।
द्रष्टव्यश्च जगन्नाथ आत्मनो मुक्तिकारणात् ॥ १३ ॥
वटमूले वटेशश्च सर्वपापप्रणाशनः ।
तस्य दर्शनमात्रेण सर्वपापाद् विमुच्यते ॥ १४ ॥
वाराणस्या समं ह्यस्ति क्षेत्रमेकं न किंचन ।
पुरुषाख्यसमं क्षेत्रं नास्ति त्रैलोक्यमण्डले ॥ १५ ॥
सर्वेषां चैव क्षेत्राणां राजा श्रीपुरुषोत्तमः ।
देवानामपि सर्वेषामुत्तमः पुरुषोत्तमः ॥ १६ ॥
किं चात्र बहुनोक्तेन भाषितेन पुनः पुनः ।
सत्यं सत्यं पुनः सत्यं क्षेत्रं न पुरुषोत्तमात् ॥ १७ ॥
पुरुषोत्तममाहात्म्यं वक्तुं वर्षशतैरपि ।
न समर्थो द्विजश्रेष्ठाः किमन्यच्छ्रोतुमर्हथ ॥ १८ ॥

ऋषय ऊचुः

सम्यक् प्रोक्तं त्वया क्षेत्रं मुक्तिदं पुरुषोत्तमम् ।
कथयस्व तस्मिन् क्षेत्रे किं कर्तव्यं द्विजोत्तमाः ॥ १९ ॥
पूर्वमुक्तं त्वया विप्रा यमेशो मुक्तिदायकः ।
इन्द्रादिदेवताः सर्वे तत्र सन्ति तपस्विनः ॥ २० ॥
ईषत् पुण्यं भवेत्तत्र मेरुतुल्यं न संशयः ।
कुरुध्वं तत्र भो विप्रास्तपो मुक्तिप्रदायकम् ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भरद्वाज उवाच

तत् स्थानं सुमहत् पुण्यं देवादीनां च दुर्लभम् ।
बहुपुण्येन देवाश्च तत्र सन्ति महर्षयः ॥ २२ ॥
नाना-पुष्प-समायुक्तं यूप-वृक्ष-विराजितम् ।
पुन्नागै र्नारिकेलैश्च पूरितं तत् समन्ततः ॥ २३ ॥
करवीरैः कर्णिकारैश्च पादपैश्चम्पकैस्तथा ।
मल्लिका-यूथिकाभिश्च जातिभिः परिपूरितम् ॥ २४ ॥
तपसस्तु महत्स्थानं मुनीन्द्रैः परिकीर्तितम् ।
ये यजन्ति नरास्तत्र शान्तास्ते पूतमानसाः ॥ २५ ॥
यमेश्वर-प्रसादेन मन्त्रसिद्धिमवाप्नुयुः ।
एवं श्रीपुरुषाख्यस्य महात्म्यं गदितं मया ॥ २६ ॥

इतिश्रीकपिलपुराणे पुरुषोत्तममहात्म्यवर्णनं नाम
पञ्चमोऽध्यायः ॥ ५ ॥

उवाचसंख्या ३ अर्द्धश्लोकसंख्या × पूर्णश्लोकसंस्या २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ षष्ठोऽध्यायः

ऋषय ऊचुः

पुरा ते गदिता विप्राः कृष्णार्कपार्वतीहराः ।
इदानीं भास्करस्येह माहात्म्यं वद नः प्रभो ॥ १ ॥

भरद्वाज उवाच

कथयामि रहस्यं वो पावनं क्षेत्रमुत्तमम् ।
यत्र गत्वा पुरा विप्राः शाम्बः कुष्टान्मुमोच ह ॥ २ ॥

ऋषयः ऊचुः

कुतः समागतः शाम्बः कमाराध्य मुमोच ह ।
किमर्थं तस्य देहे च वद कुष्टं बभूव ह ॥ ३ ॥

भरद्वाज उवाच

दुष्टानां विग्रहार्थाय शिष्टानां पालनाय च ।
द्वापरे कृष्णवने विप्राः श्वेतगङ्गेति विश्रुता ॥ ४ ॥
श्वेतमाधवरूपेण तत्रास्ते भगवान् प्रभुः ।
मत्स्य-माधवस्तत्रैव वेद-वेदाङ्ग-पारगः ।
उभयोर्दृष्टियोगेन कीटो मुक्तिमवाप्नुयात् ॥ ५ ॥
ब्रह्महा च सुरापश्च गोघ्नो वापि च घातकः ।
ते सर्वे मुक्तिमायान्ति मध्ये च श्वेत-मत्स्ययोः ॥ ६ ॥
श्वेतायां च नरः स्नात्वा दृष्ट्वा च श्वेतमत्स्यकौ ।
पापानि च परित्यज्य श्वेतद्वीपं व्रजेद् ध्रुवम् ॥ ७ ॥
इन्द्रद्युम्नसरस्तत्र इन्द्रेण सम्पूजितम् ।
तत्र साक्षान्नरो विप्रा इन्द्रेण सह मोदते ॥ ८ ॥
तत्रस्थं नरसिंहं च शङ्करं नीलकन्धरम् ।
दृष्ट्वा नत्वा पूजयित्वा ज्योतिर्लोकं व्रजेन्नरः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरिशङ्करयोर्मध्ये यो दद्यात् पिण्डमुत्तमम् ।
पितॄणामुद्धृतिं कृत्वा रविलोकं व्रजेन्नरः ॥ १० ॥
पुण्यं कल्पवटं तत्र दारु-ब्रह्म-समीपतः ।
यस्य छायां समाक्रम्य ब्रह्महत्याद् विमुच्यते ॥ ११ ॥
कृत्वा प्रदक्षिणं तस्य यस्तु तं पूजयेत् वटम् ।
तस्य जन्मशतोद्भूतं दोषं च क्षमते हरिः ॥ १२ ॥
मङ्गलावटमूले च देवीमङ्गलदायिनी ।
तां दृष्ट्वा पूजयित्वा च मोहबन्धाद् विमुच्यते ॥ १३ ॥
वटस्य पश्चिमे भागे विमला विमलप्रदा ।
तस्या दर्शनमात्रेण विद्यावान् जायते नरः ॥ १४ ॥
तदग्रे नरसिंहस्तु कोटि-सूर्य्यसमप्रभः ।
दैत्येन्द्रोऽपि च तत्रास्ते दर्शनान्मुक्तिदो मतः ॥ १५ ॥
तस्याग्रे वासुदेवश्च शेषशायी गदाधरः ।
शङ्खचक्राङ्कितो भूत्वा वनमाला-विभूषितः ॥ १६ ॥
क्षीरशायी जगन्नाथः साक्षादत्र स्थितः प्रभुः ।
लक्ष्मीपादतले चास्ति कर्णमूले सरस्वती ॥ १७ ॥
नाभि-पद्मोपरि ब्रह्मा वेदवेदाङ्गपारगः ।
कमण्डलुधरो देव श्चतुर्बाहुश्चतुर्मुखः ॥ १८ ॥
ईश्वरः पार्वतीनाथः शेषदेहत्वमाप्तवान् ।
यस्मादभिन्न-पुरुषस्तस्मादेकत्व-माप्तवान् ॥ १९ ॥
अचलोपरि देवेशः पुरुषोत्तमसंज्ञकः ।
विराजते विभुः साक्षाद् अनन्त-पुरुषोत्तमः ॥ २० ॥
पुरुषोत्तम-नामैतत् क्षेत्रं श्रीपुरुषोत्तमम् ।
नरो मुक्तिमवाप्याशु दृष्ट्वा श्रीशेषशायिनम् ॥ २१ ॥
तत्र दारुस्वरूपस्य निर्माल्यं पापनाशनम् ।
अन्नाद्यपूपकं चैव यदन्यत् प्राप्यते परम् ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगन्नाथस्य नैवेद्यं महापातकनाशनम् ।
भक्षणात् फलमाप्नोति कपिलाकोटिदानजम् ॥ २३ ॥

किं तेन ‘तन्न कृतं पुण्यं किं तेन न कृतं तपः ।
भक्षितं येन अन्नाद्यं दारुब्रह्मस्वरूपिणः ॥ २४ ॥

जगन्नाथो यथा साक्षाद् दर्शनान् मुक्तिदो ध्रुवम् ।
तथैव मुक्तिदं ह्यन्नं जगन्नाथस्य भोद्विजाः ॥ २५ ॥

दिशान्तरगतं वापि विष्णुस्त्ववततार ह ।
सोऽपि कृष्णो जगन्नाथो गोपीभिश्च समावृतः ॥ २६ ॥

बाल्यकाले स्थितो गोपे ततः कंसं जघान ह ।
मथुरायां कृतो राजा उग्रसेनो महामनाः ॥ २७ ॥

कालनेमिभयात् तस्मान्निर्गतो द्वारकापुरीम् ।
तस्यां स्थितश्च श्रीकृष्णः पाण्डवानां हितप्रदः ॥ २८ ॥

यौधिष्ठिरे धर्मयज्ञे गतवान् हस्तिनापुरम् ।
श्वेतातपत्रं दत्त्वा स आगतो द्वारकापुरीम् ॥ २९ ॥

एवं पलायतस्तस्य जगन्नाथस्य शार्ङ्गिणः ।
सुतः शाम्बोऽभवद् विप्रा द्वितीयो रतिनायकः ॥ ३० ॥

यथा कृष्णस्तथैवासौ नीलजीमूतसन्निभः ।
शङ्खचक्राङ्कितभुजः पीतवासाः सुलोचनः ॥ ३१ ॥

जलक्रीडारुचिः सोऽथ योषिद्भिश्च समावृतः ।
चक्रपाणेरविज्ञातो गतो जाम्बवतीसुतः ॥ ३२ ॥

तं दृष्ट्वा योषितः सर्वा ययुर्मोहं च विह्वलाः ।
तासां च स्कन्दते रेतश्चक्रे निन्दां तदा हरिः ॥ ३३ ॥

धिक् च भवतु नारीणामसतीत्वं च धिक् प्रधिक् ।
पुत्रं दृष्ट्वा कथं सर्वा ययुर्मोहं पुनः पुनः ॥ ३४ ॥
ततः शाम्बमुवाचाथ ईषत्क्रोध-समन्वितः ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीभगवान् उवाच

मातॄणां स्कन्दते रेत आगते त्वयि पुत्रक !
इदानीं तव देहे च कुष्टं भवतु सर्वतः ॥ ३६ ॥
एवं निगदिते कृष्णे कुष्टं सर्वाङ्गकेष्वभूत् ।
शाम्बोऽपि वेपमानः सन् पितरं वाक्यमब्रवीत् ॥ ३७ ॥
अपराधे कृते पुत्रे क्षमते जनकः प्रभो !
इदानीं किं करिष्यामि शापमुक्ति वदस्व ह ॥ ३८ ॥

भगवान् उवाच

मैत्रेयाख्यं वनं गत्वा तपस्तप्त्वा जितेन्द्रियः ।
प्रसादयित्वा छायेशं ततो मुक्तिं गमिष्यसि ॥ ३९ ॥

भरद्वाज उवाच

इति श्रुत्वा वचस्तस्य शार्ङ्गिणो रुक्मिणीपतेः ।
एकाकी च जगामाशु शाम्बो दुःखपरिप्लुतः ॥ ४० ॥
गत्वा तत्र प्रयत्नेन तपस्तेपे सुदारुणम् ।
शान्तो दान्तो निराहारो वायुभक्ष्यो जितेन्द्रियः ॥ ४१ ॥
शाम्बो द्वादशवर्षाणि सूर्य्यध्यानपरायणः ।
पूजयंस्तु स्तुवन् गायन् सूर्यसूर्येति कीर्तयन् ॥ ४२ ॥
दिवाकर ! नमस्तेऽस्तु प्रभाकर ! नमोऽस्तु ते ।
त्राहि मां करुणागार ! व्यङ्गं च पतितं भुवि ॥ ४३ ॥
इति मन्त्रं स्तुवन् गायन् शाम्बः कृष्णात्मजो द्विजाः ।
पपात सहसा भूमौ पुनः पुनरुदीरयन् ॥ ४४ ॥
गते च कतिचित्काले भास्करो भक्तवत्सलः ।
उवाच वचनं स्वप्ने शापनिर्मुक्तकारणम् ॥ ४५ ॥

श्रीसूर्य उवाच

अत्र तिष्ठ महाबाहो ! दर्शयामि स्वकां तनुम् ।
तां दृष्टवा मुच्यते रोगान्नान्यथा शृणु शाम्बक ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदा जाम्बवतीसूनो ! पापमुक्तिमपेक्षसे ।
एतानि मम नमानि कीर्तयस्व निरन्तरम् ॥ ४७ ॥
भास्करो भगवान् सूर्यश्चित्रभानुर्विभावसुः ।
यमतातोंऽशुमाली च यमुनाप्रीतिदायकः ॥ ४८ ॥
दिवाकरो जगन्नाथः सर्वसाक्षी विभाकरः ।
लोकचक्षुः स्वयम्भूश्च छायारतिप्रदायकः ॥ ४९ ॥
तिमिरारि र्ग्रहधरो लोकत्रयप्रकाशकः ।
भक्तबन्धु र्दयासिन्धुः कर्मसाक्षी परात्परः ॥ ५० ॥
एकविंशतिनामानि यः पठेदुदिते मयि ।
तस्य शान्ति प्रयच्छामि सत्यं सत्यं वदाम्यहम् ॥ ५१ ॥
इत्युक्त्वा गतवान् सूर्यः शाम्बो निद्रां च मुक्तवान् ।
ततः प्रभातसमये स्नानार्थं प्रययौ नदीम् ॥ ५२ ॥
चन्द्रभागां महापुण्यां देवलोकप्रदायिनीम् ।
तत्र गत्वा च साम्बोऽसौ द्विभुजां पद्मलाञ्छिताम् ॥ ५३ ॥
प्रतिमां पङ्कजस्थां च जलमध्ये ददर्श सः ।
दृष्ट्वा तां परिवृढां च सरेणान्तिकमानयत् ॥ ५४ ॥
मार्जयित्वा वपुस्तस्याः प्रक्षाल्य सलिलेन च ।
गृहीत्वा प्रतिमां तां च ययौ शाम्बो महामतिः ॥ ५५ ॥
प्रसादं कारयित्वा च स्थापयामास सत्वरम् ।
तां पूजयित्वा विधिवद् भक्त्या नत्वा परं ततः ॥ ५६ ॥
विमुक्तरोगः सहसा ययौ वाराणसीं पुरीम् ॥ ५७ ॥

भरद्वाज उवाच

एवं पुरा गतः शाम्बस्तपस्तत्वा दिवाकरम् ।
अर्चयित्वा प्रयत्नेन ततः कुष्टाद् व्यमुच्यत ॥ ५८ ॥
तत्र ये स्थातुमिच्छन्ति वीतरागा विकल्मषाः ।
तेषां मनोरथफलं पूरयेद् भगवान् रविः ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मैत्रेयाख्ये वने रम्ये ये त्यजन्ति कलेवरम् ।
पापानि च परित्यज्य ज्योतिर्लोकं व्रजन्ति ते ॥ ६० ॥
रविक्षेत्रे नरा ये च रविवारे समाहिताः ।
भक्त्या पश्यन्ति च रविं ते गच्छन्ति रवेर्गृहम् ॥ ६१ ॥
मैत्रेयाख्ये वने ये च अमृताश्च पुनर्भवाः ।
देवलोकं समासाद्य रविणा सह मोदते ॥ ६२ ॥
तत्र श्रीमङ्गलं तीर्थं देवानां मङ्गलप्रदम् ।
मङ्गले च नरः स्नात्वा मङ्गलं प्राप्नुयु र्ध्रुवम् ॥ ६३ ॥
तत्र श्रीशाल्मलीभाण्डं तीर्थं त्रैलोक्यपावनम् ।
सर्वपापहरं गुह्यं सिद्ध-गन्धर्व-सेवितम् ॥ ६४ ॥
नाना-मुनि-जनाकीर्णं सर्वेषां मुक्तिदायकम् ।
यत्र स्नात्वा नरः साक्षाद् रविदीधितिमाप्नुयात् ॥ ६५ ॥
स्नात्वा श्रीशाल्मलीभाण्डे दृष्टवा छायापतिं ततः ।
अघौघं नाशयित्वा च आदिलोकं वसेन्नरः ॥ ६६ ॥
सूर्य्यगङ्गाजले स्नात्वा सूर्य्यलोकं व्रजेन्नरः ।
सूर्य्यगङ्गासमं तीर्थं नास्ति नास्ति महीसुराः ॥ ६७ ॥
महोदधौ नरः स्नात्वा सर्वपापाद् विमुच्यते ।
सर्वतीर्थवरश्चासौ सागरः सरितां पतिः ॥ ६८ ॥
रामेश्वरस्तु तत्रैव वेलायां च नदीपतेः ।
श्रीरामः पूजयामास प्राणिनां हितकारणात् ॥ ६९ ॥
रामेश्वरं प्रयत्नेन येऽर्चयन्ति नरोत्तमाः ।
तेषामिष्टवरं विप्रा रामचन्द्रः प्रयच्छति ॥ ७० ॥
गन्धैः पुष्पैश्च नैवेद्यै येऽर्चयन्ति महेश्वरम् ।
ते यान्ति शिवसालोक्यं विप्रास्तेन विराजिताः ॥ ७१ ॥
चन्द्रभागा जले तत्र ये स्नान्ति विधिपूर्वकम् ।
चन्द्रतुल्यवपुर्धृत्वा चन्द्रलोकं व्रजन्ति ते ॥ ७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र चार्कवटो नाम कल्पवृक्षस्तु तिष्ठति ।
नाना-मुनि-जनाकीर्णो विहगैरुपशोभितः ॥ ७३ ॥
अच्छेद्यश्चाप्यवध्योऽयं वटो मुक्तिप्रदो ध्रुवम् ।
प्राणिनां च हितार्थाय सूर्यः साक्षाच्च पादपः ॥ ७४ ॥
तत्र वृक्षतले ये च जपन्ति मन्त्रमुत्तमम् ।
त्रिपक्षाभ्यन्तरे मन्त्रः साधकाभीष्टसिद्धिदः ॥ ७५ ॥
भूपावर्कवटे विप्राः स्वर्लोके नन्दनं स्मृतम् ।
तत्र सिद्धगणाः सन्ति सत्यं सत्यं वदामि वः ॥ ७६ ॥
तत्र ध्यायन्ति ये विष्णुं तेषां विष्णुः प्रसीदति ।
वटच्छायां च ये सन्ति ते सिद्धाश्च न संशयः ॥ ७७ ॥
विजयां दशमीं प्राप्य येऽर्चयन्ति दिवाकरम् ।
तेषां विमुक्तपापानां सर्वत्र विजयो भवेत् ॥ ७८ ॥
मैत्रेयाख्ये वने पुण्ये रथयात्रा-महोत्सवम् ।
ये पश्यन्ति नरा भक्त्या लीयन्ते स्वतनौ हरेः ॥ ७९ ॥
एवमादिगुणाः सन्ति मैत्रेयाख्ये वनोत्तमे ।
न सामर्थ्यं द्विजश्रेष्ठाः वक्तुं वर्षशतैरपि ॥ ८० ॥
किंचित् प्रोक्तं मया विप्रा भवतां हितमुत्तमम् ।
वरेण्यं परमं पुण्यं किमन्यच्छ्रोतुमर्हथ ॥ ८१ ॥

इति श्रीकपिलपुराणे मैत्रेयवनमाहात्म्यं नाम
षष्ठोऽध्यायः ॥ ६ ॥

उवाचसंख्या ८ अर्द्धश्लोकसंख्या ३ पूर्णश्लोकसंख्या ८१

—::×::—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ सप्तमोऽध्यायः

ऋषय ऊचुः

इदानीं कथयास्माकं पार्वतीक्षेत्रमुत्तमम् ।
तत्प्रसादाद् भविष्यामः कृतार्था नात्र संशयः ॥ १ ॥

भरद्वाज उवाच

कथयामि महापुण्यं विरजाख्यं सुनिर्मलम् ।
यत् क्षेत्रं सृष्टिरक्षार्थं ब्रह्मणा च कृतं पुरा ॥ २ ॥
तस्मिन् क्षेत्रे द्विजश्रेष्ठा विरजा विरजप्रदा ।
विरजामुखमालोक्य रजःप्रक्षालनं भवेत् ॥ ३ ॥
यत्र श्रीविरजादेवी भुक्तिमुक्तिप्रदायिनी ।
साधकानां हितार्थाय विरजा सा कलौ स्थिता ॥ ४ ॥
दशवर्ष-सहस्राणि यो वा पूजयते हरम् ।
तत् फलं समवाप्नेति विरजाऽऽलोकने नरः ॥ ५ ॥
कुरुक्षेत्रे हरिद्वारे यत्फलं लभते नरः ।
तत्फलं समवाप्नोति नान्यथा भो द्विजोत्तमाः ॥ ६ ॥
वराहरूपो भगवान् तत्रास्ते मुक्तिदायकः ।
तं दृष्टवा पूजयित्वा च विष्णुलोकमवाप्नुयात् ॥ ७ ॥
आखण्डलस्तु तत्रास्ते पार्वतीशो जगद्गुरुः ।
समालोक्य प्रयत्नेन यमदण्डं च खण्डति ॥ ८ ॥
यत्राखण्डलदेवस्तुतत्र मुक्ति र्न संशयः ।
तत्र स्नात्वा च गच्छन्ति श्रीविष्णोः परमं पदम् ॥ ९ ॥
आखण्डलं समासाद्य कुष्टी कुष्टात् प्रमुच्यते ।
अपुत्रा चैव या नारी सा ध्रुवं सुतमाप्नुयात् ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आखण्डल ! नमस्तुभ्यं सिद्धानां सिद्धिदायक ! ।
अखण्ड-मण्डलाकार-कारणा-शेष-कारणात् ॥ ११ ॥
अनेन मन्त्रयोगेन यः पश्येत् पार्वतीपतिम् ।
सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥ १२ ॥
क्रोडाखण्डलयो र्मध्ये देवानां दुर्लभप्रदे ।
मुक्तिं गच्छन्ति कीटाद्याः किं पुनर्मानवा मृताः ॥ १३ ॥
गुरुहा ब्रह्महा गोघ्नः सुरापो विष्णुनिन्दकः ।
तत्र देहं त्यजन् विप्रा वैकुण्ठं लभते ध्रुवम् ॥ १४ ॥
तत्र मुक्तीश्वरं लिङ्गं मुक्तिदं पापनाशनम् ।
यै र्दृष्टं च पुन र्विप्रा ययुर्मुक्तिं त्वरान्विताः ॥ १५ ॥
तत्र श्रीविरजा क्षेत्रे देव्या ईशानकोणतः ।
गयानाभिः महापुण्या पितॄणां मुक्तिदायिका ॥ १६ ॥
तत्र पिण्डं प्रयच्छन्ति नरा ये वीतकल्मषाः ।
पितॄनुद्धृत्य नरकात् ते व्रजन्ति पदं हरेः ॥ १७ ॥
तत्र वैतरणी देवी नदी मुक्तिप्रदायिनी ।
गङ्गादेवी त्वसौ विप्रा सत्यं सत्यं न संशयः ॥ १८ ॥
वैतरणी महापुण्या भुक्तिदा मुक्तिदा नृणाम् ।
महापातककोटिघ्नी सुकृद्दर्शनमात्रतः ॥ १९ ॥
तस्यां स्नात्वा नरश्रेष्ठो दृष्ट्वा श्रीदंष्ट्रिणं हरिम् ।
कुलकोटिसमायुक्तो व्रजेद् विष्णुपुरीं द्विजाः ॥ २० ॥
त्रिलोचनस्तु तत्रास्ते भव-पाप-विमोचनः ।
तं दृष्ट्वा विधिवत् पूज्य त्रिलोचनमवाप्नुयात् ॥ २१ ॥
त्रिलोचनस्तु भो विप्राः ! तापत्रयविभञ्जनः ।
त्रैलोक्यस्य ह्यधिष्ठाता तं नरः कोऽपि नाश्रयेत् ॥ २२ ॥
तत्र क्षेत्रवरे विप्राः कपिलं तीर्थमुत्तमम् ।
प्रसन्नसलिलं चैव मनोज्ञं चारुदर्शनम् ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितृपक्षे चतुर्दश्यां कापिले स्नाति यो नरः ।
तस्य तुष्टो भवेद् विप्राः शैलेन्द्रतनयापतिः ॥ २४ ॥
तीर्थे कापिलिके विप्रा विधिवत् स्नाति यो नरः ।
कपिलाकोटिजं पुण्यं लभते नात्र संशयः ॥ २५ ॥
तत्रैव गोग्रहं तीर्थं मुनीन्द्रैरुपसेवितम् ।
तत्र स्नात्वा च विधिवद् गोलोकस्य फलं लभेत् ॥ २६ ॥
सोमतीर्थवरं चास्ते निर्मितं वै हिमांशुना ।
स्नात्वा तत्र नरः श्रेष्ठश्चन्द्रलोकं स गच्छति ॥ २७ ॥
तत्र भोगाननेकांश्च भुक्त्वा चन्द्रप्रसादताम् ।
भूमिलोकं समासाद्य राजा भवति वै ध्रुवम् ॥ २८ ॥
तत्र भक्तिं समुत्पाद्य देवदेवे महेश्वरे ।
सर्वं पापं परित्यज्य गच्छेद् विष्णुपुरं नरः ॥ २९ ॥
एवं श्रीसोमतीर्थं च माहात्म्यं गदितं मया ।
इदानीमद्य तीर्थानि शृणुध्वं कथयाम्यहम् ॥ ३० ॥
कल्पाम्बुसंज्ञकं नाम तत्रास्ते विरजे द्विजाः ।
अल्पपुण्यं भवेदत्र मेरुतुल्यं न संशयः ॥ ३१ ॥
तस्मिन् क्षेत्रे पुरा वृत्तं शृणुध्वं द्विजसत्तमाः ।
आसीत् सत्यश्च नृपति र्मान्धाता नाम विश्रुतः ॥ ३२ ॥
यज्वाऽध्वरवरे देवं दाता भोक्ता प्रियम्वदः ।
क्षमाशीलो दयाशीलः सत्यवागनुसूयकः ॥ ३३ ॥
महीपतिरसौ गच्छन् निर्जने गहने वने ।
मृगयार्थं महाबाहुरेकाकी च परन्तपः ॥ ३४ ॥
ददर्श वनखण्डे चाजगरं लोमहर्षणम् ।
तं दृष्ट्वा घातयामास शरेणैकेन धीमतिः ॥ ३५ ॥
तस्य पत्नी च तं दृष्ट्वा स्वपतिं पतितं भुवि ।
दुःखशोकसमाविष्टा ददौ शापं नृपाय तम् ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्पपत्नी उवाच

अद्रोहकरणं क्रूर ! मत्पतिं प्राणवल्लभम् ।
जघ्निथ त्वं यतो भूप ! शृगालत्वं ततो व्रज ॥ ३७ ॥
तस्याः शापप्रभावेण शृगालत्वं ययौ नृपः ।
गत्वा वाचमुवाचेदं सर्पपत्नीं पतिव्रताम् ॥ ३८ ॥

राजोवाच

शापमुक्तिं वदाशु त्वं त्राहि मां द्रोहकारणम् ।
शृगालविग्रहं प्राप्य जीवतं नास्ति कारणम् ॥ ३९ ॥

सर्पपत्नी उवाच

यदा त्वं च वशिष्ठेन विरजाख्यं गमिष्यसि ।
तस्मिन्नन्यम्बुतीर्थे च स्नात्वा मुक्तिमवाप्स्यसि ॥ ४० ॥
विरजाख्यं नृपश्रेष्ठ ! क्षेत्रं परमपावनम् ।
रम्यं पापापनोदं च स्वर्गतुल्यं न संशयः ॥ ४१ ॥
ब्राह्मणैः क्षत्रियै वैश्यैः समन्तादभिपूरितम् ।
नाना देवगणाकीर्णं देवदुन्दुभिनादितम् ॥ ४२ ॥
तित्तीडीशालतालैश्च नारिकेलैश्च खर्जुरैः ।
आम्रजम्बूपिप्पलैश्च पनसैरूपशोभितम् ॥ ४३ ॥
पापानां मुक्तिदं भूप ! विरजाख्यं सुनिश्चितम् ।
तत्रैव तव शापस्य विमुक्तिश्च भविष्यति ॥ ४४ ॥
तच्छ्रुत्वा हि शृगालश्च वेपमानः सुदुःखितः ।
वशिष्ठस्याश्रमं गत्वा त्राहि त्राहीत्युवाच ह ॥ ४५ ॥
श्रुत्वा शापं च तद्वाक्यं वशिष्ठः परमं तपः ।
आश्रमाद्धि वहि र्गत्वाऽब्रवीद् वाक्यं प्रियं च तम् ॥ ४६ ॥

वशिष्ठ उवाच

त्राहीति त्वं कथं ब्रूषे कस्मादागतवानिह ।
किं ते च भयमुत्पन्नं कथयस्व ममाग्रतः ॥ ४७ ॥
मृगयार्थं गतोऽरण्यं मान्धाताऽहं महीपतिः ।
तत्र दृष्ट्वा ह्यजगरं सहसा च हतो मया ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततो मुने ! पतिव्रतया शप्तोऽहं तस्य भार्यया ।
शृगालो भव भूप ! त्वं यत्त्वया मत्पतिर्हतः ॥ ४९ ॥
कृपया च पुनः प्राह वशिष्ठस्याश्रमं व्रज ।
गत्वा श्रीविरजं तेन ततो मुक्तिश्च लभ्यते ॥ ५० ॥
इदानीं त्राहि मां नाथ ! गच्छावो विरजं मुने !
मां तत्र नीत्वा क्षिप्रं च नरकादुद्धर प्रभो ॥ ५१ ॥

भरद्वाज उवाच

तच्छ्रुत्वा वचनं तस्य वशिष्ठः करुणान्वितः ।
तेन श्रीविरजं क्षेत्रं जगामाशु तपोधनः ॥ ५२ ॥
तत्र गत्वा मुनीन्द्रोऽसौ तीर्थे कल्पाम्बुसंज्ञके ।
स्नापयित्वा प्रयत्नेन ददौ तस्मै स्वकां तनुम् ॥ ५३ ॥
मान्धाता च ततो गत्वा स्वराज्यं द्विजसत्तमाः ।
आकाशात् पुष्पवृष्टिश्च पपात धरणीतले ॥ ५४ ॥
मान्धाता च ततो गत्वा स्वराज्यं द्विजसत्तमाः ।
प्रजाश्च पालयामास धर्मेण विनयेन च ॥ ५५ ॥
वशिष्ठोऽपि महातेजाः शिष्यैः परिवृतस्ततः ।
सर्वपुण्यमयं रम्यं जगाम स्वाश्रमं हि तम् ॥ ५६ ॥
एवं तस्मिन् पुरा वृत्तं तीर्थे कल्पाम्बुसंज्ञके ।
श्रुतं मया द्विजश्रेष्ठाः सर्वं पापप्रणाशनम् ॥ ५७ ॥
अल्पं पुण्यं बहुतरं भावि कल्पाम्बुके द्विजाः ।
शृगालत्वं परित्यज्य एवं राजा विमुक्तवान् ॥ ५८ ॥
यः पठेदिदमाख्यानं पुण्यं पापाहरं महत् ।
शृणुयादपि यत्नेन स पुण्यां लभते गतिम् ॥ ५९ ॥
इदं श्रुत्वा जनाः सर्वे नमन्तु भुजगं सदा ।
मान्धाता भुजगं हत्वा ह्यवाप गतिमीदृशीम् ॥ ६० ॥

इति श्रीकपिलपुराणे शृगालविमुक्तो नाम
सप्तमोध्यायः ॥७॥

उवाचसंख्या ७ अर्द्धश्लोकसंख्या × पूर्णश्लोकसंख्या ६०

—::×::—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाष्टमोऽध्यायः

ऋषय ऊचुः

अल्पाम्बुतीर्थमाहात्म्यं श्रुतमस्माभिरादरात् ।
तत्र गुह्यानि तीर्थानि श्रोतुकामा वयं मुने ॥ १ ॥

भरद्वाज उवाच

तत्र मृत्युञ्जयं नाम तीर्थं देवगणैः स्तुतम् ।
मृकण्डुतनयो यत्र स्नात्वा मृत्युर्जिगीयते ॥ २ ॥
मृत्युञ्जये तीर्थवरे यो नरः स्नानमाचरेत् ।
मृत्युञ्जयं समालोक्य सोऽपि मृत्युं जिघांसति ॥ ३ ॥
क्रोडतीर्थं च तत्रास्ते परमं पावनं महत् ।
क्रोडरूपी जगन्नाथः साक्षात्तीर्थत्वमागतः ॥ ४ ॥
तत्र स्नानं विधायाशु क्रोडदेहे च लीयते ।
इति मन्त्रं समुच्चार्य्य स्मरेन् मृत्युञ्जयं प्रभुम् ॥ ५ ॥
तीर्थराज ! नमस्तुभ्यं कारुण्यक ! जलाप्लुत !
अघौघादुद्धर त्वं मां मज्जन्तं पाहि मां प्रभो ! ॥ ६ ॥
तत्रैव शुकतीर्थं च वासुदेवपदप्रदम् ।
तत्र स्नात्वा सकृल्लोको दीव्यलोकात् परं व्रजेत् ॥ ७ ॥
तीर्थं सिद्धेश्वरं नाम सिद्धिदं सर्वकामदम् ।
एवं स्तुत्वा पयःपित्वा सिद्धाः सिद्धित्वमाययुः ॥ ८ ॥
सिद्धेश्वरे सकृदेव मस्तके पातिते द्विजाः ।
तस्य तुष्टः प्रजानाथः सिद्धिं दद्याद् यथेप्सिताम् ॥ ९ ॥
सिद्धेश्वरे मनोज्ञे च प्रसन्नसलिले शुभे ।
स्नातं येन दिनैकं च स्नातं तेन जगत्त्रये ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं बहुविधं तस्य पुण्यं सिद्धेश्वरस्य च ।
सिद्धेश्वरे नरः स्नात्वा सिद्धिं प्राप्नोत्यसंशयम् ॥ ११ ॥
नानाविधानि तीर्थानि तत्र सन्ति द्विजोत्तमाः ।
नानाविधास्तथा देवा नानासिद्धगणास्तथा ॥ १२ ॥
यो व्रजेद् विरजःक्षेत्रे मधुमासे नरोत्तमः ।
आश्विने माधवे वापि तस्य सिद्धिर्भवेद् ध्रुवम् ॥ १३ ॥
दोलस्य स्थानं क्रोडं च तत्र पश्यन्ति ये नराः ।
ब्रह्महत्यादिपापानि क्षयित्वा मुक्तिमाययुः ॥ १४ ॥
भौमवारे चतुर्दश्यां वारे वाथ वृहस्पतेः ।
यः पश्येद् विरजं भक्त्या मनुष्यो भक्तिमाप्नुयात् ॥ १५ ॥
तत्र श्रीविरजाग्रे च यः पठेन् मन्त्रमुत्तमम् ।
स मन्त्रः सिद्धिदः तस्य सत्यं सत्यं द्विजोत्तमाः ॥ १६ ॥
तत्पृष्ठभागे यो नित्यं पूजयेत् सिन्धुजापतिम् ।
स्थण्डिले प्रतिमायां वा शालग्रामेऽथवा शुभे ॥ १७ ॥
गन्धैः पुष्पैश्च नैवेद्यै धूपैर्दीपैः स्तवैस्तथा ।
मालाभिर्वाऽपि ताम्बूलैः पूजयेच्च जनार्दनम् ॥ १८ ॥
षण्मासाभ्यन्तरे देवो ददाति वरमीप्सितम् ।
प्राप्य सिद्धिं मृते चैव गच्छेद् विष्णुमनामयम् ॥ १९ ॥
एवं चास्य गुणाः सन्ति विरजाख्यस्य निर्मलाः ।
वक्तुं शक्नोति को देही विना शेषेण सत्तमाः ॥ २० ॥
सहस्रयोजनान्ते च यो जपेद् विरजां शुभः ।
तस्येप्सितमसौ देवी ददाति किल तत्परा ॥ २१ ॥
विरजाख्यं द्विजश्रेष्ठा एवं निगदितं मया ।
तत्र यूयं तपस्तप्त्वा परां सिद्धिं गमिष्यथ ॥ २२ ॥

इति श्रीकपिलपुराणे गिरिजामाहात्म्यं नाम,
अष्टमोऽध्यायः ॥ ८ ॥

उवाच संख्या २, अर्द्धश्लोक संख्या × पूर्णश्लोकसंख्या २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ नवमोऽध्यायः

ऋषय ऊचुः

पुरा त्वया निगदिताः कृष्णार्कपार्वतीहराः ।
अधुना श्रोतुकामाश्च वयं शम्भो र्वदस्व नः ॥ १ ॥
तत् कीर्तितं त्वया विप्र ! मुक्तिदं पुरुषोत्तमम् ।
मैत्रेयं विरजाख्यं च सर्वपापनिसूदनम् ॥ २ ॥
नीलाद्रिस्तु जलाकीर्णो विरजाख्यस्ततोऽधिकः ।
मैत्रेयं बालुकाकीर्णं दुःसहं रवितेजसा ॥ ३ ॥
तस्मात् पवित्रं परमं किञ्चिन्नास्ति तपोधनाः ।
अस्माकं तपसे क्षेत्रं तस्मिन्नद्रौ वद प्रभो ! ॥ ४ ॥
तत्र विश्वेश्वरश्चास्ते इति प्रोक्तं त्वया पुरा ।
तस्य स्थानं वदास्माकं तदेव तपसः फलम् ॥ ५ ॥

भरद्वाज उवाच

वक्ष्यामि परमं पुण्यं स्थानं शम्भोर्द्विजोत्तमाः ।
सर्वपापहरं रम्यं कैलाशं पर्वतोत्तमम् ॥ ६ ॥
विरजैकाम्रयो र्मध्ये कैलाशं च श्रुतं द्विजाः ।
सर्वपापहरो देवस्तत्र श्रीशिखरेश्वरः ॥ ७ ॥
वकुलैश्चम्पकै र्वृक्षैः सपुष्पैरुपशोभितम् ।
सपल्लवैश्चूतपूगै र्नारिकेलैः सचामरैः ॥ ८ ॥
खर्जूरैरर्जुनैश्चैव पनसैः सुमनोहरैः ।
कर्कन्धूकुलकै र्वृक्षै र्दाडिमैः प्रियदर्शनैः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विल्वै र्लोध्रैः पलाशैश्च पुन्नागैस्तुङ्गकेशरैः ।
जम्बुदन्तशटैर्वृक्षैः कोविदारैः फलार्दितैः ॥ १० ॥
तिन्तिडीवटवृक्षैश्च खदिरैश्चम्पकैस्तथा ।
पारिभद्रैश्च वकुलै र्धात्रीभिर्नागकेशरैः ॥ ११ ॥
जातिकाजूथिकाभिश्च पुष्पैश्चैव सुवासितैः ।
तगरैर्मल्लिकाभिश्च करवीरैः सपाटलैः ॥ १२ ॥
अशोकै र्मालतीभिश्च माधवीभिः कदम्बकैः ।
सेवन्तिकाभिः कुन्दैश्च काञ्चनैः श्वेतरक्तकैः ॥ १३ ॥
एवं नानाविधैर्वृक्षैः पुष्पै र्नानाविधै र्नरैः ।
विश्वनाथस्य तत् स्थानं पूरितं वै समन्ततः ॥ १४ ॥
शिखरेशं समासाद्य सम्वत्सरमतन्द्रितः ।
मन्त्रेणाश्रयते यस्तु तस्य मन्त्रः प्रसिध्यति ॥ १५ ॥
तत्रासौ विश्वनाथस्तु विश्वस्योत्पादने रतः ।
मोक्षदः कामदः श्रीमान् लिङ्गरूपी न संशयः ॥ १६ ॥
पुण्यक्षेत्राणि सन्त्यज्य पुण्यस्थानान्यनेकशः ।
कैलाशे पार्वतीनाथः एकाकी च परन्तपः ॥ १७ ॥
यदोद्धृतश्च कैलाशो रावणेन दुरात्मना ।
तदेकशृङ्गं पतितं तत् कैलाशमिहोच्यते ॥ १८ ॥
कैलाशादधिकं मन्ये कर्मभूमौ यतः स्थितम् ।
तत्र कर्मफलं भोगस्तत्र भोगाश्च केवलम् ॥ १९ ॥
कैलाशे शङ्करस्थाने ये वसन्ति नरोत्तमाः ।
इह भोगफलावाप्ति र्मुक्तिस्तेषां करे स्थिता ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कैलाशनिलयं शम्भो दुर्लभं मुक्तिदायकम् ।
यत्र देवगणाः सन्ति नित्यं शम्भोः समीपतः ॥ २१ ॥
आलोक्य शिखरेशं च पूजयित्वा प्रणम्य च ।
सुरभीमारणं दोषं क्षिप्त्वाऽर्घ्यं च व्रजेन्नरः ॥ २२ ॥
गुरुपत्नीकृतं दोषं गुरुनिन्दां कृतां तथा ।
व्रजेत् क्षिप्रं क्षयहेतुं स्मरन् वै शिखरेश्वरम् ॥ २३ ॥
ब्रह्मादिदेवताः सर्वाः काङ्क्षन्ति च मुहुर्मुहुः ।
भूमिलोकं कदा गत्वा द्रक्ष्यामः शिखरेश्वरम् ॥ २४ ॥
काङ्क्षन्ति पितरश्चैव प्रजाश्च सुनृपं यथा ।
यदास्माकं कुले जातः कैलाशाद्रिं गमिष्यति ॥ २५ ॥
तत्र गत्वा प्रयत्नेन स्नाति तीर्थे पयोऽमृते ।
अस्माकं तर्पयित्वा च नरकादुद्धरिष्यति ॥ २६ ॥
तस्मिन्नद्रौ द्विजश्रेष्ठास्तीर्थमस्ति पयोऽमृतम् ।
अग्रे श्रीशिखरेशस्य ईशानदिशमास्थितम् ॥ २७ ॥
वरेण्यं परमं पुण्यं पितृणां मुक्तिदायकम् ।
यत्र स्नात्वा च सौदासो राजा मुक्तिमवाप ह ॥ २८ ॥

ऋषय ऊचुः

तत्तीर्थस्य च माहात्म्यं विस्तरेण वदस्व नः ।
अन्यतीर्थस्य माहात्म्यं तस्मिन्नद्रौ द्विजोत्तमाः ॥ २९ ॥

भारद्वाज उवाच

भोगवत्यां च भूर्लोके स्वर्लोके सचराचरे ।
पयोऽमृतसमं तीर्थं नास्ति नास्ति वदाम्यहम् ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरा सत्ये च सौदासो रविवंशे महीपतिः ।
बभूव नरशार्दूलः प्रजापालनतत्परः ॥ ३१ ॥
वक्ता श्रोता महाशान्तो बृहस्पतिरिवापरः ।
रूपेण रतिनाथस्तु संग्रामे शचिनायकः ॥ ३२ ॥
तस्य बुद्धिः समुत्पन्ना मन्त्रं साधयितुं पुरा ।
वशिष्टं परिपप्रच्छ नृपतिः स्वपुरः स्थितम् ॥ ३३ ॥

सौदास उवाच

मन्त्रसिद्धि र्भवेत् कुत्र तत्स्थानं वद सत्तम !
यत्र स्नात्वा च जप्त्वा च गमिष्यामि परं पदम् ॥ ३४ ॥
आस्ते वाराणसी क्षेत्रं मुक्तिदं सिद्धिकामदम् ।
यत्र विश्वेश्वरो देवः साधकानां वरप्रदः ॥ ३५ ॥
वाराणसीसमं भूप ! क्षेत्रं नास्ति महीतले ।
लिङ्गरूपंधरः साक्षाद् यत्र देवो जगत्पतिः ॥ ३६ ॥
तस्मिन् क्षेत्रे महीपाल ! तीर्थं श्रीमणिकर्णिका ।
स्नात्वा तत्र नरो नारी ब्रह्महत्यात् प्रमुच्यते ॥ ३७ ॥
यत्र भागीरथी पुण्या नराणां मुक्तिदायिनी ।
भूलोके चैव पाताले स्वर्गलोके प्रतिष्ठिता ॥ ३८ ॥
भागीरथ्याश्च माहात्म्यं विस्तरं गदितं पुरा ।
यदम्बु कणमात्रं च ब्रह्महत्यां क्षयं नयेत् ॥ ३९ ॥
वाराणसी विश्वनाथो जाह्नवी मणिकर्णिका ।
एकैका दुर्लभा राजन् ! किमु यत्र चतुष्टयम् ॥ ४० ॥

भरद्वाज उवाच

इति तस्य वचः श्रुत्वा महर्षेश्च नराधिपः ।
तमृषिं प्रणिपत्याशु प्रतस्थे क्षेत्रमुत्तमम् ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गत्वा स्नात्वा च गङ्गयां दृष्ट्वा च पार्वतीपतिम् ।
क्षमा-सत्य-समायुक्तस्तपस्तेपे सुदारुणम् ॥ ४२ ॥
एवं च कतिचित् काले गते देवो महेश्वरः ।
स्वरूपं दर्शयित्वा तं स्वप्ने वाक्यमुवाच ह ॥ ४३ ॥

शङ्कर उवाच

आगतस्ते महाबाहो ! क्षेत्रं मुक्तिप्रदं मम ।
इदानीं गच्छ तपसे कैलाशनिलयं मम ॥ ४४ ॥
तत्राहं दर्शयिष्यामि सत्यं त्वां मामकीं तनुम् ।
मुक्तिं चैव प्रदास्यामि सत्यं सत्यं मयोदितम् ॥ ४५ ॥
मत्पार्श्वे चैव ह्यातेन्द्रतीर्थं नाम पयोऽमृतम् ।
चतुर्वर्गप्रदश्चैव तत्राहं शिखरेश्वरः ॥ ४६ ॥
सर्वपापहरं लिङ्गं नाम्ना श्रीशिखरेश्वरम् ।
यो मां पश्यति तत्रस्थं तस्मै मुक्तिं ददाम्यहम् ॥ ४७ ॥
तत्र तत्तपसा तुष्टो युगे सत्ये महीपते !
त्रेतायां द्वापरे चैव दर्शनात् सिद्धिदः स्वयम् ॥ ४८ ॥
कलौ च दर्शनेनैव सिद्धिदोऽहं नृणां किल ।
तस्मिन्नद्रौ तीर्थवरे यः स्नाति च पयोऽमृते ॥ ४९ ॥
स याति परमं स्थानं मद्देहे च प्रलीयते ।
पयोऽमृते महातीर्थे पयस्तेनामृतोपमम् ॥ ५० ॥
अमृतत्वं प्रयच्छाशु कृते स्नाने तवाम्भसि ।
अनेन विधिना भूप ! तत्र स्नानं समाचर ॥ ५१ ॥
तत्र स्नात्वा च मां दृष्ट्वा परां सिद्धिं गमिष्यसि ।
तत्रैव तीर्थं प्रवरं मदग्रे पापनाशनम् ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जंभकुनुमिति ख्यातं किंचदग्रे यमस्थितम् ।
पतन्ति तत्र वारीणि सर्वाङ्गशुभदानि च ॥
सर्वलोकपवित्राणि सर्वलोकशुभानि च ॥ ५३ ॥
पर्वतोद्भवशीतानि तत्र स्नात्वा सुखं लभेत् ।
जलेषु च शिरो दत्वा शुद्धो भूत्वा नरोत्तमः ॥ ५४ ॥
तत्र स्नानेन यत् पुण्यं शृणुष्व रविवंशज !
कैलाशकुण्डे सुस्नातः पूजयित्वा महेश्वरम् ॥ ५५ ॥
नरः सिद्धिमवाप्नोति तत्प्रसादान्न संशयः ।
तत्तोये मम तीर्थे च पूजनीयः स्थितो ह्यहम् ॥ ५६ ॥
तत्र गत्वा मन्त्रजपाल् लभते मुक्तिरूपताम् ।
इत्युक्त्वा गतवान् देवो राजा निद्रोत्थितस्तदा ॥ ५७ ॥
एकाकी च गतः श्रीमान् कैलाशाचलमुत्तमम् ।
तत्र राजा तपस्तप्त्वा स्नात्वा तीर्थे पयोऽमृते ॥ ५८ ॥
कञ्चित्कालं स्थितश्चासौ पश्चान् मुक्ति जगाम ह।
एकाकी देवदेवेशस्तत्र कैलाशपर्वते ॥ ५९ ॥
तत्र कोलाहलं कृत्वा नरके पच्यते ध्रुवम् ।
एवं मया निगदितं तत्स्थानं पर्वतोत्तमम् ॥
तत्र गत्वा तपस्तप्त्वा परां सिद्धिं गमिष्यथः ॥ ६० ॥

इति श्रीकपिलपुराणे सौदासमुक्तिप्राप्तिर्नाम
नवमोऽध्यायः ॥ ९ ॥

उवाचसंख्या ७, अर्द्धश्लोकसंख्या २ पूर्णश्लोकसंख्या ६०

★

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ दशमोऽध्यायः

ऋषय ऊचुः

तत्र कोलाहलं कृत्वा नरो नरकमाविशेत् ।
वयं तत्र गमिष्यामो भरद्वाज ! कथं वद ॥ १ ॥
सम्यक् स्थानं त्वया प्रोक्तं कैलाशं पार्वतीपतेः ।
तपस्तप्तुं महत् स्थानं केवलं दोषवर्जितम् ॥ २ ॥
उत्कले क्षेत्रमपरं किञ्चदस्ति तपोधन !
तद् वदाशु द्विजश्रेष्ठ ! अस्माकं च हितेच्छया ॥ ३ ॥
त्वत्प्रसादाद् भविष्यामः कृतार्था मुनिसत्तम !
गुह्यं किमपरं ह्यस्ति क्षिप्रं वद महामते ॥ ४ ॥

भरद्वाज उवाच

एकाग्रमनसो भूत्वा शृणुध्वं मुनिसत्तमाः ।
आख्यातं कस्यचित् पूर्वं गोपनीयं प्रयत्नतः ॥ ५ ॥
गुह्याद् गुह्यतमं ज्ञेयं परात् परतरं स्मृतम् ।
एकाग्रकरणं नाम तस्मिन्नद्रौ तपोधनाः ॥ ६ ॥
प्राणिनां मुक्तिदं शस्तं देवानां जयवर्द्धनम् ।
निर्मलं च निराकारं क्षेत्रं हरिहरात्मकम् ॥ ७ ॥
नरसिद्धगणाकीर्णं मुनीन्द्रैरुपशोभितम् ।
गन्धर्वैः किन्नरै र्जुष्टं विद्याधरसचारणैः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आम्र-निम्ब-कदम्बैश्च सपुष्पैश्च फलान्वितैः ।
पूगैः पनसकै वृंक्षै र्न्यग्रोधै र्वकुलैस्तथा ॥ ९ ॥
पलाशै र्मुचुकुन्दैश्च पारिजातैः प्रियाङ्गुभिः ।
कर्कन्धु-नग-नारङ्गै वृंक्षैं र्राजादनैरपि ॥ १० ॥
खदिरैश्चैव विल्वैश्च वञ्चुभिः करहाटकैः ।
र्काणकारैर्जपापुष्पैः कपित्थैः चिपुमन्दकैः ॥ ११ ॥
चम्पकैरतिमुक्तैश्च सुपुष्पै र्नागकेशरैः ।
शालतालशिरीषैश्च जम्वीरैः प्रियदर्शनैः ॥ १२ ॥
कदलीवन-षण्डैश्च पूरितं सुमनोहरैः ।
करवीरैः कणिकारैश्च कपित्थैर्बहुलैर्वरैः ॥ १३ ॥
यूथिकामल्लिकाभिश्च जातीलकुचकैस्तथा ।
अशोकैर्वकुलैश्चैव द्विरेफगणशोभितैः ॥ १४ ॥
मालतीलतिकाभिश्च दाडिमैर्वीजपूरकैः ।
एवं नानाविधैर्वृक्षैः तद् वनं पूरितं द्विजाः ॥ १५ ॥
दशादनैः खञ्जविटैः कोकिलैः कलनिःस्वनैः ।
चटकैश्चातकैश्चैव चकोरैश्चित्रपक्षिभिः ॥ १६ ॥
व्याघ्राटैः कुक्कुटैश्चैव शिरोमुकुटभूषितैः ।
पारावतैः सूक्ष्मपक्षैः लोहपृष्ठै र्वरानने ॥ १७ ॥
कादम्बै राजहंसैश्च प्रियायुक्तैः शुकैस्तथा ।
वर्तिकैस्तित्तिरीभिश्च मयूरैर्घननृत्यकैः ॥ १८ ॥
सिंहै र्व्याघ्रैश्च खङ्गैश्च भूदारैर्क्लशृङ्गैर्मृगैः ।
एवं नाना विधैरन्यैश्चतुष्पादै र्विहङ्गमैः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूरितं तद् वनं पुण्यं स्वजातिपरिनिष्ठितैः ।
दीर्घिकाभिस्तडागैश्च पद्मोत्पलविराजितैः ॥ २० ॥

कारण्डवैः प्लवैर्हंसैस्तवकै र्जलकुक्कुटैः ।
अकर्दमैः स्वच्छतोयैः सोपानेन विराजितैः ॥ २१ ॥

एवं नानाविधगुणैः समन्तात् परिपूरितम् ।
एकाम्रं परमं पुण्यं वनं विष्णुप्रियं महत् ॥ २२ ॥

सुवासितै र्गन्धवत्या उर्मिभिर्गुरुचञ्चलैः ।
वाम्रविक्षेपितैः पुण्यैः शीतलं सुमनोहरम् ॥ २३ ॥

साक्षाद् वैकुण्ठभुवनं जानीध्वं मुनिसत्तमाः ।
एकाम्रे तु जगन्नाथो भाति पाषाणलीलया ॥ २४ ॥

शङ्खचक्रधरः श्रीमान् वनमालाविभूषितः ।
यत्र विश्वेश्वरः शम्भुः साक्षान्नारायणात्मकः ॥ २५ ॥

यस्माद् यूयं मुक्तिकामास्तस्माद् वै तत्र गच्छत ॥ २६ ॥

इति श्रीकपिलपुराणे एकाम्रवर्णनं नाम
दशमोऽध्यायः ॥ १० ॥

उवाचसंख्या २ अर्द्धश्लोकसंख्या १ पूर्णश्लोकसंख्या २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथैकादशोऽध्यायः

ऋषय ऊचुः

विस्तरेण समाख्याहि क्षेत्रमेकाम्रकं मुने !
आश्रमाणि च रम्याणि तत्र लिङ्गानि कोटिशः ॥ १ ॥
श्रोतुकामा वयं सर्वे गमिष्यामो न संशयः ।
पूजयामो विरूपाक्षं नीरदाभं जनार्दनम् ॥ २ ॥

भरद्वाज उवाच

क्षेत्रमेकाम्रकं श्रीमत् परमानन्ददायकम् ।
समन्तात् क्रोशमात्रं च कोटिलिङ्गावृता मही ॥ ३ ॥
तत्रासौ देवदेवस्तु स्वगणैः पार्वतीपतिः ।
वरदो मुक्तिदो नृणां साधकानां च सिद्धिदः ॥ ४ ॥
परमानन्दरूपेण संस्थितः परमेश्वरः ।
परात् परतरो ज्ञेयो ब्रह्मादीनां वरप्रदः ॥ ५ ॥
वाराणसीं परित्यज्य जलाकीर्णो महेश्वरः ।
प्रार्थयित्वा हरेः पुण्यमेकाम्रे वनमाविशेत् ॥ ६ ॥

ऋषय ऊचुः

प्रार्थितं च कदाऽनेन शम्भुना लिङ्गरूपिणा ।
सर्वमेतत्तु वृतान्तं विस्तरेण वद प्रभो ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भरद्वाज उवाच

पुरा त्रेतायुगे विप्रा वाराणस्यां महेश्वरः ।
तिष्ठन् वाक्यमुवाचेदं नारदं मुनिपुङ्गवम् ॥ ८ ॥

शिव उवाच

अस्यां पूर्यामधिष्ठाय नरस्याघो विनश्यति ।
जातेयं च जनाकीर्णा तपोविघ्नकरी मुने ॥ ९ ॥
यत् स्थानं च जनाकीर्णं तत्र स्थातुं न युज्यते ।
उपद्रवो भवेत्तत्र नास्तिकैं र्ज्ञानदुर्बलैः ॥ १० ॥
नास्तिका यत्र तिष्ठन्ति तत्र धर्मो न विद्यते ।
अधर्माच्च भवेल्लुप्तो हरेर्भागो मुनीश्वराः ॥ ११ ॥
एतत् स्थानं प्रयत्नेन पार्वत्यर्थं पुरा कृतम् ।
पार्वत्या रुचिरं यत्र तत् स्थानं मम हर्षदम् ॥ १२ ॥
अधुनात्र मुनिश्रेष्ठ ! स्थातुं नोत्सहते मनः ।
रहस्यं परमं स्थानं कुत्रास्ति मां वदाशु च ॥ १३ ॥

नारद उवाच

लवणस्योदधेस्तीरे नीलशैलो नगोत्तमः ।
तदुत्तरस्यां विख्यातं क्षेत्रमेकाम्रकं प्रभो ॥ १४ ॥
तत्र श्रीवासुदेवस्तु रमानाथो जगद्गुरुः ।
अनन्तेन सह श्रीमान् एकाकी विजने वने ॥ १५ ॥
तत् स्थानं परमं गुह्यं न जानाति प्रजापतिः ।
भगवानपि जानाति देवतानां च का कथा ॥ १६ ॥
एकाम्रं परमं गुह्यं जगन्नाथस्य चक्रिणः ।
क्रोडस्थिताऽब्धिकन्यापि नैव जानाति शङ्करः ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साक्षाद् विग्रहवान् तत्र अनन्तेन जनार्दनः ।
सृष्ट्युत्पत्तिनाशौ च स्थितिस्तेन विचार्यते ॥ १८ ॥
